ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# साहित्यम् १

## मध्यमा १

## ( ધોરણ 11 )

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं विविधतापरिपूर्ण
तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां च कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 13.00**

**गुजरातराज्यशाळापाठ्यपुस्तकमंडळम्**
**'विद्यायनम्', सेक्टर 10 ए, गांधीनगरम्-382010**

© गुजरात राज्यशाला पाठ्यपुस्तक मण्डलम्, गांधीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकारा:गुजरातराज्यपाठ्यपुस्तक मण्डलहस्तका: सन्ति । अस्य पाठ्यपुस्तकस्य कश्चिदपि भाग: केनापि रूपेण गुजरातराज्यपाठ्य-पुस्तकमण्डल-नियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्येत ।

**विषयमार्गदर्शनम्**
डॉ. योगेश पंड्या

**लेखनम्**
डॉ. दुर्गाप्रसाद शर्मा (कन्वीनर)
डॉ. पंकज रावल:
श्री महेश जोषी
श्री रमाकान्त व्यास:
श्री जीतेन्द्र व्यास:

**समीक्षणम्**
डॉ. जयप्रकाश: द्विवेदी
डॉ. संजय जोषी
डॉ. प्रफुल्ल: पुरोहित:

**भाषाशुद्धि:**
डॉ. भावप्रकाश: गांधी

**संयोजनम्**
डॉ. क्रिष्ना दवे
(विषय-संयोजक: - अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामक: - शैक्षणिक:)

**मुद्रणसंयोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामक:- उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयो: अध्ययनाध्यापनयो: पद्धत्यो: समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमिति: (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिता: मानिता: च अभ्यासक्रमा: सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यताया: **साहित्य १ मध्यमा १** ( **धो२ण 11** ) इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञै: सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भि: सूचिता: सूचना: सादरं स्वीकरणीया: एव।

**पी. भारती** (IAS)
नियामक: कार्यवाहक:प्रमुख:
ता.06-07-2019 गान्धीनगरम्

**प्रथमावृत्ति : 2019**
**प्रकाशक :** गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामक:
**मुद्रक :**

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| 1. | साहित्यपरिचयः | 1 |
| 2. | काव्यस्वरूपम् | 7 |
| 3. | महाकाव्यम् | 13 |
| 4. | कुमारसम्भवम् | 18 |
| 5. | कुमारसम्भवान्तर्गतश्लोकाः | 24 |
| 6. | रघुवंशम् | 29 |
| 7. | रघुवंशश्लोकाः | 35 |
| 8. | महाकविभारविः | 40 |
| 9. | किरातार्जुनीयम् | 45 |
| 10. | महाकविः माघः | 54 |
| 11. | शिशुपालवधम् | 58 |
| 12. | श्रीहर्षः | 64 |
| 13. | नैषधीयचरितम् | 68 |
| 14. | खण्डकाव्यम् | 74 |
| 15. | मेघदूतम् | 80 |
| 16. | गद्यकाव्यम् | 87 |
| 17. | शिवराजविजयः | 95 |
| 18. | पञ्चतन्त्रम् | 100 |
| 19. | महाकविः भर्तृहरिः | 108 |
| 20. | नीतिशतकम् | 112 |
| 21. | हितोपदेशः | 118 |

# १ साहित्यपरिचयः

**''भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा''**

**प्रस्तावना :**

जगत्यस्मिन् बहुविधं साहित्यं प्रसिद्धमस्ति यथा गुजराती-हिन्दी-आङ्ग्ल-पंजाबी-कन्नड-संस्कृतादीनाम् साहित्य ग्रन्थाः । तेषु बहुविधेषु साहित्येषु संस्कृतसाहित्यविषये ज्ञातव्यम् एव । सर्वेषां मानवानां कल्याणकारकं जीवनपथप्रदर्शकं - वेदोपनिषत्तत्त्वज्ञानपूर्णं विशालं महत्त्वपूर्णं च संस्कृतसाहित्यम् अस्ति । भर्तृहरिरपि कथयति यत् साहित्यसङ्गीतकलाविहीनः पुच्छविषाणहीनः मानवः पशुतुल्यः अस्ति । अतः तत् साहित्यस्वरूपं तन्महत्त्वं तत्सम्प्रदायविषये च पाठेऽस्मिन् प्रतिपादितमस्ति ।

---

**साहित्यमहत्त्वम्**

**द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता ।**
**सुभाषितरसस्याग्रे सुधा भीता दिवङ्गता ॥**

पद्यमिदं देवभाषायाः महत्त्वं गायति । संस्कृतभाषा देवभाषा कथ्यते । संस्कृतभाषायां मानवसंस्कृतेः इतिहासः सुरक्षितः अस्ति । इयं संस्कृतभाषा अन्याभ्यः सर्वाभ्योऽपि भाषाभ्यः विस्तारे महति सौन्दर्ये विचारपवित्रतायां च विशाला वर्तते । सत्यपि मन्दतमे विकासक्रमे इतिहासारम्भसमयतः एव संस्कृतभाषा प्रवाहः नैरन्तर्यम्भजति । अन्याभिः विश्वस्य विविधानि सामाजिकपरिवर्तनानि, धार्मिकाणि उत्थानपतनानि, वैदेशिकानि आक्रमणानि च जातानि । तथापि संस्कृतं सर्वदा समभावेन सर्वत्र व्यवहारमार्गे सनातनकालतः सततं समागच्छति ।

साम्प्रतं संस्कृतं जीवितभाषात्वेन वर्तते । तत्प्रमाणमिदं यदधुनापि संस्काराः प्रायः अधिकसंख्यकभारतीयानां संस्कृते एव क्रियन्ते । महाभारतप्रभृतयः अन्ये ग्रन्थाः पठ्यन्ते, स्वकीयाः विचाराः विविधसामयिकद्वारा संस्कृते प्रकाश्यन्ते, कविताः विरच्यन्ते च ।

भाषाविज्ञानपण्डितानां मते आर्यभाषा रोमेटिकभाषा चेति द्वयोरेव भाषयोः व्यवहारकर्तारः सभ्यतां संस्कृतिं च सृष्टवन्तः। 'संस्कृतम्' इति पदं सम् + कृ + क्त इति रूपेण व्युत्पादितम् । भाषारूपार्थे अस्य प्रथमः प्रयोगः वाल्मीकिरामायणे लभ्यते ।

**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।**
**रावणं मन्यमाना सा सीता भीता भविष्यति ॥**

ततः पूर्वं तदर्थे भाषा-शब्दः एव व्यह्रियते स्म । यास्केन पाणिनिना चापि लोकव्यवहृतभाषार्थे भाषाशब्द एव व्यवहृतः । यथा-

(1) 'भाषायामन्वध्यायञ्च' । निरुक्ते 1 - 4

(2) 'भाषायां सदवसश्रुवः' पा.सू. 3-2-108

(3) 'प्रथमायाश्च द्विवचने भाषायाम्' पा.सू. 7-2-88

संस्कृतभाषायाः स्वरूपं द्विविधम्-लौकिकम् वैदिकञ्च । महाभारतकालात् पूर्वतनभाषा वैदिकभाषा, ततः प्रचारिता लौकिकभाषा । वेदेषु वैदिकभाषा अवलोक्यते । संस्कृतभाषायाः स्वरूपविचारे इदं प्राक् धारणीयम्, यदियं लोकभाषा व्यवहारभाषा वा केवलं शास्त्रभाषा चासीत् ? केचन वदन्ति यत् - प्राकृतमेव लोकभाषा आसीत् । संस्कृतं शास्त्रभाषा, व्यवहारभाषा नासीत् । केचित् संस्कृतभाषा एव पुरा लोकभाषा आसीदिति समर्थयन्ति । पूर्वं भारतीयाः स्वमनोभावं

संस्कृतभाषयैव प्रकटयन्ति स्म । क्रमशः शनैः शनैः प्राकृतोदये जाते संस्कृतभाषायाः व्यवहारक्षेत्रं सङ्कुचितं जातम् । परं तस्यामपि दशायां शिष्टास्तु संस्कृतभाषायाम् एव व्यवहरन्ति स्म । अत एव रूपकेषु शिष्टपात्राणां संस्कृतभाषा, अन्यपात्राणां च प्राकृतभाषा ।

अतिप्राचीनमिदं संस्कृतसाहित्यम् । वेदकालादारभ्य प्रवहन्तीयं संस्कृतसाहित्यधारा अबाधगत्या अधुनावधि समागच्छति । अन्यभाषासाहित्य - इतिहासानां विलोकनेन प्रतीयते यत् - तानि साहित्यानि अनुकूलपरिस्थितौ उदयन्ते, कियत्कालं यावत् अग्रे सरन्ति, किन्तु प्रतिकूलपरिस्थितौ तत्प्रवाहः शिथिलीभवति । स चायं दोषः संस्कृतसाहित्यं मनागपि न स्पृशति । वेदानां रचनायां जातायां तद् व्याख्यानभूताः ब्राह्मणग्रन्थाः रचिताः । ब्राह्मणग्रन्थेभ्यः पश्चात् आरण्यकानि,तदन्तरमुपनिषदः, ततो रामायणम्, महाभारतम् पुराणानि च । सेयं परम्परा कियता स्वरूपविपर्ययेण साकं काव्य-नाटक-गद्य-पद्य-चम्पू-कथा-स्मृति-तन्त्रादिनिर्माणरूपा वर्तते ।

अतिव्यापकं च संस्कृतसाहित्यम् । मानवजीवनोद्देश्यभूताः, धर्मार्थकाममोक्षाख्याः चत्वारोऽपि पुरुषार्थाः अत्र विवेचिताः । संस्कृते मानवजीवनोपयोगिनः सर्वेऽपि विषयाः सम्यक् प्रतिपादिताः इति कथनं योग्यमेव। अत्र प्रेयःशास्त्रं, श्रेयःशास्त्रं चोभयं समभावेन रचितमस्ति । अत एव भोगमोक्षयोः उभयोः सकलसाहित्यापेक्षया विशिष्टता वर्तते । संस्कृतसाहित्यं न केवलं भारतीयानाम्, अपि तु चीन-जापान-कोरिया प्रभृतिवासिनामपि लोकानाम् इतिवृत्तं, लङ्का-मलय-द्वीपादिवासिनां च इतिवृत्तं सुरक्षिततरूपेण गोपायति ।

भारतवर्षे न केवलं राजनीतिः, आयुर्वेदः, गणितफलितज्योतिषे, अङ्कगणितम्, ज्यामितिः अपि तु तन्त्रम्, मन्त्रः, कामकला चापि साहित्यरूपेण पाठ्यते । तद्वैभवं संस्कृतस्यैवास्ति ।

सूत्रसाहित्यं क्वापि परस्यां भाषायां न जातम् । इदमनन्यसाधारणं संस्कृतसाहित्यस्य महत्त्वमस्ति । संस्कृतं न केवलं ब्राह्मणधर्मनामकं धर्मं प्रतिष्ठापयामास । अपि तु बौद्धधर्मनामकं सार्वभौमधर्मम् अपि प्रकाशयामास । मननशक्तिसमुद्भवानि दर्शनानि संस्कृते महत्त्वम् आनयन्ति ।

आभिः विशिष्टताभिः संस्कृतसाहित्यस्य महत्त्वं प्रतिष्ठितमस्ति । विक्रमादित्यसमयात् चतुर्दशशताब्दीपर्यन्तं तत्र भारतीयं साम्राज्यम् आसीत् तदा तत्र संस्कृतमेव राजभाषा आसीत् ।

**साहित्यसम्प्रदायाः**

**अत्र श्लोकमाध्यमेन सम्प्रदायाः लिखिताः सन्ति ।**

**वक्रोक्ति-र्ध्वनिरौचित्यं रसालङ्काररीतयः ।**
**साहित्ये षड्विधाः प्रोक्ताः सम्प्रदायाश्च पण्डितैः ॥**

(1) रससम्प्रदायः (2) अलङ्कारसम्प्रदायः (3) रीतिसम्प्रदायः (4) वक्रोक्तिसम्प्रदायः (5) ध्वनिसम्प्रदायः (6) औचित्यसम्प्रदायः

**(1) रससम्प्रदायः**

काव्यशास्त्रे सर्वेषु सम्प्रदायेषु रससम्प्रदायः प्राचीनतमः गण्यते । अस्य सम्प्रदायस्य स्थापना नाट्यशास्त्रस्य रचयित्रा भरतमुनिना कृता । अत्र उल्लेखनीयं भवति यत् राजशेखरेण रससम्प्रदायस्य स्थापकरूपेण नन्दिकेश्वरस्य उल्लेखः कृतः परं नन्दिकेश्वरस्य न कोऽपि ग्रन्थः उपलभ्यते । अतः आचार्यभरतमुनिरेव अस्य सम्प्रदायस्य प्रवर्तकः अस्ति इति सर्वे स्वीकुर्वन्ति । यद्यपि ऋग्वेदे ''दधानः कलशे रसम्'' रसशब्दस्य उल्लेखः कृतोऽस्ति । ततश्च ''रसो वै सः'' ''रसं ह्येवायं लब्ध्वानन्दी भवति्'' इति तैत्तरीयोपनिषदि लिखितमस्ति । तथापि साहित्यशास्त्रे भरतमुनिना उल्लेखः कृतः । तस्मात् स एवास्य प्रवर्तकः आचार्यः कथ्यते । एतस्मादिदमपि स्पष्टं यदयं सम्प्रदायः अतीव प्राचीनतमः वर्तते ।

अतः जिज्ञासा भवति कोऽयं रस इति काव्यपठनेन श्रवणेन अभिनयदर्शनेनच यादृशः आनन्दो भवति स एव आनन्दः रसः । रस्यते आस्वाद्यते इति रसः । अयमेव रसः काव्यस्य आत्मतत्त्वमस्ति । अस्य सम्प्रदायस्य मुख्यसूत्रमस्ति – ''विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ''

अर्थात् विभावानुभावव्यभिचारिभावानां संयोगात् रसोत्पत्तिः जायते । भरतमुनिना षष्ठसप्तमाध्याययोः रसभावयोः निरूपणं कृतमस्ति । मानवहृदये केचन भावाः नितान्तं स्थिताः ते स्थायिभावाः कथ्यन्ते । सामान्यरूपेण इमे भावाः सुषुप्ताः भवन्ति । अनुकूलमुद्दीपनं प्राप्य जागृताः भूत्वा रसानुभूतिं कारयन्ति । इमे अष्टौ स्थायिभावाः यथा– 'रतिः, हासः, शोकः, क्रोधः, उत्साहः, भयम्, जुगुप्सा, विस्मयः' एभ्यः भावेभ्यः क्रमशः शृङ्गारः, हास्यः, करुणः, रौद्रः वीरः, भयानकः, बीभत्सः, अद्भुतः इति रसाः निष्पन्नाः भवन्ति । ततः नवमः शान्तरसः स्वीकृतः, तस्य स्थायिभावः शमः यद्यपि आलङ्कारिकैः वात्सल्य–भक्ति–मधुरादयो रसा अपि स्वीकृताः सन्ति ।

**( 2 ) अलङ्कारसम्प्रदायः**

अस्य सम्प्रदायस्य प्रवर्तकः आचार्यः भामहः वर्तते । तन्मते अलङ्कार एव काव्यस्यात्मा विद्यते । अलङ्कारा एव काव्यशोभां वर्धयन्ति । युक्तमुक्तम् –

**न कान्तमपि निर्भूषं विभाति वनितामुखम् ।**

**अलङ्कारस्य विरहे विधवेव सरस्वती ॥**

यथा युवतिमुखं रमणीयमपि अलङ्कारं विना न शोभते, तथैव काव्यमपि अलङ्कारं विना न शोभते । काव्ये अलङ्कार–महत्त्वं प्रायः सर्वैरपि स्वीकृतम् । जयदेवस्तु कथयति चन्द्रालोके यत् अलङ्काररहितं काव्यम् अनुष्ण–अग्निवत् अस्ति । अस्य सम्प्रदायस्य दण्डी, उद्भटः, रुद्रटः, प्रतिहारेन्दुराजः, रुय्यकः, जयदेवः अप्पयदीक्षितः इत्यादयः सर्वे अनुयायिनः सन्ति । अयं सम्प्रदायः रसस्यापि अलङ्कारे अन्तर्भावं पश्यति । तस्मादत्र रसवदलङ्काराः स्वीकृताः । वैदिकसाहित्ये उपमा–रूपकाद्यलङ्काराणां नामानि दृश्यन्ते । यथा – **ईयुषीरागमुपमा शाश्वतीनाम्**

इति ऋग्वेदे ।

साङ्गरूपकं यथा–

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।**

**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । (कठोपनिषत्)**

इत्थं साहित्यशास्त्रे सर्वत्र अलङ्कारमहत्त्वं दृश्यते ।

**( 3 ) रीतिसम्प्रदायः**

रीतिसम्प्रदायस्य प्रवर्तकः आचार्यः वामनः अस्ति । सः ''रीतिरात्मा काव्यस्य'' इति लिखितवान् । स रीतिव्याख्यां कुर्वन् लिखति ''विशिष्टा पदरचना रीतिः'' विशेषो गुणात्मा अर्थात् गुणयुक्ता पदरचना रीतिः । तन्मते गुणाः काव्यस्य नित्यधर्माः । अलङ्काराः अनित्यधर्माः । गुणाः काव्ये शोभामुत्पादयन्ति, तदभिवृद्धिम् अलङ्काराः कुर्वन्ति । वामनेन अलङ्कारापेक्षया गुणेभ्यः प्राधान्यं दत्तम् । तस्मादयं सम्प्रदायः गुणसम्प्रदायनाम्नापि प्रसिद्धः । वामनेन तिस्रः रीतयः स्वीकृताः–वैदर्भी, गौडी, पाञ्चाली च । रुद्रटः चतुर्थीं लाटीं योजयति । यद्यपि भोजस्तु रीतिशब्दः 'रीङ् गतौ' इति धातुना निष्पन्नः इति उक्तवान्, यदर्थः चलनं निर्माणम् इति भवति । वैदर्भीरीतौ सर्वे गुणाः भवन्ति । अत एव–

**''इति वैदर्भमार्गस्य प्राणा दशगुणा मताः''**

काव्यादर्शे गौडीरीतौ ओजस्–कान्ति–गुणद्वयम् पाञ्चाल्यां माधुर्यं सौकुमार्यं च गुणौ स्तः । तथाऽपि ''रीतयोऽवयवसंस्थान विशेषवत्'' इति विलिख्य प्राणरूपेण अयं सम्प्रदायः न स्वीकृतः । रीतिनामानि प्रदेशनाम्ना निर्मितानि सन्ति । यथा

– लाटी-लाट (गुजरात) नाम्नः निर्गता । प्रायः अस्य सम्प्रदायस्य अनुयायिनः न सन्ति ।

**( 4 ) वक्रोक्तिसम्प्रदायः**

अस्य सम्प्रदायस्य स्थापकः आचार्यः कुन्तकः वर्तते । वक्रोक्तिजीविते तेन ''वक्रोक्तिः काव्यजीवितम्'' इति विलिख्य काव्ये प्राणतत्त्वं वक्रोक्तिरिति प्रस्थापितम् ।''वक्रोक्तिरेव काव्यस्य वैदग्ध्यभङ्गीभणितिरुच्यते'' अर्थात् चमत्कारपूर्णा चातुर्ययुक्ता चोक्तिः वक्रोक्तिः कथ्यते । अस्याः उक्तेः षट् प्रकाराः सन्ति । यथा- वर्ण-पद-वाक्य-अर्थ-प्रकरण-प्रबन्ध-आदयः । कुन्तकाचार्येण गुणरीत्यलङ्काराणां वक्रोक्तिमध्ये एव अन्तर्भावो दर्शितः । अनेन एवाचार्येण शब्दार्थयोः अर्थार्थयोः सामञ्जस्योपरि समधिकं बलं प्रकटितम् ।

सहितयोर्भाव एव साहित्यम् इत्यस्य समन्वयो दर्शितः । तेन शैल्याः मार्गत्रयं प्रदर्शितम् – सुकुमारविचित्रमध्यममार्गाः। अनेनाचार्येण अनुयायिनो न लब्धाः । केचित् एनं रीतिसम्प्रदायस्यैव नूतनस्वरूपमिति स्वीकुर्वन्ति, तर्हि परवर्तिनः आचार्याः रुद्रटप्रदर्शितदिशा वक्रोक्तिमेकं सामान्यं शब्दालङ्कारमात्रमेव स्वीकृतवन्तः ।

**( 5 ) ध्वनिसम्प्रदायः**

अस्य सम्प्रदायस्य प्रवर्तकः आनन्दवर्धनः अस्ति । ध्वन्यालोके आनन्दवर्धनाचार्यः काव्यस्य आत्मतत्त्वं ध्वनिरिति लिखितवान् । यथा ''काव्यस्यात्मा ध्वनिः'' महाकवीनां वाण्याम् अलङ्कार – रीति – गुण – वक्रोक्तिभिन्नः व्यङ्ग्यार्थो भवति । अङ्गनायाः लावण्यं यथा अवयवभिन्नं स्वतन्त्रं भवति तथैव ध्वनिः सर्वभिन्नः भवति । यथा-

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥**

तत्रध्वनेः लक्षणं यथा-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥**

काव्यशास्त्रस्य सम्प्रदायेषु ध्वनिसम्प्रदायः सर्वाधिकः प्रबलः महत्त्वपूर्णश्च सम्प्रदायः । आनन्दवर्धनेन ध्वनेः त्रयः प्रकाराः प्रदर्शिताः-1 वस्तुध्वनिः, 2-अलङ्कारध्वनिः 3- रसध्वनिः । अस्य ध्वनेः आधारं गृहीत्वा काव्यस्यापि त्रयः प्रकाराः उक्ताः – ध्वनिकाव्यम्, गुणीभूतव्यङ्ग्यकाव्यम् तथा चित्रकाव्यम् । इदं भेदत्रयमेव क्रमशः उत्तमकाव्यम्, मध्यमकाव्यम्, अधमकाव्यञ्चेति भेदेन व्यपदिश्यते । अस्य सम्प्रदायस्य विरोधः प्रतिहारेन्दुराज-कुन्तक-भट्टनायकादिभिः साहित्यिक-वैयाकरण-वेदान्ति-मीमांसक-नैयायिकैश्च कृतः । परमस्य समर्थकाः अभिनवगुप्त-मम्मट-विश्वनाथ-जगन्नाथप्रभृतयः समर्थाः आचार्याः सन्ति । यथार्थनिरूपणेन पश्यामश्चेत् ध्वनिसम्प्रदायः रससम्प्रदायस्येव विस्तृतरूपमस्ति । ध्वनिशब्दाय आलङ्कारिकाः वैयाकरणानाम् ऋणिनः सन्ति ।

वैयाकरणैः स्फोटरूपमुख्यार्थाभिव्यक्तिविधायकशब्दस्य कृते ध्वनिरिति शब्दप्रयोगः कृतः । आलङ्कारिकैस्तु अस्मिन्नेव साम्ये ध्वनिशब्दं गृहीत्वा एतस्य विस्तृतः व्यापकश्चार्थो विहितः ।

**( 6 ) औचित्यसम्प्रदायः**

अस्य सम्प्रदायस्य प्रवर्तकः आचार्यः क्षेमेन्द्रः वर्तते । औचित्यविचारचर्चा नामके ग्रन्थे ''औचित्यं काव्यस्यात्मेति'' स्वीकृतम् । यथा-

**''औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्'' ।**

काव्ये गुणालङ्कारवस्तुरसध्वन्यादीनां स्थानेषु सर्वत्र औचित्यं परमावश्यकम् । तदर्थं स लिखितवान् – यथा-

**कण्ठे मेखलया, नितम्बफलके तारेण हारेण वा**
**पाणौ नूपुरबन्धनेन,चरणे केयूरपाशेन वा ।**
**शौर्येण प्रणते, रिपौ करुणया नायान्ति के हास्यता**
**मौचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणाः ॥**

आनन्दवर्धनोऽपि रसपुष्ट्यर्थम् औचित्यमतीवावश्यकमिति मन्यते । तदुक्तं तेन -

**अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम् ।**
**प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥**

औचित्यस्य विचारः भरतमुनिसमान एव प्राचीनो वर्तते । अस्य औचित्यस्य सर्वैः स्वीकारः कृतः तथापि स्वतन्त्र सिद्धान्तरूपेणास्य स्थापना क्षेमेन्द्रेण कृता । अयं सिद्धान्तः स्वतन्त्रः तथापि स्वतन्त्रसम्प्रदायः भवितुं विस्तृतो नाभवत्॥

**स्वाध्यायः**

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) का म्लानमुखी जाता ?

(क) सुरा (ख) सुधा (ग) द्राक्षा (घ) यमुना

(२) का दिवङ्गता ?

(क) विद्या (ख) गङ्गा (ग) सुधा (घ) दिशा

(३) का अश्मतां गता ?

(क) जरा (ख) करुणा (ग) शर्करा (घ) वाणी

(४) साहित्यशास्त्रे कति सम्प्रदायाः सन्ति ?

(क) चत्वारः (ख) पञ्च (ग) षट् (घ) सप्त

(५) रससम्प्रदायस्य प्रवर्तकः आचार्यः कः ?

(क) गौतममुनिः (ख) भरतमुनिः (ग) व्यासमुनिः (घ) वसिष्ठमुनिः

(६) सर्वसम्प्रदायेषु कः सम्प्रदायः प्राचीनतमः ?

(क) अलङ्कारः (ख) रीतिः (ग) वक्रोक्तिः (घ) रसः

(७) शृङ्गाररसस्य स्थायिभावः कः ?

(क) रतिः (ख) शोकः (ग) गीतिः (घ) उत्साहः

(8) करुणरसस्य स्थायिभावः कः

(क) क्रोधः (ख) शोकः (ग) मोहः (घ) हर्षः

(9) रसाः कति सन्ति ?

(क) अष्टौ (ख) सप्त (ग) षट् (घ) पञ्च

(10) कस्य रसस्य स्थायिभावः उत्साहः अस्ति ?

(क) वीरः (ख) रौद्रः (ग) करुणः (घ) शृङ्गारः

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) अलङ्कारसम्प्रदायस्य प्रवर्तक: आचार्य: कोऽस्ति ?

(२) रीतिसम्प्रदायस्य प्रवर्तक: आचार्य: कोऽस्ति ?

(३) वक्रोक्तिसम्प्रदायस्य प्रवर्तक: आचार्य: कोऽस्ति ?

(४) आनन्दवर्धन: कस्य सम्प्रदायस्य स्थापक: ?

(५) औचित्यसम्प्रदायस्य प्रवर्तक: क: ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) रससम्प्रदाय:

(२) ध्वनिसम्प्रदाय:

(३) संस्कृतसाहित्यमहत्त्वम्

**४. टिप्पणी लेख्या ।**

१. रीतिसम्प्रदाय:

२. वक्रोक्तिसम्प्रदाय:

३. संस्कृतसाहित्यस्वरूपम्

**५. अ-ब योः योग्यसंयोजनं कुरुत ।**

| अ | ब |
|---|---|
| (१) रससम्प्रदाय: | (१) कुन्तक: |
| (२) अलङ्कारसम्प्रदाय: | (२) क्षेमेन्द्र: |
| (३) रीतिसम्प्रदाय: | (३) भरतमुनि: |
| (४) वक्रोक्तिसम्प्रदाय: | (४) आनन्दवर्धन: |
| (५) औचित्यसम्प्रदाय: | (५) भामह: |
| (६) ध्वनिसम्प्रदाय: | (६) वामन: |

**छात्रप्रवृत्तिः**

- साहित्यदर्पणादिग्रन्थानां पठनं कुर्वन्तु ।

**शिक्षकप्रवृत्तिः**

- शिक्षक: साहित्यग्रन्थविषये वर्गमध्ये विवेचयतु ।

# २ काव्यस्वरूपम्

**प्रस्तावना**

संस्कृतसाहित्ये प्राय: सर्वासां विद्यानां विविधरूपाणि समुपवर्णितानि सन्ति । नहि कोऽपि लौकिकोऽलौकिको वा विषय: य: संस्कृतशास्त्रेषु वर्णित: न स्यात् ।

कर्मकाण्डशास्त्रम्, ज्योतिषम्, साहित्यम्, व्याकरणम्, दर्शनप्रभृतिषु अनेकविद्यासु काव्यविद्या विशिष्टा प्रभावपूर्णा च विद्या वर्तते । सामान्यशिक्षितानां जीवनेऽपि किमपि वैशिष्ट्यं जनयितुं समर्था वर्तते । रत्युत्साह: शोक: क्रोधादय: स्वाभाविका: भावा: यदा कविहृदयं केनाऽपि कारणेन उद्वेलितं कुर्वन्ति, तदा कविब्रह्मणो मुखात् काव्यं समुत्पद्यते। अनेन प्रतीयते यत् काव्योत्पत्ति: अनादिकालादेव सर्वविधजनकल्याणाय आसीत् । एतादृशस्य काव्यस्य किं स्वरूपम्? इति काव्यस्वरूपविषये संस्कृतसाहित्यजगति ये साहित्यकलाप्रवीणा: विद्वांस: कवय: सन्ति, तेषां काव्यलक्षणं प्रस्तूयते।

---

(1) काव्यलक्षणविषये जयदेव: ''चन्द्रालोक:'' इति ग्रन्थे स्वमतं प्रकटयन् कथयति । यथा–

**निर्दोषा लक्षणवती सरीतिर्गुणभूषणा ।**
**सालङ्काररसानेकवृत्तिर्वाक्काव्यनामभाक् ॥**

**सरलार्थ:**-

काव्यदोषरहिता काव्यलक्षणलक्षिता काव्यरीतिसहिता प्रसादादिगुणै: भूष्यमाणा उपमादय:, श्रृङ्गारादय: तै: सहिता अलङ्काररससम्पन्ना वृत्तिसहिता उक्तविशेषणविशिष्टा वाणी काव्यलक्षणयोग्या भवति ।

(2) साहित्यदर्पणकर्तु: विश्वनाथस्य काव्यलक्षणम् । यथा–

**वाक्यं रसात्मकं काव्यम् ॥**

रस एव आत्मा साररूपतया जीवनाधायको यस्य तद् वाक्यं काव्यम् । अस्य मते तदेव वाक्यं काव्यमस्ति, यत्र आत्मरूपेण रस: सम्यक् स्थितो भवेत् ॥

(3) वाग्देवतावतारस्य मम्मटस्य काव्यलक्षणम् । यथा – काव्यप्रकाशे

**तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन: क्वापि ॥**

अर्थात् अदोषौ च्युतसंस्कारादिदोषरहितौ, सगुणौ माधुर्यादिगुणसहितौ सर्वत्र साऽलङ्कारौ क्वचित् स्फुटालङ्कारविरहेडपि शब्दार्थौ काव्यम् ॥

(4) ध्वनिकारस्य आनन्दवर्धनस्य काव्यलक्षणम् । यथा – ध्वन्यालोके –

**काव्यस्यात्मा ध्वनि: ।**

अर्थात् काव्यस्य ध्वनि: आत्मा इति । अत्र ध्वनि: न केवलं व्यङ्ग्यार्थ: परं काव्यस्यात्मा स्वीकृत: ।

(5) अलङ्कारसम्प्रदायस्य प्रवर्तक: भामहस्य काव्यलक्षणं । काव्यालङ्कारग्रन्थे यथा–

**शब्दार्थौ सहितौ काव्यम् ।**

(6) भोजदेवोक्तं काव्यलक्षणं सरस्वतीकण्ठाभरणे । यथा–

**अदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ॥**

**रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ॥**

अर्थात् – दोषरहितं गुणसहितम् अलङ्कारयुक्तम् रसान्वितं काव्यं कुर्वन कविः कीर्तिं यशः प्रीतिं च विन्दति।

(7) रीतिसम्प्रदायस्य प्रवर्तकस्य आचार्यवामनस्य काव्यलक्षणम् । यथा – काव्यालङ्कारसूत्रे –

**रीतिरात्मा काव्यस्य ॥**

सः रीतेः व्याख्यां कुर्वन् लिखति – ''विशिष्टा पदरचना रीतिः'' अर्थात् गुणयुक्ता पदरचना रीतिः तन्मते गुणाः काव्यस्य नित्यधर्माः अतः वामनेन रीतिः काव्यस्य आत्मा इति स्वीकृतम् ।

(8) वक्रोक्तिसम्प्रदायस्य आचार्यः कुन्तकः वर्तते । तस्य काव्यलक्षणं निम्नप्रकारेण अस्ति । यथा–

**वक्रोक्तिः काव्यजीवितम् ॥**

अर्थात् वक्र=जनसामान्यकथनभिन्ना लोकोत्तर–चमत्कारशालिनी उक्तिः भणितिः कथनम् एव वक्रोक्तिः। वक्रोक्तियुक्त रचनायां सहभावेन व्यवस्थितौ शब्दार्थौ काव्यमस्तीति फलितम् ॥

(9) पण्डितजगन्नाथः रसगङ्गाधरग्रन्थे स्वकाव्यलक्षणं प्रस्तौति । यथा–

**रमणीयार्थप्रतिपादकः शब्दः काव्यम् ॥**

अर्थात् विलक्षणचमत्कारकारणतया सुन्दरस्यार्थस्य वाच्यलक्ष्यव्यङ्ग्यान्यतमस्य बोधकः शब्दः काव्यम् ।

(10) आचार्यदण्डी स्वीये प्रसिद्धग्रन्थे काव्यादर्शे काव्यलक्षणं कुर्वन् कथयति । यथा –

**शरीरं तावदिष्टार्थव्यवच्छिन्नापदावली ॥**

एतदनुसारम् अभिलाषितार्थसमन्वितः पदसमूहः काव्यम् ।

## काव्यमहत्त्वम्

काव्यमहत्त्वस्य वर्णनप्रसङ्गे सर्वप्रथमम् अत्र काव्यप्रकाशकर्तुः मम्मटस्य 'काव्यमहत्त्वम्' प्रस्तूयते । यथा काव्यप्रकाशस्य प्रथमोल्लासे –

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**

**सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥**

कवेः असाधारणं कर्म काव्यम्, यशसे=कीर्तये अर्थात् काव्यं समाजे अस्माकं यशः विस्तारयति। अर्थकृते = धनकरणाय, व्यवहारविदे = आचारवेदनाय शिवेतरक्षतये = अमङ्गलविनाशाय, सद्यः–समनन्तरमेव, परनिर्वृतये = परमानन्दाय, कान्तासम्मिततया = मनोरमातुल्यतया, उपदेशयुजे = युक्तोपदेशाय भवति ।

काव्यपठनस्य किं फलं महत्त्वं वा एतस्मिन् विषये जगन्नाथः स्वमतं प्रतिपादयन् कथयति । यथा– रसगङ्गाधरे

**॥ कीर्तिपरमाह्लादराजदेवताप्रसादाद्यनेकप्रयोजनस्य काव्यस्य ॥**

**सरलार्थः–**

कीर्तिः = यशः, परमाह्लादः = अद्वितीयानन्दः, गुरुराजदेवतानां च प्रसादः = प्रसन्नता एव प्रयोजनानि = फलानि यस्य तत् तथाभूतस्य काव्यस्य = कविकर्मविशेषस्य व्युत्पत्तिः काव्यानन्दानुभवशीलानां जिज्ञासूनां कृतिः परमावश्यकी वर्तते ।

विश्वनाथस्य काव्यमहत्त्वं साहित्यदर्पणे । यथा–

**'चतुवर्गफलप्राप्तिः सुखादल्पधियामपि ।**

**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥'**

अल्पधियाम् अपि = अल्पबुद्धीनामपि न केवलं महाधियाम्, सुखात् = अनायासात्, काव्यादेव = रघुवंशादेः कविकृतेरेव चतुर्वर्गफलप्राप्तिः = धर्माऽर्थकाममोक्षरूपफलप्रापणं भवतीति ॥

अलङ्कारसम्प्रदायस्य आचार्यभामहस्य काव्यमहत्त्वं काव्यालङ्कारग्रन्थे । यथा –

**'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।**

**करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥'**

साधुकाव्यनिषेवणम् = साधुकाव्यस्य = सत्काव्यस्य निषेवणम् = परिशीलनं, कलासु = नृत्यगीतादिचतुःषष्टि–भेदासु च कलासु, वैचक्षण्यम् = पाण्डित्यं तथा कीर्तिम् = सत्काव्यपरिशीलनजनितं यशः, एवं च प्रीतिं च = अनुरागं च, करोति = विदधाति ।

काव्यस्य महत्त्वम् अग्निपुराणे । यथा–

**नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।**

**कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥**

लोके–संसारे, नरत्वम् = मनुष्यत्वं, दुर्लभम् = दुष्प्राप्यम् । चतुरशीतिलक्षसंख्यकासु योनिषु नरयोनिः दुर्लभा । तत्र = नरत्वेऽपि, पूर्वजन्मनः सुकृतफलात् नरयोनिप्राप्ते सत्यपि, विद्या = शास्त्रबोधः सुदुर्लभा = अतिशयदुष्प्राप्या, नरत्वे लब्धेऽपि शास्त्रप्राप्तिः जन्मान्तरसुकृताऽतिशयादेव प्राप्यते इति । तत्र = विद्याप्राप्तौ जातायामपि कवित्वं = काव्यकर्तृत्वं, दुर्लभम् = कवित्वप्राप्तिरपि जन्मजन्मान्तरसुकृतपुञ्जपरिपाकादेव भवतीति । तत्र = कवित्वे येन केनापि प्रकारेण लब्धेऽपि, शक्तिः = कवित्वबीजरूपः संस्कारविशेषः,सुदुर्लभा = अत्यन्तसुदुष्प्राप्यो भवतीति ।

विष्णुपुराणे – काव्यस्य महत्त्वम् –

**काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।**

**शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ॥**

ये केचित् = दृश्यरूपाः श्रव्यरूपा वा, काव्यालापाः = रसाभिव्यञ्जकाः शब्दार्थाः, एवं च अखिलानि = समस्तानि, गीतकानि च = गीतानि च एते = इमे सर्वेऽपि शब्दमूर्तिधरस्य भगवतः विष्णोः नारायणस्य अंशाः = अवयवाः एव सन्ति ।

भरतमतानुसारेण काव्यमहत्त्वं निम्नप्रकारेण विद्यते । यथा नाट्यशास्त्रे –

**धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् ।**

**लोकोपदेशजननं नाट्यमेतद् भविष्यति ॥**

भरतमुनिः कथयति यत् एतद् नाट्यशास्त्रं सामाजिकानां कृते उपदेशजनकं, सुकृतदायकम्, समाजे यशोविस्तारकम्, आयुर्वृद्धिकरम्, किं कर्तव्यं किं न कर्तव्यमिति मार्गप्रदर्शकम् तथा बुद्धिवर्धकं भविष्यतीति । काव्यस्य महत्त्वं प्रदर्शयन् आचार्यदण्डी कथयति यत् यः कोऽपि साहित्यशास्त्रं सम्यग् न जानाति सः काव्ये गुणदोषविषये सुन्दरासुन्दरनिर्देशने कदापि समर्थो न भवितुमर्हति । अतः जिज्ञासूनां व्युत्पत्तिलाभाय ज्ञानसंचयाय च विविधप्रकारवाक्यरचनानियामकस्यास्य काव्यशास्त्रस्य निर्माणं कृतं प्राचीनाचार्यैः । यथोक्तम् –

**गुणदोषानशास्त्रज्ञः कथं विभजते जनः ।**
**किमन्यस्याधिकारोऽस्ति रूपभेदोपलब्धिषु ॥**
**अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः ।**
**वाचां विचित्रमार्गाणां निबन्धुः क्रियाविधिम् ॥**

विविधदृष्ट्यनुसारं काव्यस्यानेकप्रकाराः निर्दिष्टाः सन्ति । यथा मनुष्याणां इति वृत्तिस्वभावेषु पर्याप्तभेदः संलक्ष्यते,तथैव तस्य मानवस्य भावप्रधानक्रियाभिव्यक्तिरूपे काव्येऽपि भेदप्रभेदः स्वाभाविक एव कथयितुं शक्यते । तत्र सर्वप्रथमं रचना स्वरूपविचारेण काव्यस्य द्वौ भेदौ स्तः । श्रव्यकाव्यं, दृश्यकाव्यं च । यथा साहित्यदर्पणे –

**दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।**
**दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम् ॥**

अर्थात् येषां काव्यानाम् आनन्दस्योपयोगः कर्णेन्द्रियद्वारा श्रवणानन्तरं क्रियते तानि श्रव्यकाव्यानि कथ्यन्ते । तानि श्रव्यकाव्यानि गद्यपद्यभेदेन द्विप्रकारकं भवन्ति । पुनश्च गद्यपद्ययोः मिश्रणयुक्तं काव्यं 'चम्पूकाव्यम्' भवति । यथा–

**गद्यपद्यमयं काव्यं 'चम्पूः' इत्यभिधीयते । सा.द. ३/३३६**

अर्थात् – गद्यपद्यात्मकं काव्यं 'चम्पूः' इति अभिधीयते । यथा– (1) देशराजचरितम् । (2) नलचम्पूः ।

**दृश्यकाव्यम्** –

येषां काव्यानाम् आनन्दानुभवः प्रत्यक्षदृष्ट्या दर्शनेन रङ्गमञ्चे नाटकादीनाम् अवलोकनेन दूरदर्शने चलचित्रदर्शनेन वा प्राप्नुमः तत् साहित्यं दृश्यकाव्यं कथ्यते । तत् दृश्यकाव्यम् अभिनेतुं योग्यं भवति । अतः रूपकम् उच्यते । उपरि वर्णितानां काव्यप्रकाराणां ज्ञानं निम्नकोष्ठकानुसारम् अपि सरलतया कर्तुं शक्यते । यथा –



## स्वाध्यायः

**१. अधोलिखितेषु प्रश्नेषु योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) विश्वनाथस्य काव्यलक्षणं किम् ?

(क) काव्यस्यात्मा ध्वनिः । (ख) वाक्यं रसात्मकं काव्यम् ।

(ग) शब्दार्थौ सहितौ काव्यम् । (घ) पदसंघटना रीति : ।

(२) कः कविः वाग्देवतावताररूपेण प्रसिद्धोऽस्ति ?

(क) वामनः (ख) मम्मटः (ग) रुद्रटः (घ) कुन्तकः

(३) 'वक्रोक्तिः काव्यजीवितम्' इति कस्य मतमस्ति ?

(क) कुन्तकस्य (ख) विश्वनाथस्य (ग) जगन्नाथस्य (घ) रुद्रटस्य

(४) 'काव्यम् उपदेशयुजे' भवतीति कः वदति ?

(क) जगन्नाथः (ख) मम्मटः (ग) जयदेवः (घ) दण्डी

(५) मुख्यतया काव्यं कतिविधम् ?

(क) द्विविधम् (ख) चतुर्विधम् (ग) पञ्चविधम् (घ) अष्टविधम्

(६) गद्यपद्ययोः मिश्रणयुक्तं काव्यं किं कथ्यते ?

(क) श्रव्यकाव्यम् (ख) दृश्यकाव्यम् (ग) चम्पूकाव्यम् (घ) खण्डकाव्यम्

(७) "विशिष्टा पदरचना रीतिः" इति कस्य मतम् ?

(क) वामनस्य (ख) जनन्नाथस्य (ग) मम्मटस्य (घ) रुद्रटस्य

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) काव्यविद्या कीदृशी वर्तते ?

(२) मम्मटस्य काव्यलक्षणं किम् ?

(३) काव्यलक्षणविषये जयदेवः किं कथयति ?

(४) ध्वन्यालोकग्रन्थस्य कर्ता कः ?

(५) विश्वनाथस्य काव्यलक्षणं किम् ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) कुन्तकस्य काव्यलक्षणं विस्तरेण विवेचयतु ।

(२) मम्मटस्य काव्यलक्षणं किम् इति वर्णयतु ।

(३) काव्यप्रकारान् कोष्ठकानुसारं लिखन्तु ।

**४. अ-ब योः योग्यसंयोजनं कुरुत ।**

| **अ** | **ब** |
|---|---|
| (१) जयदेवः | (१) काव्यप्रकाशः । |
| (२) मम्मटः | (२) चन्द्रालोकः । |
| (३) विश्वनाथः | (३) काव्यालङ्कारसूत्रम् । |
| (४) दण्डी | (४) साहित्यदर्पणः |
| (५) भामहः | (५) काव्यादर्शः |

**५. टिप्पणी लेख्या ।**

(१) श्रव्यकाव्यम्

(२) दृश्यकाव्यम्

**छात्रप्रवृत्तिः**

- विविधकाव्यविषये- अधिकाऽभ्यासं कुर्वन्तु ।

**शिक्षकप्रवृत्तिः**

- शिक्षकः वर्गखण्डे काव्यमहत्त्वविषये चर्चां करोतु ।

●

# ३ महाकाव्यम्

**प्रस्तावना**

महाकाव्यनिर्माणक्षेत्रे कविः अलौकिकः सिद्ध्यति । तस्य च रचना अलौकिकसृष्टिः । इयं हि कवेः सृष्टिः ब्रह्मणः सृष्ट्यपेक्षया अत्युत्कृष्टा विलक्षणा भवति । कवेः सृष्टिविषये यथोक्तं मम्मटाचार्येण –

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।**

**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥**

अर्थात् काव्यं स्वतन्त्रमानन्दमयं च भवति । नवरसविलक्षणं नियमबन्धनविमुक्तञ्च भवति । तथा सत्यपि महाकाव्यसृष्ट्यर्थं नीतिदर्शकपोषकतत्त्वानां नियमानाञ्च परिपालनम् आवश्यकं भवति । अतोऽत्र आचार्यप्रवरेण कविराजविश्वनाथेन साहित्यदर्पणे महाकाव्यस्य यानि लक्षणानि निर्धारितानि सन्ति, तानि अत्र प्रस्तूयन्ते । यथा–

---

**(1) सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ॥**

**सरलार्थोदाहरणम् –**

सर्गबन्धः परिच्छेदरूपाणां निबन्धनं महाकाव्यं भवति । तस्मिन् महाकाव्ये धीरोदात्तस्य नायकस्य गुणैः युक्तः देवः नायकः भवति ।

यथा – हरचरितमहाकाव्ये ।

**(2) सद्वंशःक्षत्रियो वापि धीरोदात्तः गुणान्वितः ।**

**एकवंशभवा भूपाः कुलजाः बहवोऽपि वा ॥**

**सरलार्थोदाहरणम् –**

महाकाव्ये उत्तमकुलप्रसूतः धीरोदात्तादिगुणान्वितः क्षत्रियः बाहुजः नायकः भवति । यथा– नैषधीयचरिते – नलः ।

अन्यच्च नायकविषये मतान्तराणि सन्ति – एककुलोत्पन्नाः कुलीनाः धीरोदात्तगुणान्विताः नायकाः बहवः स्युः ।

यथा – रघुवंशमहाकाव्ये – दिलीपादयः ।

**(3) शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ।**

**अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ॥**

**सरलार्थोहरणम् –**

महाकाव्ये रसानां मध्ये एकः अन्यतमः रसः प्रधानम् अभिलष्यते । यथा (1) नैषधीयचरिते – शृङ्गारः । (2) शिशुपालवधे – वीरः । (3) प्रबोधचन्द्रोदये – शान्तः अङ्गीरसः । इतरे सर्वेऽपि हास्यादयः रसाः अप्रधानाः भवन्ति । सर्वे मुखप्रतिमुखादयः नाटकसन्धयः भवन्ति ।

**( 4 ) इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ।**

**चत्वारः तस्य वर्गाः स्युः तेष्वेकं च फलं भवेत् ॥**

**सरलार्थोदाहरणम् -**

महाकाव्ये चरित्रम् इतिहासोद्भवम् अर्थात् रामायणमहाभारतादिमूलकम् अथवा शिष्टजनाधारं भवति । तस्य महाकाव्यस्य चत्वारो वर्गाः धर्मार्थकाममोक्षरूपाः भवेयुः, तेषु एकं धर्मादिषु अन्यतमं फलं प्रधानप्रयोजनं स्यात् ।

**( 5 ) आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।**

**क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ॥**

**सरलार्थोदाहरणम् -**

महाकाव्ये आदौ नमस्क्रिया प्रणतिः भवति मंगलार्थम् । यथा रघुवंशे -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

क्वचित् आशीः, शुभाशंसा, वस्तुनिर्देशः, देववाचकशब्दरूपपदार्थप्रदर्शनं, भद्रवाचकशब्दरूपपदार्थप्रदर्शनं वा भवति। यथा - किरातार्जुनीय-कुमारसम्भवादिषु ग्रन्थेषु वयं पठामः । क्वचित् महाकाव्ये दुर्जनादीनां निन्दाविधानं सज्जनानां गुणकीर्तनं दयादाक्षिण्यादिगुणवर्णनं प्राप्यते ।

**( 6 ) एकवृत्तमयैः पद्यैः अवसानेऽन्यवृत्तकैः ।**

**नातिस्वल्पाः नातिदीर्घाः सर्गा अष्टाधिका इह ॥**

**सरलार्थोदाहरणम् -**

महाकाव्ये सर्गेषु श्लोकाः एकस्मिन् छन्दसि भवन्ति । परन्तु सर्गसमाप्तौ भिन्नछन्दसोऽपि उल्लेखः मिलति । यथा रघुवंशे -

इह महाकाव्ये नातिस्वल्पाः नाऽतिन्यूनाः नातिदीर्घाः नातिप्रचुराः अष्टाधिकाः सर्गाः भवन्ति ॥

**( 7 ) नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ।**

**सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ॥**

क्वापि कुत्रापि महाकाव्ये अनेकछन्दसः प्रचुराः श्लोकाः भवन्ति । यथा - (1) किरातार्जुनीये - पञ्चमसर्गः (2) शिशुपालवधे - चतुर्थसर्गः । सर्गान्ते आगामिसर्गस्य कथायाः संकेतोऽपि भवेत् ॥

**( 8 ) सन्ध्यासूर्येन्द्ररजनीप्रदोषध्वान्तवासराः ।**

**प्रातर्मध्याह्नमृगयाशैलर्तुर्वनसागराः ॥**

महाकाव्ये सायंकालः, सूर्यः, इन्दुः, रात्रिः, प्रदोषः रजनीमुखम्, ध्वान्तम् अन्धकारः तथा दिवसाः वर्णिताः स्युः । प्रभातम्, मध्याह्नम्, आखेटक्रीडा, पर्वतः, ऋतुः, वनम् तथा सागरः वर्णितः स्यात् ।

**( 9 ) सम्भोगविप्रलम्भौ च मनुस्वर्गपुराध्वराः ।**

**रणप्रयाणोपयममन्त्रपुत्रोदयादयः ॥**

सम्भोगशृङ्गारः विप्रलम्भशृङ्गारश्च, मुनिः, स्वर्गः, पुरम्, यज्ञः, युद्धम्, यात्रा, विवाहः सामादिविषये कर्तव्यमन्त्रणम्, पुत्रोदयादयश्चापि वर्णितं भवेत् ।

**( 10 )वर्णनीया यथायोग्यं साङ्गोपांङ्गा अमी इह ।**

**कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ॥**

इह अस्मिन् महाकाव्ये पूर्वोक्ताः संध्यादयः अङ्गोपाङ्गसहिताः यथासम्भवं वर्णनीयाः कीर्तनीयाः । यथा– सन्ध्यङ्गं चक्रवाकविरहः, वासराङ्गम् जलक्रीडादि रजन्यङ्गम् मधुपानादि, उपाङ्गम् तत्रैव परिहासादयः मुनिः नारदादि । कवेः कवयितुः, नाम्ना आख्यया, अस्य महाकाव्यस्य नाम कर्तव्यम् । यथा – माघकाव्यम् ।

वृत्तस्य चरित्रस्य नाम – यथा – कुमारसम्भवम् । रघुवंशम् ।

नायकस्य नाम– यथा – (1) नैषधीयचरितम् । (2) विक्रमाङ्कदेवचरितम् ।

वा इतरनायकादितरस्य, प्रतिनायकस्य नाम – यथा – (1) रावणवधम् (2) शिशुपालवधम् ।

**( 11 )नामास्य, सर्गोपादेयकथया सर्गनाम तु ।**

**अस्मिन्नार्षे पुनः सर्गाः भवन्त्याख्यानसंज्ञकाः ॥ [ सा.द. ६/३१५ त ३२५ ]**

अस्य महाकाव्यस्य सर्गनाम सर्गोपादेयकथया तद्वत् सर्गस्य या उपादेयकथा तया सर्गस्य नामकरणं कर्तव्यम् । यथा – रघुवंशे प्रथमसर्गस्य नाम 'वसिष्ठाश्रमगमनम्' इति । अन्यच्च – आर्षे – ऋषिकर्तृके महाकाव्ये सर्गाः आख्यानसंज्ञकाः भवन्ति । आर्षमहाकाव्यम् । यथा – महाभारतम्

**महाकवीनां नामानि**

| क्रमः | महाकवयः | महाकाव्यानि | सर्गाः |
|---|---|---|---|
| (1) | महाकविः कालिदासः | (1) रघुवंशमहाकाव्यम् | 19 |
| | | (2) कुमारसम्भवम् | 17 |
| (2) | महाकविः माघः | शिशुपालवधम् | 20 |
| (3) | महाकविः भारविः | किरातार्जुनीयम् | 18 |
| (4) | महाकविः श्रीहर्षः | नैषधीयचरितम् | 22 |
| (5) | अश्वघोषः | (1) बुद्धचरितम् | 18 |
| | | (2) सौन्दरानन्दः | 19 |
| (6) | रत्नाकरः | हरविजयकाव्यम् | 50 |
| (7) | बिल्हणः | विक्रमाङ्कदेवचरितम् | 18 |
| (8) | कुमारदासः | जानकीहरणम् | 16 |
| (9) | भट्टिः | भट्टिकाव्यम् | 22 |
| (10) | प्रभुदत्तशास्त्री | भारतविजयम् | – |

## स्वाध्यायः

**१. अधोलिखितेषु प्रश्नेषु योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) कस्मिन् महाकाव्ये सुरः नायकः वर्तते ?

(क) रघुवंशमहाकाव्ये (ख) किरातार्जुनीये (ग) बुद्धचरिते (घ) हरचरितमहाकाव्ये

(२) नलः कीदृशः नायकः वर्तते ?

(क) धीरोदात्तः (ख) धीरललितः (ग) धीरोद्धतः (घ) धीरप्रशान्तः

(३) नैषधीयमहाकाव्ये प्रधानरसः कः ?

(क) हास्यरसः (ख) करुणः (ग) शृङ्गारः (घ) वीरः

(४) किरातार्जुनीयमहाकाव्यस्य कस्मिन् सर्गे अनेकछन्दप्रचुराः श्लोकाः सन्ति ?

(क) द्वितीयसर्गे (ख) तृतीयसर्गे (ग) पञ्चमसर्गे (घ) सप्तमसर्गे

(५) आर्षमहाकाव्ये कस्य महाकाव्यस्य गणना वर्तते ?

(क) रामायणस्य (ख) रघुवंशस्य (ग) महाभारतस्य (घ) महाकाव्यस्य

(६) नैषधीयचरिते कतिसर्गाः सन्ति ?

(क) १० (ख) १५ (ग) २२ (घ) १८

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) रघुवंशे दिलीपः कीदृशः नायकः वर्तते ?

(२) 'बाहुजः' शब्दस्य कोऽर्थ ?

(३) शिशुपालवधे प्रधानरसः कोऽस्ति ?

(४) महाकाव्ये कतिसर्गाः भवेयुः ?

(५) महाकाव्यलक्षणानि साहित्यदर्पणस्य कस्मिन् परिच्छेदे सन्ति ?

**३. अधोलिखितप्रश्नानामुत्तराणि विस्तरेण लिखन्तु ।**

(१) कवेर्सृष्टिविषये मम्मटाचार्यः किं कथयति ?

(२) अधोलिखितकारिकाणां सरलोदाहरणपूर्वकं व्याख्या कार्या ।

(क) सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ॥

(ख) इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ।
चत्वारस्तस्य वर्गाः स्युः तेष्वेकं च फलं भवेत् ॥

(ग) आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ॥

**४. अ विभागेन सह ब विभागं संयोजयत ।**

| अ | ब |
|---|---|
| (१) रघुवंशमहाकाव्यम् | (१) भारविः |
| (२) किरातार्जुनीयम् | (२) बिल्हणः |
| (३) विक्रमाङ्कदेवचरितम् | (३) कालिदासः |
| (४) शिशुपालवधम् | (४) कुमारदासः |
| (५) जानकीहरणम् | (५) माघः |

**छात्रप्रवृत्तिः**

- महाकाव्यविषये अधिकं ज्ञानं प्राप्नुवन्तु ।

**शिक्षकप्रवृत्तिः**

- किमपि एकं महाकाव्यम् अधीत्य छात्रेभ्यः सारांशं कथयतु ।

●

# ४ कुमारसम्भवम्

**प्रस्तावना**

महाकविः कालिदासः सरस्वत्याः वरदपुत्रः सुरभारत्याश्च शाश्वतशृङ्गारोऽस्ति । संस्कृतसाहित्याकाशे कविरूपेण, नाटककाररूपेण च कविकुलशिरोमणेः कालिदासस्य नाम सर्वप्रमुखस्थाने पण्डिताः स्वीकुर्वन्ति ।

कविनाऽनेकशृङ्गारहास्यवीरकरुणशान्तादिरसानां प्रयोगे स्वनैपुण्यं प्रदर्शितमस्ति । तेन विरचिताः सप्तग्रन्थाः सन्ति। यथा – (1) ऋतुसंहारम् (2) मेघदूतम् द्वे गीतिकाव्ये स्तः । (3) रघुवंशम् (4) कुमारसम्भवम् द्वौ ग्रन्थौ महाकाव्ये स्तः । (5) मालविकाग्निमित्रम्, (6) विक्रमोर्वशीयम् (7) अभिज्ञानशाकुन्तलम्, त्रयः ग्रन्थाश्च नाटकानि सन्ति।

काव्यसम्पत्तिदृष्ट्या कुमारसम्भवस्य विशिष्टं स्थानम् अस्ति । कुमारसम्भवमहाकाव्ये यद्यपि सप्तदशसर्गाः उपलभ्यन्ते, तथापि आदित अष्टमसर्गपर्यन्ता एव कालिदासविरचिता इति केषाञ्चित् विदुषां सम्मतिः वर्तते । स्वामिकार्तिकेयजन्मसम्बन्धात् काव्यस्यास्य कुमारसम्भवमिति नाम कृतमस्ति । अस्मिन् महाकाव्ये शंकरपार्वतीमदनानां विविधचेष्टानां वर्णने कविः सम्पूर्णशक्तिव्ययं कृतवान् इति अनुभूयते । अत्र नायकः त्रैलोक्यस्य पिताऽस्ति, अपरा नायिका च जगन्माता विद्यते। अस्मिन् पाठे कुमारसम्भवस्य प्रतिसर्गानुसारं यथाशक्यं संक्षेपेण कथावस्तु प्रस्तूयते ।

---

**प्रथमसर्गः**

प्रथमसर्गे प्रथमं हिमालयवर्णनं विद्यते । हिमालयस्य मेनकया सह विवाहः भवति । ततः हिमालयस्य पुत्रस्य मैनाकोत्पत्तिवर्णनं विद्यते । इतः परं पार्वत्याः जन्मवर्णनम्, रूपवर्णनम्, हिमालयगृहे नारदागमनं भवति । नारदकृत – पार्वतीपरमेश्वरयोर्भाविविवाहसूचनम् । ततः हिमालयशिखरे शिवः तपोरतो विद्यते, हिमालयः ब्रह्मादिदेवानामपि पूज्यं सदाशिवं नानाद्रव्यैः यथायोग्यं समर्प्य जय-विजयायसमन्वितां श्रद्धादिगुणयुक्तां स्वकन्यां पार्वतीं महादेवस्य सेवार्थं नियुक्तवान् ।

**द्वितीयसर्गः**

अस्य सर्गस्य प्रारम्भे तारकासुरेण त्रस्ताः इन्द्रादिदेवाः ब्रह्माणं प्रार्थयितुं सत्यलोकं गतवन्तः । तत्र देवाः ब्रह्माणं स्तुवन्ति । ततः ब्रह्मा देवान् तत्राऽऽगमनकारणं पृच्छति । इन्द्रेण प्रेरितः गुरुः बृहस्पतिः तारकासुरोपद्रवं वर्णयति । ब्रह्मदेवः देवान् सम्बोधयन् कथयति, यत् शिवपुत्रहस्तेन तारकासुरस्य वधः भविष्यति । ततः इन्द्रः शिवसुतोत्पत्त्यर्थं मदनं स्मरति।

सर्गान्ते चूतकुसुमबाणं हस्ते संन्यस्य मित्रवसन्तेन सह कामदेवः इन्द्रस्य सम्मुखे उपस्थितो भवति । अस्मिन् सर्गे 1 तः 63 श्लोकपर्यन्तम् अनुष्टुप्वृत्तं वर्तते । 64 तमे श्लोके मालिनीवृत्तं वर्तते । सम्पूर्णसर्गे 64 श्लोकाः सन्ति। ब्रह्मसाक्षात्कारो नाम द्वितीयः सर्गः विद्यते ॥

**तृतीयसर्गः**

सर्गस्यारम्भे इन्द्रमदनयोः वार्तालापः भवति । मनसा पतिरूपेण शिवं प्राप्तुं स्वसखिभ्यां सह आगता उमा शिववन्दनां करोति, अर्चति च । मदनः समित्रपरिग्रहैः सह हराश्रमं प्रति गच्छति । तत्र व्याघ्रचर्मास्तीर्णे देवदारुवृक्षमूलप्रदेशे वेदिकायां समाधिस्थं त्रिलोचनम् अपश्यत् । मदनस्य स्वपरिकरैः सह तत्रागमनात् असमये वसन्तः समागच्छति । अशोकादिवृक्षेषु पुष्पोद्गमः भवति । तत्राश्रमं परितः वसन्तर्तोः शोभा संजाता ।

जितेन्द्रियः त्रिलोचनः जितेन्द्रियत्वात् इन्द्रियविकारं दृढं निवार्य स्वमनोविकारस्य कारणं द्रष्टुमिच्छुः, दिङ्मुखेषु स्वनेत्रं प्रसारितवान् । ततः बाणप्रयोगं कर्तुं तत्परं कामदेवं दृष्ट्वा शिवः तृतीयनेत्रोत्पन्नेन अग्निना भस्मावशिष्टम् अकरोत् । अन्ते पार्वती अपि एतद् दृश्यं दृष्ट्वा शून्यहृदया सखिभ्यां सह भवनं प्रति गच्छति ॥

अस्मिन् सर्गे 76 श्लोकाः सन्ति । अस्य सर्गस्य नाम मदनदहनम् वर्तते ।

**चतुर्थसर्गः**

पतिं भस्मावशेषं दृष्ट्वा रतिः विलपति । स्वदेहत्यागे तत्परां रतिं दृष्ट्वा आकाशवाणी भवति – 'हे सुन्दरि! अवश्यम्भावी प्रियसङ्गमः, स्वकीयं शरीरं सुरक्षितं कुरु' । एवं प्रकारेण आकाशवाणीं तथा वसन्तस्य आश्वासनवचनं श्रुत्वा दुःखेन कृशशरीरा रतिः कामस्य शापावसानसमयं प्रतीक्षितवती । अस्य सर्गस्य नाम रति-विलापः वर्तते । अस्मिन् सर्गे 1 तः 44 श्लोकपर्यन्तं वियोगिनीवृत्तं वर्तते । 45 तमे श्लोके वसन्ततिलका वृत्तं वर्तते । अन्तिमश्लोके पुष्पिताग्रावृत्तं विद्यते । सम्पूर्णसर्गे 46 श्लोकाः सन्ति ।

**पञ्चमसर्गः**

अस्य सर्गस्य प्रारम्भे हताशायाः गिरिजायाः विषादवर्णनम् अस्ति । पशुपतेः प्राप्त्यर्थं तपस्तप्तुं कृतनिश्चयां पार्वतीं माता मेनका निषेधयति । पुनः पितुराज्ञां नीत्वा पार्वती तपस्तप्तुं गौरीशिखरं गच्छति । तत्र तीव्रतपश्चरणं करोति । तपसा सन्तुष्टः शिवः पार्वत्याः परीक्षार्थं स्वयं ब्रह्मचारिवेशं धृत्वा पार्वतीसमीपं गच्छति । तत्र द्वयोः वार्तालापः भवति । ब्रह्मचारिकृतहरनिन्दां श्रुत्वा पार्वती अन्यत्र स्थानं गन्तुं तत्परा भवति । तदैव ब्रह्मचारिवेशधारी शिवः स्वस्वरूपेण आविर्भूय कथयति हे विनीते पार्वति ! अद्यारभ्याहं तव तपोभिः क्रीतो दासोऽहम् । शिवस्य एतत् वचनं श्रुत्वा पार्वती तपोजन्यक्लेशं त्यक्तवती ।

अस्मिन् सर्गे 01 तः 84 पर्यन्तं वंशस्थवृत्तं वर्तते । 85-86 द्वयोः श्लोकयोः वसन्ततिलकावृत्तं वर्तते । सम्पूर्णसर्गे 86 श्लोकाः सन्ति । अस्य सर्गस्य तपोफलोदयः नाम वर्तते ।

**षष्ठसर्गः**

सखीमुखात् पार्वतीसन्देशं श्रुत्वा शंकरः हिमवतः पार्वतीयाचनार्थं मरीच्यादीन् सप्तर्षीन् मनसा स्मृतवान् । शिववचनं स्वीकृत्य सप्तर्षयः ओषधिप्रस्थं नाम हिमवन्नगरम् अगच्छन् । शिवोऽपि पूर्वनिर्दिष्टं महाकोशीप्रपातस्थानं प्राप्तवान्। सप्तर्षीणां वचनं श्रुत्वा हिमालयः महेश्वराय कन्यां दातुं तत्परो भवति । तदा सप्तर्षयः विवाहयोग्यदिनं चतुर्थेऽहनीत्युक्त्वा ततः निर्गत्य निजप्रयाससिद्धं प्रयोजनं तस्मै हराय विज्ञाप्य आकाशमार्गात् गतवन्तः । पार्वतीसमागमोत्सुकः महेश्वरोऽपि त्रीणि दिनानि यथाकथञ्चित् अयापयत् ।

अस्मिन् सर्गे 1 तः 94 पर्यन्तम् अनुष्टुप् वृत्तं विद्यते । 95 तमे श्लोके पुष्पिताग्रावृत्तं वर्तते । सम्पूर्णसर्गे 95 श्लोकाः सन्ति । पार्वतीप्रदानो नाम षष्ठः सर्गः विद्यते ।

**सप्तमसर्गः**

अस्य सर्गस्य प्रारम्भे वधूवरयोर्वैवाहिकवेषवर्णनम् अस्ति । वरयात्रिरूपेण अमराः समुपस्थिताः सन्ति । उमामहेश्वरयोः आनन्दोल्लासेन सह विवाहः सम्पन्नः भवति । देवानां प्रार्थनया प्रसन्नः महादेवः मदनाय पुनःजीवनं ददाति । ततः महेश्वरः इन्द्रादिदेवगणान् स्वस्वस्थानगमनाय आज्ञप्य पार्वत्या सह शयनमन्दिरम् अगच्छत् । पार्वतीपरिणयो नाम सप्तमोऽयं सर्गः ।

अस्मिन् सर्गे आदितः 94 श्लोकपर्यन्तं वंशस्थवृत्तं वर्तते । अन्तिमश्लोके मालिनीवृत्तं विद्यते । सम्पूर्णसर्गे 95 श्लोकाः सन्ति ॥

**अष्टमसर्गः**

अस्मिन् सर्गे कालिदासेन भगवतः शिवस्य तथा भगवत्याः पार्वत्याः वर्णनं कृतम् । नववध्वाः - पार्वत्याः तथा शिवस्य रतिलीलावर्णनकामनया एव कालिदासेन अस्य सर्गस्य कदाचित् रचना कृता वर्तते । अस्मिन् सर्गे सम्भोगशृङ्गारस्य

दर्शनं भवति । शंकर: पार्वत्या सह रात्रिंदिवं मानुषमानेन पञ्चविंशतिवर्षाणि यापयन्नपि सुरतसुखेभ्य: निवृत्ताभिलाषो न जात: । अत्रैव सर्ग: समाप्तिं गच्छति । सर्गस्य नाम उमासुरतवर्णनं विद्यते ।

अस्मिन् सर्गे 01 त: 90 पर्यन्तं रथोद्धतावृत्तं विद्यते । 91 तमे श्लोके मालिनीवृत्तम् अस्ति । सम्पूर्णसर्गे 91 श्लोका: सन्ति ॥

**नवमसर्ग:**

अस्य सर्गस्य प्रारम्भे कपोतरूपं धृत्वा अग्निदेव: सम्भोगक्रीडाभवने प्रविशति क्रोधितं शिवं दृष्ट्वा अग्निदेव: तत्रागमनकारणं वर्णयति । तथा इन्द्रादिदेवानां कष्टवर्णनं करोति । सम्भोगसुखावसरे बाधाकारणात् रुष्टा पार्वती अग्निं शशाप । अग्नि: शिवस्य वीर्यग्रहणं कृत्वा नष्टतेजा: स: विरूप: तत: नि:सृतवान् । महेश्वर: पार्वतीं करे दधान: देवेभ्य: दर्शनं दातुं सम्भोगलीलामन्दिरात् बहि: आगच्छत् । सर्वे देवा: तम् अभिवादयन्ति । कैलासगमनो नाम एष: सर्ग: समाप्तिं गच्छति ।

अस्मिन् सर्गे 01 ता: 51 श्लोक पर्यन्तम् उपजातिवृत्तं विद्यते । 52 तमे श्लोके पुष्पिताग्रावृत्तं विद्यते । सम्पूर्णसर्गे 52 श्लोका: सन्ति ॥

**दशमसर्ग:**

अस्य सर्गस्य प्रारम्भे अग्निदेव: शंकरस्य महावीर्यं वहन् देवसभायां स्थितम् इन्द्रसमीपम् अगच्छत् । तत्र इन्द्र: सन्तप्तम् अग्निदेवं कुत्सिताङ्गस्य कारणं पृच्छति । अग्निदेव: सर्ववृत्तान्तं इन्द्राय विस्तरेण श्रावयति । सम्पूर्णवार्तां श्रुत्वा इन्द्र: तं सान्त्वयन् कथयति, भवान् शिवस्य तेजोमयवीर्यं गङ्गायां स्थापयतु । अग्निदेव: तथैव करोति । गङ्गापि तस्य वीर्यस्य तेज: सोढुम् अक्षमा जाता । तस्मिन्नेव समये स्नानार्थं षड्कृतिका: गङ्गां प्रविशन्ति । तदा हरस्य वीर्यं तासां कृतिकानामभिकलेवरं प्रविष्टवत् । ता: तं गर्भं लज्जया भयेन च शरवणे उत्सृज्य स्वगेहं गतवत्य: । स एव गर्भ: तत्रारण्ये तेजस्वी बालक: जात: । षड्कृतिकाया: गर्भात् जननेन तस्य नाम कार्तिकेय: अभवत् ।

अस्मिन् सर्गे 01 त: 69 पर्यन्तम् अनुष्टुप्वृत्तं वर्तते । 60 तमे श्लोके मन्द्राकान्तावृत्तं विद्यते । आहत्य सर्गे 60 श्लोका: सन्ति इति कुमारजन्म नाम दशमसर्ग: ।

**एकादशसर्ग:**

एकादशसर्गस्य प्रारम्भे इन्द्रादिदेवतानां निवेदनेन भगवती गङ्गा स्त्रीरूपं धृत्वा तस्मै बालकाय स्तनपानं कारितवती। स्तनपानेन तस्य वर्धनं भवति । षड्कृतिका: बालकं सेवन्ते । सुन्दरं बालकं दृष्ट्वा अग्निकृत्तिकागङ्गासु बालकोऽयं ममेति विवाद: भवति । कलहावसरे आकाशमार्गात् तं बालकं दृष्ट्वा पार्वत्या: हृदये वात्सल्यभाव: उत्पन्न: भवति। पार्वती शंकरं पृच्छति कस्य बालोऽयम् अस्य शिशो: जननी का ? अस्य बालकोत्पत्तिविषये सर्वं श्रावयित्वा शङ्कर: वदति उमे अयं वत्स: तवैव सहर्षेण स्वीकरोतु । पार्वती शिशुं प्रेम्णा क्रोडे उत्थापितवती । सर्वे देवा: हर्षिता: । पुत्रस्य मनोहरबालक्रीडा: पश्यन् उमामहेश्वरौ समयं यापयामासतु: । 01 त: 49 श्लोकपर्यन्तम् उपजातिवृत्तं वर्तते । 50 तमे श्लोके हरिणीवृत्तं वर्तते । कार्तिकेयजन्म नाम एष: सर्ग: इति ।

**द्वादशसर्ग:**

सर्गस्य प्रारम्भे इन्द्र: तारकासुरस्य अत्याचारेण त्रस्त: भूत्वा समस्तै: देवै: सह महेश्वरसमीपं गच्छति । तत्र देवानां समस्यां श्रुत्वा महादेव: वदति यत् भवत: कार्यार्थं पुत्रेण सह अहं तत्परोऽस्मि । कार्तिकेयं सेनापतिपदे नियुज्य कार्यसम्पादनं कुर्वन्तु । एवंप्रकारेण शिववचनं श्रुत्वा देवा: प्रसन्नमनस: अभवन् । अस्य सर्गस्य नाम बालाभ्यर्थनं विद्यते।

सर्गेऽस्मिन् 01 त: 56 पर्यन्तम् उपजातिवृत्तं वर्तते । तथा यथाक्रमं 57, 58, 59, 60 श्लोकेषु क्रमश: रथोद्धता, स्वागता, द्रुतविलम्बितं हरिणीवृत्तञ्च विद्यते । अस्मिन् सर्गे 60 श्लोका: सन्ति ।

**त्रयोदशसर्गः**

अस्य सर्गस्य प्रारम्भे कुमारः भक्तिपूर्वकं गिरिजागिरीशौ अभिवन्द्य तयोः आज्ञां स्वीकृत्य इन्द्रादिदेवैः सह स्वर्गं प्रविशति । तत्र उत्साहेन साकं देवाः कुमारस्य देवसेनापतित्वेन अभिषेकं समाचरन्ति । अपारपराक्रमशीलकुमारः देवसेनायाः स्वामित्वं स्वीकृत्य देवान् चिन्तामुक्तं कृतवान् । कुमाराभिषेको नाम एषः सर्गः इति ।

अस्मिन् सर्गे 01 तः 50 पर्यन्तम् उपजातिवृत्तं विद्यते । एवञ्च 51 तमे श्लोके मालिनीवृत्तं वर्तते । आहत्य 51 श्लोकाः सन्ति ।

**चतुर्दशसर्गः**

अस्य सर्गस्यारम्भे कुमारेणोत्साहिताः देवाः तारकासुरं महादैत्यं मारयितुं शस्त्राणि एकत्रीकृत्य युद्धार्थं सज्जाः भवन्ति । धनुर्धरः कुमारोऽपि अप्रतिरुद्धगतिकं विजित्वरं नाम दधानं महान्तं स्यन्दनम् उपविष्टवान् । सम्पूर्णसर्गे सेनाः युद्धार्थं केन उत्साहेन सह गमनं कुर्वन्ति तस्य आलङ्कारिकभाषया वर्णनं विद्यते । सर्गस्य नाम सुरसेनाप्रयाणं वर्तते ।

अस्मिन् सर्गे 01 तः 49 पर्यन्तम् उपजातिवृत्तं विद्यते । 50 तमे श्लोके द्रुतविलम्बितं वृत्तं तथा 51 तमे श्लोके मालिनीवृत्तं वर्तते ।

**पञ्चदशसर्गः**

अस्य सर्गस्यारम्भे दैत्याः कर्णपरम्परया ज्ञातवन्तः यत् कुमारस्य सेनापतित्वे देवसेनाः तारकासुरस्य नगरं प्रति युद्धार्थं प्रस्थितवत्यः । तारकासुरोऽपि सैन्येन सह युद्धाय प्रचलति । तदा अनेकानि अपशकुनानि भवन्ति । प्रथमं द्वयोः वाक्युद्धं प्रचलति, ततः द्वयोः सेनयोः भयङ्करं द्वन्द्वयुद्धं भवति । देवासुरसैन्यवर्णनं नाम एषः सर्गः इति ।

सर्गेऽस्मिन् 01 तः 52 श्लोकपर्यन्तम् उपजातिवृत्तं विद्यते, ततः 53 तमे श्लोके शार्दूलविक्रीडितं वृत्तं वर्तते ॥

**षोडशसर्गः**

अस्मिन् सम्पूर्णसर्गे विस्तरेण देवासुरसंग्रामस्य वर्णनं विद्यते । 01 तः 49 श्लोकपर्यन्तम् अनुष्टुप्वृत्तं विद्यते 50 तमे श्लोके उपजातिवृत्तं वर्तते । अन्तिमश्लोके हरिणीवृत्तं विद्यते । युद्धवर्णनं नाम एषः सर्गः अत्रैव समाप्तो भवति। अस्मिन् सर्गे 51 श्लोकाः सन्तीति ॥

**सप्तदशसर्गः**

सप्तदशसर्गस्य प्रारम्भे युद्धार्थं समुपागतं दैत्यपतिं तारकं दृष्ट्वा इन्द्रादि दिक्पालाः युद्धाय समुपस्थिताः, परस्परं भीषणं युद्धं प्राचलत् । देवाः तारकासुरस्य नागपाशविपन्नाशार्थं कुमारस्य समीपं गतवन्तः । 10 तः 20 श्लोकपर्यन्तं कुमारतारकयोः वाक्युद्धं प्रचलति । अन्ते कुमारः युगान्तदहनाप्रतिमया शक्त्या तम् जघान ।

आकाशात् कुमारस्योपरि पुष्पवृष्टिर्भवति । देवाः तं प्रशंसन्ति । अस्मिन् सर्गे 01 तः 53 श्लोकपर्यन्तं वसन्ततिलकावृत्तं वर्तते । 54 तमे श्लोके पुष्पिताग्रावृत्तं वर्तते । अन्तिमश्लोके मालिनीवृत्तं वर्तते । अस्मिन् सर्गे पञ्चपञ्चाशत् (55) श्लोकाः सन्ति ॥

## स्वाध्यायः

**१. अधोलिखितेषु प्रश्नेषु योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) कालिदासेन विरचिताः कति ग्रन्थाः सन्ति ?

(क) पञ्च (ख) अष्ट (ग) सप्त (घ) दश

(२) कुमारसम्भवं कीदृशं काव्यम् अस्ति ?

(क) खण्डकाव्यम् (ख) महाकाव्यम् (ग) चम्पूकाव्यम् (घ) गीतिकाव्यम्

(३) कुमारसम्भवे कति सर्गाः सन्ति ?

(क) अष्ट (ख) दश (ग) सप्तदश (घ) पञ्चदश

(४) द्वितीयसर्गे कति श्लोकाः सन्ति ?

(क) चत्वारिंशत् (ख) द्विपञ्चाशत् (ग) चतुर्षष्टिः (घ) षष्टिः

(५) रतिविलापवर्णनं कस्मिन् सर्गे वर्तते ?

(क) चतुर्थ (ख) पञ्चम (ग) षोडश (घ) सप्तदश

(६) कस्मिन् सम्पूर्णसर्गे देवासुरसंग्रामवर्णनं विद्यते ?

(क) अष्टम (ख) द्वादश (ग) षोडश (घ) दशम

(७) कपोतरूपं कः धरति ?

(क) अग्निदेवः (ख) इन्द्रदेवः (ग) वरुणदेवः (घ) वायुदेवः

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) हिमालयस्य पुत्रनाम किम् ?

(२) तपस्तप्तुं पार्वती कुत्र गच्छति ?

(३) "तपोभिः क्रीतः दासोऽहम्" कः वदति ?

(४) नवमसर्गस्य नाम किम् ?

(५) कार्तिकेयस्य जन्मवर्णनं कस्मिन् सर्गे अस्ति ?

**३. अधोलिखितप्रश्नानामुत्तराणि विस्तरेण लिखन्तु ।**

(१) प्रथमसर्गस्य कथासारं लिखत ।

(२) तृतीयसर्गस्य कथावर्णनं संक्षेपेण कुरुत ।

(३) कालिदासस्य संक्षेपेण परिचयं प्रयच्छत ।

**४.	अ विभागेन सह ब विभागं सम्यक् संयोजयन्तु ।**

| 'अ' सर्गेषु | 'ब' श्लोकाः |
|---|---|
| (१) द्वितीयसर्गः | (१) 86 |
| (२) पञ्चमसर्गः | (२) 64 |
| (३) दशमसर्गः | (३) 50 |
| (४) एकादशसर्गः | (४) 60 |
| (५) पञ्चदशसर्गः | (५) 55 |
| (६) सप्तदशसर्गः | (६) 53 |

**५.	अधोलिखितधातुरूपाणां परिचयो देयः ।**

अनुभूयते, नियुक्तवान्, विद्यते, शशाप, अगच्छन् ।

**छात्रप्रवृत्तिः**

- पद्यसाहित्यपठने अभ्यासं कुर्वन्तु ।

**शिक्षकप्रवृत्तिः**

- कालिदासस्य अन्यग्रन्थानां परिचयः कारणीयः ।

●

# ५ कुमारसम्भवान्तर्गतश्लोकाः

**प्रस्तावना**

संस्कृतसाहित्याकाशे कविवर कालिदासः सूर्यवत् प्रकाशते । तेन स्वरचनया संस्कृतभाषायाः अद्वितीया सेवा कृतास्ति।

प्रस्तुतपाठे कालिदास-विरचित-कुमाररसम्भव नामक-महाकाव्यस्य केचन श्लोकाः समुद्धृताः सन्ति ।

---

**( 1 ) श्लोकः**

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।**

**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥**

**अन्वयः-** उत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः पूर्वापरौ तोयनिधी वगाह्य पृथिव्याः मानदण्डः इव स्थितोऽस्ति ।

**व्याख्या-** उत्तरस्याम् - उदीच्याम्, दिशि - काष्ठायाम् देवतात्मा - देवतास्वरूपः, हिमालयो नाम - हिमालयः इति प्रसिद्धः, नगाधिराजः - गिरिराजः, पूर्वापरौ - पूर्वपश्चिमौ, तोयनिधी - सागरौ, वगाह्य - व्याप्य, पृथिव्याः - अवनेः, मानदण्ड इव - परिच्छेदकदण्डवत् स्थितः - अवस्थितः, अस्ति- विद्यते ।

**सरलार्थः-** भारतस्य उत्तरदिग्भागे देवतास्वरूपः हिमालयः इति नाम्ना प्रसिद्धः, शैलानाम् अधिपः, पूर्वसागरात् आरभ्य पश्चिमसागरपर्यन्तं मापकदण्ड इव स्थितः विद्यते ॥

**( 2 ) श्लोकः**

**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।**

**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥**

**अन्वयः-** अनन्तरत्नप्रभवस्य यस्य हिमं सौभाग्यविलोपि न जातम् । हि गुणसन्निपाते एकः दोषः किरणेषु अङ्क इव निमज्जति ॥

**व्याख्या-** अनन्तरत्नप्रभवस्य - अपरिमितरत्नादिश्रेष्ठवस्तुजनकस्य, यस्य - हिमालयस्य, हिमम्- तुहिनम्, सौभाग्यविलोपि - सौन्दर्यविघातकम्, न जातम् - नाभवत् । हि - यतः गुणसन्निपाते गुणसमूहे, एकः दोषः - दूषणम्, इन्दोः - चन्द्रमसः किरणेषु - मयूखेषु, अङ्क इव - कलङ्क इव, निमज्जति - तिरोभवति॥

सरलार्थः- तुषारः अपरिमितरत्नानामाकरस्य हिमवतः सौन्दर्यनाशको नाभूत्, यथा चन्द्रमसः किरणेषु कलङ्कः तिरोभवति तथैव गुणसमुदाये एको दोषोऽपि अन्तर्लीयते ॥

**( 3 ) श्लोकः**

**तां पार्वतीत्याभिजनेन नाम्ना, बन्धुप्रियां बन्धुजनो जुहाव ।**

**उमेति मात्रा तपसो निषिद्धा, पश्चादुमाख्यां सुमुखी जगाम ॥**

**अन्वय :-** बन्धुप्रियां तां बन्धुजनः आभिजनेन नाम्ना पार्वती इति जुहाव पश्चात् मात्रा उमा इति तपसः निषिद्धा सुमुखी उमाख्यां जगाम ।

**व्याख्या-** बन्धुप्रियाम् - आत्मीयजनवल्लभाम्, ताम् - बालिकाम्, बन्धुजनः - पित्रादिस्वजनः, आभिजनेन - पित्रादि पूर्वबान्धवेन, नाम्ना - अभिधानेन, पार्वती - गिरिजा इति, जुहाव - आहूतवान्, पश्चात् - अनन्तरम्, मात्रा - जनन्या, उ - हे वत्से, मा - तपः मा कुरु इति - इत्थम्, तपसः - तपश्चर्यायाः, निषिद्धा - निवारिता सती, सुमुखी - शोभनानना, उमाख्याम् - उमाभिधाम्, जगाम - प्राप्तवती ।।

**सरलार्थः-** पित्रादिपूर्वबान्धवाः तां पूर्वजसम्बन्धद्योतकेन नामधेयेन पार्वती इति आहूतवान्, पश्चात् जनन्या अये मा कुरु इति तपश्चरणाद् निषिद्धा सती सा सुवदना उमा इत्यभिधानम् प्राप्तवती ।

**( 4 ) श्लोकः**

**त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः ।**

**वेद्यं च वेदिता चाऽसि ध्याता ध्येयं च यत्परम् ॥**

**अन्वयः-** शाश्वतः त्वम् एव हव्यं होता च असि, भोज्यं भोक्ता च असि, वेद्यं वेदिता च असि, ध्याता यच्च परं ध्येयं तच्च असि ।

**व्याख्या-** शाश्वतः – सनातनः त्वमेव – भवानेव, हव्यम् – पुरोडाशादिकम् , होमसाधनं वा, होता च – हवनकर्ता यजमानश्च असि, भोज्यम् – भक्ष्यम्, अन्नादिकम्, भोक्ता च – भक्षणकर्ता च असि, वेद्यम् – ज्ञेयम् , वेदिता च – ज्ञाता च असि, ध्याता – ध्यानकर्ता, यच्चपरं – उत्कृष्टं वस्तु, ध्येयम् – ध्यानयोग्यं तच्च असि ॥

**सरलार्थः-** हे ब्रह्मन् ! त्वमेव नित्यः पुरोडाशादिकं होमसाधनं यजमानश्चासि, त्वमेव यज्ञफलभूतस्वार्गादिरूपस्तद् भोक्ता असि, त्वमेव प्रपञ्चः प्रपञ्चसाक्षी चासि, त्वमेव उपासकः उपास्यश्चासीति ॥

**( 5 ) श्लोकः**

**तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।**

**मोक्ष्यते सुरवन्दीनां वेणीवीर्यविभूतिभिः ॥**

**अन्वयः-** तस्य शितिकण्ठस्य आत्मा वः सैनापत्यमुपेत्य वीर्यविभूतिभिः सुरवन्दीनां वेणीः मोक्ष्यते ॥

**व्याख्या-** तस्य – जगत्प्रद्धिस्य, शितिकण्ठस्य – शङ्करस्य, आत्मा – पुत्रः, वः – युष्माकम्, सैनापत्यम् – सेनापतित्वम्, उपेत्य – प्राप्य, विभूतिभिः –पराक्रमैश्वर्यैः, सुरवन्दीनाम् – देवाङ्गनानाम्, वेणीः – प्रवेणी, मोक्ष्यते – विस्त्रंसयिस्यति ।

**सरलार्थः-** तस्य शिवस्यात्मजो भवतां सेनापतिर्भूत्वा स्वप्रबलपराक्रमेण तारकासुरेण बलादपहृत्य वन्दीकृतानां देवाङ्गनानां कचान् विश्लेषयिष्यति ॥

**( 6 ) श्लोकः**

**तस्मिन् सुराणां विजयाभ्युपाये तदेव नामास्त्रगतिः कृती त्वम्।**

**अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥**

**अन्वयः-** सुराणां विजयाभ्युपाये तस्मिन् अस्त्रगतिः तव एव नाम, अतः त्वं कृती । हि अप्रसिद्धमपि अनन्तसाधारणम् एव कर्म पुंसां यशसे भवति ।

**व्याख्या-** सुराणाम् – देवानाम्, विजयाभ्युपाये – जयस्योपायभूते, तस्मिन् – हरे, अस्त्रगतिः – अस्त्रप्रसरः, तव एव नाम – तवैव बाणानां गतिः सम्भाविता, अतः – एतस्मात् कारणात् त्वम् – मदनः, कृती – कृतार्थः । हि – यतः अप्रसिद्धम् – अत्यसिद्धम् अपि, अनन्तसाधारणम् – अनन्याशक्यम्, एव कर्म – कार्यम्, पुंसाम् – पुरुषाणाम्, यशसे – कीर्तये भवति ।

**सरलार्थः-** देवानां विजयसाधनभूताः शङ्करस्य चित्ताकर्षणे तवैव बाणाः समर्थाः भवितुं शक्नुवन्ति । अतस्त्वं धन्यवादपात्रोऽसि । यतो हि अत्यसिद्धमपि अनन्यसाधारणम् एव कर्म पुरुषाणां यशसे भवतीति ।

( ७ ) श्लोकः

**क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।**

**तावत् स वह्निर्भवनेत्रजन्मा भस्माऽवशेषं मदनं चकार ॥**

**अन्वयः-** प्रभो ! क्रोधं संहर संहर इति मरुतां गिरः खे यावत् चरन्ति, तावत् भवनेत्रजन्मा स वह्निः मदनं भस्माऽवशेषं चकार ।

**व्याख्या-** प्रभो - हे स्वामिन्, क्रोधम् - कोपम्, संहर संहर - निवर्तय निवर्तय । इति - एवम्, मरुताम् - देवानाम्, गिरः - वाचः खे - व्योम्नि, यावत् - यत्कालम्, चरन्ति - प्रवर्तन्ते, तावत् - तत्कालम् एव, भवनेत्रजन्मा - हरनयनोद्भवः स वह्निः - अग्निः मदनम् - कामदेवम्, भस्माऽवशेषम् - भस्मावशिष्टम् चकार - कृतवान् ।

**सरलार्थः-** हे त्रैलोक्याधिपते हर ! त्वं कोपं निवर्तय, परावर्तय एवं प्रार्थनां कुर्वाणाः स्वार्थसिद्धये हरसमीपे प्राप्तानां देवानां वाचो व्योम्नि यावत् प्रवर्तन्ते, तावदेव शिवनेत्रोत्पन्नोऽग्निः कामं भस्मावशिष्टं कृतवान् ॥

( ८ ) श्लोकः

**क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया ।**

**सममेव गतोऽस्य तर्कितां गतिमङ्गेन च जीवितेन च ॥**

**अन्वयः-** परलोकान्तरितस्य ते मया अन्त्यमण्डनं कथं क्रियताम्, अङ्गेन जीवितेन च समम् एव अतर्कितां गतिम् गतः असि ।

**व्याख्या-** परलोकान्तरितस्य - भस्मीभूतस्य, मृतस्य वा, ते - तव, मया - रत्या, अन्त्यमण्डनम् - अन्त्यश्रृङ्गारं, कथम् - केन प्रकारेण, क्रियताम् - विधीयताम्, यतस्त्वं अङ्गेन - शरीरेण, जीवितेन च - प्राणेन च समम् - साकम्, एव अतर्कितां गतिम् - अविचारितां गतिम्, गतः असि - प्राप्तोऽसि ।।

**सरलार्थः-** भस्मीभूतस्य तव शरीरस्य अन्त्यशृङ्गारं कथं कर्तुं शक्नोमि ? अहं न जानामि, यतः त्वं शरीरेण प्राणेन च साकम् अविचारितां गतिं प्राप्तोऽसि । इह मृतशरीरमपि नास्तीति ॥

( ९ ) श्लोकः

**अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते ।**

**अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥**

**अन्वयः-** क्रियार्थं समित्कुशं सुलभम् अपि ? जलानि ते स्नानविधिक्षमाणि अपि ? स्वशक्त्या तपसि प्रवर्तसे अपि ? खलु शरीरम् आद्यं धर्मसाधनम् अस्ति ।

**व्याख्या-** क्रियार्थम् - होमादिकर्मानुष्ठानार्थम्, समित्कुशम् - काष्ठकुशादिहवनद्रव्यम्, सुलभम् - सरलतया प्राप्यते किम् ? अपि - अत्र प्रश्नार्थे प्रयोगः, जलानि - आपः, ते - तव, स्नानविधिक्षमाणि - स्नानक्रियायोग्यानि, अपि -किम् ? स्वशक्त्या - स्वसामर्थ्यानुसारेण, तपसि - तपःक्रियायाम्, प्रवर्तसे अपि - प्रवृत्ता भवसि? खलु - यस्मात् हेतोः, शरीरम् - देहम्, आद्यम् - प्रथमम्, धर्मसाधनम् - सुकृतोपकरणम् अस्तीति ॥

**सरलार्थः-** तव तपोवने होमाद्यङ्गभूतानि समित्कुशादीनि सुलभानि किम् ? तवाश्रमे वर्तमानानि जलानि स्नानविधियोग्यानि बहूनि निर्मलानि च किम् ? आत्मशक्त्यनुसारेण तपसि प्रवर्तसे किम् ? समिधादिधर्मसाधनेषु प्रधानं धर्मसाधनं शरीरमेवास्तीति ॥

( 10 ) **श्लोकः**

**जगत्त्रयीनन्दन एष वीरः प्रवीरमातुस्तवनन्दनोऽस्ति ।**

**कल्याणि कल्याणकरः सुराणां त्वत्तोऽपरस्याः कथमेष सर्गः ॥**

**अन्वयः**:- जगत्त्रयीनन्दनः वीरः एषः प्रवीरमातुः तव नन्दनः अस्ति, सुराणाम् कल्याणकरः एषः सर्गः त्वत्तः अपरस्याः कथं स्यात् ।

**व्याख्या**- कल्याणि - हे प्रिये, जगत्त्रयीनन्दनः - त्रिलोकानन्दकारकः, वीरः - पराक्रमी, एषः - शिशुः, प्रवीरमातुः - प्रकृष्टवीरजनन्याः, तव -भवत्याः, पुत्रः - नन्दनः, अस्ति - वर्तते । सुराणाम् - देवानाम्, कल्याणकरः - हितचिन्तकः, एषः सर्गः - सृष्टिः, त्वत्तः अपरस्याः - त्वदन्यस्याः स्त्रियाः कथं (स्यात्) - केन प्रकारेण स्यात् ।

**सरलार्थः**:- हे प्रिये भवती एव जगत्त्रयानन्दकारकस्य अस्य वीरशिशोः वीरमाता । अर्थात् एषः पुरोदृश्यमानः बालकः तव पुत्रोऽस्ति । देवानां कल्याणकरस्य शिशोः सृष्टिः त्वत्तः अपरस्याः स्त्रियाः केन प्रकारेण भवितुं शक्नोति।

## स्वाध्यायः

१. **प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) पृथिव्याः मानदण्डः इव कः ?

(क) गोवर्धनः (ख) कैलाशः (ग) हिमालयः (घ) मैनाकः

(२) पर्वतानां राजा कोऽस्ति ?

(क) विन्ध्याचलः (ख) हिमालयः (ग) सुमेरुः (घ) मन्दराचलः

(३) वंशागतनाम्ना का प्रसिद्धा ?

(क) अपर्णा (ख) पार्वती (ग) उमा (घ) दुर्गा

(४) सौभाग्यविलोपि कः न जातः ?

(क) तुषारः (ख) हिमः (ग) देवदारुवृक्षः (घ) रत्नम्

(५) हव्यम् किम् ?

(क) ब्रह्मा (ख) शिवः (ग) यजमानः (घ) ऋत्विक्

(६) शितिकण्ठः कः ?

(क) इन्द्रः (ख) ब्रह्मा (ग) शिवः (घ) विष्णुः

(७) देवतानां विजयार्थं साधनभूताः के सन्ति?

(क) कामबाणाः (ख) इन्द्रस्य वज्रः (ग) शिवगणाः (घ) पिनाकः

(८) प्रभो क्रोधं संहर संहरेति के वदन्ति ?

(क) मरुतः (ख) देवाः (ग) शिवगणाः (घ) यक्षाः

(९) वीरमाता का ?

(क) पार्वती (ख) कृत्तिका (ग) अम्बिका (घ) गङ्गा

(10) अतर्कितां गतिं कः प्राप्तः ?

(क) मदनः (ख) नन्दिः (ग) रतिः (घ) वृषभः

२. **अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) कुमारसंभवस्य रचयिता कः ?

(२) हिमालयः भारतस्य कस्यां दिशि वर्तते ?

(३) दोषः केन अन्तर्लीयते ?

(४) भवनेत्रजन्मा कः ?

(५) रतिः अन्त्यमण्डनं कस्य कर्तुम् इच्छति ?

३. **अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) शरीरमाद्यं खलु धर्मसाधनम् ।

(२) अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ।

(३) उपमा कालिदासस्य ।

४. **अधोलिखितप्रश्नानाम् उत्तराणि पञ्चषट्वाक्यैः प्रयच्छत ।**

(१) हिमालयस्य वर्णनं कुरुत ।

(२) ब्रह्मणः सर्वात्मकत्वं श्लोकाधारेण लिखत ।

(३) रतिविलापं श्लोकाधारेण लिखत ।

५. **अधोलिखितश्लोकानां पूर्तिः करणीया ।**

(१) अनन्तरत्न .............................. किरणेष्विवाङ्कः ॥

(२) त्वमेव हव्यं .............................. ध्येयं च यत्परम् ॥

(३) जगत्त्रयीनन्दन .............................. कथमेष सर्गः ॥

**छात्रप्रवृत्तिः**

- कुमारसम्भवस्य प्रसिद्धान् श्लोकान् कण्ठस्थं कुर्युः ।

**शिक्षकप्रवृत्तिः**

- संस्कृतसाहित्ये 'कुमारसम्भवम्' महाकाव्यस्य स्थानविषये छात्रेभ्यो बोधः प्रदातव्यः ।

●

# ६ रघुवंशम्

**प्रस्तावना**

**स विश्ववन्द्यो महतां कवीनां गुरुर्मनीषी कविकालिदासः ।**

**यत्काव्यपीयूषरसप्रवाहः स्वादामितानन्दमयो हि लोकः ॥**

महाकविकालिदासः अस्माकं राष्ट्रीयकविः तथा च भारतीयसंस्कृतेः प्रमुखः परिपोषकः आसीत्। कालिदासकृतिषु पदलालित्यम्, रचनाचातुर्यम्, कल्पनाशक्तिः, प्रकृतिवर्णनम्, चरित्र-चित्रणम् इत्यादि सुचारुरूपेण निहितमस्ति । तासु कृतिषु विचारगाम्भीर्यं, संसारानुभवः, बहुमूल्यसिद्धान्ताः इत्यादिकं सर्वं प्रेरयति अस्मान् । कविना (1) रघुवंशम् (2) कुमारसम्भवम् (3) अभिज्ञानशाकुन्तलम् (4) विक्रमोर्वशीयम् (5) मालविकाग्निमित्रम् (6) मेघदूतम् (7) ऋतुसंहारम् च विरचितमस्ति।

तत्र 'रघुवंशमहाकाव्यम्' कालिदासस्य सर्वाधिका प्रौढा काव्यकृतिः वर्तते । कुमारसम्भवस्य तुलनायां रघुवंशस्य फलकं विस्तीर्णतरमस्ति । अत्र कविना नानाविधघटनाप्रसङ्गाणां वज्रसमुत्कीर्णमणयः एकस्मिन् सूत्रे ग्रथिताः सन्ति । अत्र दिलीपादि उदात्तचरित्रनृपाणाम् आख्यानमस्ति । तेषु मर्यादापुरुषोत्तमरामस्य जीवनं प्रेरणादायकमस्ति । अत्र विलासिनृपस्य-अग्निवर्णस्यापि चरित्र-चित्रणमपि वर्तते । वयमत्र रघुवंशमहाकाव्यविषये किञ्चित् पठिष्यामः ।

---

**रघुवंशकथानकम्**

रघुवंशे महाकाव्यस्य सर्वाणि लक्षणानि उपलभ्यन्ते । अस्य १९ सर्गेषु महाकविकालिदासेन इक्ष्वाकुवंशीय महाप्रतापिनृपात् दिलीपात् अग्निवर्णपर्यन्तभूपानाम् आदर्शपूर्णं जीवनं वर्णितं वर्तते । महाकाव्यस्यास्य कथावस्तु वाल्मीकिरामायणात्, महाभारतात्, पद्मादिपुराणेभ्यः च उद्धृतमस्ति । तथापि वाल्मीकिरामायणेन सह अधिकं साम्यं दृश्यते । अत्र कविना वाल्मीकिरामायणतः पृथक् वंशक्रमः प्रदर्शितः वर्तते । वाल्मीकिरामायणस्य आदिकाण्डस्य सर्गः ७० (सप्ततिः) श्लोक १९ तः ४३ अनुसारं दिलीपात् रामपर्यन्तं १८ भूपतीनां निर्देशः प्राप्यते । किन्तु रघुवंशे दिलीपात् रामपर्यन्तं 5 (पञ्च) (१) दिलीप (२) रघु (३) अज (४) दशरथ (५) रामादिनृपाणां चरित्रचित्रणं कृतमस्ति ।

## प्रतिसर्गानुसारं कथावस्तु

**प्रथमसर्गः**

अस्य महाकाव्यस्यारम्भः 'वाक्' शब्दात् भवति । प्रारम्भे कविना 'जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ' इति नमस्कारात्मकं मङ्गलाचरणं कृतमस्ति । अनन्तरं सूर्यवंशीयनृपाणां विनयपूर्णं वर्णनं कृतमस्ति । मनुवंशसम्भवात् दिलीपात् काव्यस्यारम्भः भवति । दिलीपस्य सुदक्षिणा नाम भार्या आसीत् । सर्वप्रकारकं सुखं तस्य जीवने राज्ये चासीत् । किन्तु सन्तानरहितत्वं दुःखदम् आसीत् । एकदा सः सुदक्षिणया सह रथमारुह्य गुरोः वसिष्ठस्याश्रमं गच्छति ।

मार्गे प्रकृतिः ग्रामजनाश्च तयोः स्वागतं कुर्वन्ति । अत्र कविना प्रकृतेः सुन्दरं वर्णनं कृतं वर्तते । सायंकाले सः ऋषेः आश्रममागच्छति । आश्रमस्यापि लघु वर्णनं दृश्यते । ऋषिं प्रणम्य सः स्वापदं निवेदयति । ऋषिणा राज्ञः दुःखमवज्ञातं कथितञ्च - पुरा त्वया सुरभेः अपराधः कृतोऽस्ति । अतः तव सन्ततिः न विद्यते । तत् दोषनिवारणार्थं ममाश्रमे तस्याः पुत्री नन्दिनी प्रतिवसति तस्याः त्वं सेवां कुरू तेन अवश्यं पुत्रप्राप्तिः ते भविष्यति । तस्मिन्नेव काले नन्दिनी वनात् समागच्छति । ऋषिः एनं शुभसङ्केतं मत्वा तस्मिन् एव काले पत्न्या सह त्वं नन्दिनीं परिचर इत्याज्ञापयति। दिलीपः कुलगुरुवसिष्ठस्य आज्ञां स्वीकृत्य नन्दिन्याः शुश्रुषां करोति ।

**द्वितीयसर्गः**

द्वितीयदिने प्रातःकाले नृपः पीतप्रतिबद्धवत्सां नन्दिनीं मुमोच । ततः सः तां वनं नेतुं तत्परोऽभवत् । तदा सुदक्षिणा गन्धपुष्पमाल्यादिभिः नन्दिन्याः पूजां करोति । अनन्तरं दिलीपः तया सह वनं गच्छति । दिवसपर्यन्तं सः वनोपवने नन्दिनीम् अनुगच्छति सायञ्च पुनः गृहं प्रतिनिवर्तते । सुदक्षिणा तस्याः स्वागतं करोति । तौ नन्दिन्याः सेवां कुरुतः। रात्रौ च शयनं कुरुतः । एवम् एकविंशतिदिवसाः व्यतीताः भवन्ति ।

अन्यतमे दिने राज्ञः निष्ठां परीक्षितुं नन्दिनी भागीरथ्याः गुहां प्रविशति । पृष्ठे गच्छन् नृपः हिमालस्य सौन्दर्यं पश्यति । तदा सिंहः नन्दिनीम् आक्रमते । नन्दिनी रक्षणाय नृपम् आह्वयति । नृपः शस्त्रप्रहाराय उद्यतः भवति । किन्तु तस्य हस्तः स्तम्भितः भवति । सिंहनृपयोः संवादः भवति – नन्दिनीं मुक्त्वा मां भक्षय इति निवेदनान्ते सिंहः सम्मतः भवति । दिलीपः शस्त्राणि परित्यज्य सिंहसमीपं गच्छति । सः तस्य पुरतः स्वशरीरं प्रस्थापयति । तदा गगनात् पुष्पवृष्टिः भवति । धेन्वा कथितम् 'उत्तिष्ठ वत्स' । भूपः उत्तिष्ठति सर्वतः पश्यति । विहाय धेनुं न कोऽपि तत्र दृश्यते । नन्दिन्या कथितं 'मया ते परीक्षा कृता' । मयैव मायया सिंहसर्जनं कृतमासीत् इत्युक्त्वा सा नृपाय पुत्रप्राप्तये वरं यच्छति । नृपः आश्रमं प्रत्यागत्य गुरुं वशिष्ठं सर्वं वृत्तान्तं निवेदयति तेषाम् आशिषः स्वीकृत्य स्वनगरं गच्छति। अल्पीयसा कालेनैव सुदक्षिणा गर्भं धारयति ।

**तृतीयसर्गः**

सर्गस्यास्यारम्भे सगर्भायाः सुदक्षिणायाः वर्णनं वर्तते । सर्वशोभने काले उचितग्रहदशायां सा पुत्ररत्नमजीजनत् । पितृभ्यां लघि धातोः गमनार्थं विज्ञाय तस्य 'रघु' इति नाम कृतम् । एवं कुमारः शत्रूणां सर्वविद्यानाञ्च पारं गमिष्यति। अल्पकालेनैव सः सर्वविद्यासु पारङ्गतः अभवत् । तस्य विवाहः सञ्जातः । राज्ञा सः युवराजपदे नियुक्तः । अनन्तरं राज्ञा दिलीपेन नवनवतिवारं अश्वमेधयज्ञाः कृताः । अन्तिमे यज्ञे इन्द्रः समागत्य यज्ञहयम् अहरत् । दिलीपेन नन्दिन्या प्रदत्तया दिव्यदृष्ट्या इन्द्रः अवलोकितः । रघुणा इन्द्रेण सह युद्धं कृतम् । इन्द्रस्य वज्रप्रहारं सोढुमर्हं रघुं पश्यन् इन्द्रः प्रसन्नः भवति । वरं दत्वा इन्द्रः स्वर्गं गच्छति । अत्र दिलीपः सर्वं वृत्तान्तं श्रुत्वा प्रसन्नः भवति । तस्मै राज्यशासनं प्रदाय दिलीपः सुदक्षिणया सह वानप्रस्थाश्रममङ्गीकृत्य वनं गच्छति ।

**चतुर्थसर्गः**

आदर्शराजा एकदा शरद्काले दिग्विजयाय प्रस्थानं करोति । सर्वप्रदेशान् विजित्य धनपुञ्जमादाय स्वराजधानीम् आगच्छति । विश्वजित् नाम्नि अध्वरे स्वकीयं विजितञ्च सर्वं धनं विप्रेभ्यः दक्षिणायां प्रददाति । सर्गेऽस्मिन् कृते दिग्विजयवर्णने कालिदासस्य इतिहासस्य भूगोलस्य च ज्ञानमपूर्वं दृश्यते।

**पञ्चमसर्गः**

पञ्चमसर्गे रघु-कौत्सयोः प्रसङ्गः वर्तते । वरतन्तोः शिष्यः कौत्सः गुरुदक्षिणार्थं रघोः समीपं गच्छति । किन्तु रघुं मृत्पात्रे सन्ध्यावदनं कुर्वाणं पश्यन् कौत्सः आश्चर्यमनुभवति । अन्ते कौत्सस्य मनीषां ज्ञात्वा रघुः कुबेरस्योपरि आक्रमणं करोति । किन्तु भीतः कुबेरः रात्रौ एव रघोः धनागारे धनवृष्टिं करोति । रघुः तत् सर्वं धनं कौत्साय समर्पयति । कौत्सोऽपि तस्मात् धनात् आवश्यकमेव धनं स्वीकृत्य धनं गुरवे निवेदयति ।

कौत्साशिषा रघोः गृहे पुत्रजन्म भवति । तस्य नाम 'अज' इति स्थापितम्। युवा अजः विदर्भनरेशस्य भगिन्याः इन्दुमत्याः स्वयंवरे गच्छति । मार्गे शापवशात् गजदेहं प्राप्तस्य गन्धर्वस्य उद्धारं करोति । ततः तस्मात् सम्मोहनास्त्रं प्राप्य विदर्भं गच्छति । तत्र तस्य स्वागतं भवति ।

**षष्ठसर्गः**

सर्गेऽस्मिन् इन्दुमत्याः स्वयंवरस्य सुप्रसिद्धं मनोरमं च वर्णनं कविना कृतमस्ति । स्वयंवरस्य मण्डपशोभा, स्वयंवरस्य

सज्जता, वरमालया सह स्वयंवरस्य मण्डपमागतायाः सुनन्दासमविन्तायाः इन्दुमत्याः वर्णनं कवेः अनुपमवर्णनकलायाः उदाहरणरूपं वर्तते । सुनन्दया कृतं नानाविधनृपाणां पराक्रमवर्णनमद्‌भुतं सरसं च वर्तते । अन्ते इन्दुमती अजाय वरमाल्यमपर्यति।

**सप्तमसर्गः**

अज-इन्दुमत्योः विवाहः भवति । विवाहान्ते स्वरक्षकैः सह अजः अयोध्यां प्रति प्रस्थानं करोति । मार्गे स्वयंवरे भग्नमनोरथाः नृपाः अजेन सह युद्धं कुर्वन्ति । संमोहनास्त्रप्रयोगेन अजः तान् पराभूय अयोध्यां प्रत्यागच्छत् । ततः महाराजः रघुः अजं नृपत्वे नियुज्य वानप्रस्थं स्वीकरोति ।

**अष्टमसर्गः**

प्रारम्भे कविना राघव-अजस्य वानप्रस्थाश्रयिणः रघोः च प्रवृत्तीनां तुलनात्मकं वर्णनं कृतमस्ति । अनेकवर्षान्ते रघोः देहविलयो भवति । इन्दुमती 'दशरथ' नामाख्यं पुत्रं जनयति । एकदा अजः उद्याने इन्दुमत्या सह क्रीडां करोति स्म। तदा नारदमुनेः वीणास्था एका पुष्पमाला इन्दुमत्याः वक्षःस्थलोपरि पतति । तेन सा निष्प्राणा सती भूमौ पतति। अनेन शोकाकुलः अजः करुणापूर्णं विलापं करोति । एतत् करुणरसपूर्णं वर्णनं संस्कृतसाहित्ये अतीव प्रसिद्धमस्ति ततः गुरुः वसिष्ठः सन्देशं प्रेषयति । अजः शान्तः भवति । तदनन्तरं अष्टवर्षान्ते अजः पञ्चत्वं गच्छति ।

**नवमसर्गः**

ततः महाराजो दशरथः स्वपूर्ववर्तिनः राजानः इव राज्यशासनं करोति । सः युद्धे इन्द्रस्यापि साहाय्यं करोति स्म। अत्र वसन्तर्तोः सुन्दरं वर्णनं वर्तते । एकदा तमसानद्याः तटे जलेन पूर्यमाणं घटरवं श्रुत्वा दशरथः शरं प्रक्षिपति । तेन श्रवणस्य वधो भवति ।

शोकविह्वलौ पितरौ श्रापं यच्छतः । पुत्रवियोगे तवापि मरणं भविष्यति । अपुत्रः दशरथः तं शापमाशीर्वादं मत्वा स्वनगरम् अगच्छत् ।

**दशमसर्गः**

अस्मात् सर्गात् मर्यादापुरुषोत्तमस्य रामस्य कथानकं वर्णयति कविः । समयेऽस्मिन् रावणवधं कृत्वा देवरक्षणार्थं भगवान् विष्णुः अवतारग्रहणाय निश्चयं करोति । यज्ञात् प्राप्तचरूं दशरथः स्वपत्नीभ्यः यच्छति । कालक्रमेण कौशल्या रामं, कैकेयी भरतं सुमित्रा च लक्ष्मणं शत्रुघ्नञ्च जनयामासुः ।

**एकादशसर्गः**

सर्गेऽस्मिन् विश्वामित्रद्वारा रामलक्ष्मणयोः यज्ञरक्षार्थं नयनम्, ताडकावधः, सीतास्वयंवरः एवञ्च रामादीनां विवाहः, परशुरामस्य मानमर्दनम्, स्वनगरं पुनरागमनम्, सुखेन तत्र निवासः च इति सर्वं वर्णितमस्ति ।

**द्वादशसर्गः**

सर्गेऽस्मिन् रामस्य राज्याभिषेकनिर्णयः, कैकेय्याः वरयाचना, रामस्य लक्ष्मणेन सीतया च सह वनगमनम्, सीताहरणम्, रामस्य लङ्काऽऽक्रमणम्, रावणवधः, सीतायाः प्राप्तिः इत्यादिकं वर्णितमस्ति ।

**त्रयोदशसर्गः**

सुन्दरतमेऽस्मिन् सर्गे रामस्य वनवासकालः पूर्णः भवति । रामः लक्ष्मणेन सीतया अन्यसहायकैः सह पुष्पकविमानमारुह्य अयोध्यां प्रति गच्छति । मध्ये मार्गे रामः प्रत्येकस्य प्रदेशस्य वर्णनं सीतासम्मुखं प्रस्तौति । तत्र गङ्गायमुनयोः सङ्गमवर्णनं भव्यं रुचिरञ्चास्ति अयोध्यामागतस्य रामस्य भरतः स्वागतं करोति । अनन्तरं रामः कौशल्यादि मातॄः मिलति ।

**चतुर्दशसर्गः**

अस्मिन् सर्गे रामस्य राज्याभिषेकः, सीतायाः सगर्भावस्था, सीतायाः गङ्गातटभ्रमणमनीषा, 'भद्र' नाम गुप्तचरस्य सीताकलङ्कसन्देशः, रामेण कृतः सीतात्यागः, लक्ष्मेण सह सीतया प्रेषितः सुप्रसिद्धः सीतासन्देशः, सीताविलापः । वाल्मीकिना सह सीतायाः आश्रमगमनम्, युग्मपुत्रजन्म, इत्यादिवर्णनानि सन्ति । यज्ञसमये रामः पुनर्विवाहं न करोति, स्वराजधर्मं सम्यक्तया परिपालयति च ।

**पञ्चदशसर्गः**

अत्र शत्रुघ्नः लवणासुरस्य वधं करोति । स 'मधुरा' नाम नगर्याः निर्माणं करोति । रामचन्द्रः शूद्रमुनिशम्बूकस्य वधं करोति । रामेण कृतस्य अश्वमेधयज्ञस्य वर्णनं तत्रागतेन मुनिना वाल्मीकिना लव-कुशयोः परिचयः कारितः । ततः सीता स्वपवित्रतां प्रमाणीकृत्य देहत्यागं कृत्वा पृथ्वीप्रवेशं करोति । अन्ते रामलक्ष्मणयोः देहोत्सर्गपर्यन्तं वृत्तान्तो वर्तते ।

**षोडशसर्गः**

रामपुत्रः कुशः कुशावत्यां राज्यं करोति । सः एकदा निद्रावस्थायां स्वप्नं पश्यति । स्वप्ने अयोध्यायाः नगरदेवतायाः कथनेन सः अयोध्यायाः पुनर्वसनं, नवनिर्माणं करोति । तत्र राज्यं करोति । कुशः नागकन्यां कुमुद्वतीं उद्वहति ।

**सप्तदशसर्गः**

अस्मिन् सर्गे कुशपुत्र - अतिथेः राज्यशासनं, दुर्जयेन सह समरे कुशनिधनम्, कुमुद्वत्याः सतीत्वप्राप्तिः भवति। अतिथिः प्रभावसम्पन्नशासकरूपेण कीर्तिं सम्पादयति । तस्य समये अयोध्यायाः समृद्धिः अभिवर्धते । अत्र राजनीतेः सम्यक् निरूपणं कृतमस्ति ।

**अष्टादशसर्गः**

अत्र अतिथेः अनन्तरं सञ्जातानां निषध-नल-नभस्-पुण्डरीक-क्षेमधन्वा-ध्रुवसिद्धि-सुदर्शनादिभूपानां वर्णनं वर्तते । ध्रुवसिद्धिः सिंहेण निहतः अतः षड्वर्षीयः सुदर्शनः राजा भवति ।

**नवदशसर्गः**

सुदर्शनः स्वपुत्रं अग्निवर्णं शासनधुरां समर्प्य वानप्रस्थाश्रममङ्गीकरोति । अत्र अग्निवर्णस्य भोगविलासवर्णनं वर्तते। क्षयग्रस्तः सः अपुत्रः मरणं प्राप्नोति । तस्य मृत्युसमये तस्य भार्या सगर्भा आसीत् । सा राजमाता भवति । एवं रघुवंशस्य अन्तः भवति इति ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) रघुवंशमहाकाव्ये कियन्तः सर्गाः सन्ति ?

(क) पञ्चदश (ख) नवदश (ग) सप्तदश (घ) चतुर्दश

(२) रघुवंशस्य अधिकं साम्यं केन सह वर्तते ?

(क) महाभारतेन (ख) पद्मपुराणेन (ग) इतिहासग्रन्थेन (घ) वाल्मीकिरामायणेन

(३) अस्य महाकाव्यस्य प्रारम्भः कस्मात् शब्दात् भवति ?

(क) वाक् (ख) रघूणाम् (ग) पितरौ (घ) सम्पृक्तौ

(४) दिलीपस्य भार्यायाः नाम किम् आसीत्?

(क) कुमुद्वती (ख) इन्दुमती (ग) सुदक्षिणा (घ) सत्या

(५) इक्ष्वाकुवंशस्य कुलगुरुः कः आसीत् ?

(क) विश्वामित्रः (ख) वाल्मीकिः (ग) भरद्वाजः (घ) वसिष्ठः

(६) सुदक्षिणा गन्धपुष्पादिभिः कस्याः पूजां करोति ?

(क) कुलदेव्याः (ख) सुरभ्याः (ग) नन्दिन्याः (घ) शारदायाः

(७) एकदा नन्दिन्याः उपरि कः आक्रमणं करोति ?

(क) गजः (ख) सिंहः (ग) नृपः (घ) व्याघ्रः

(८) अजः कस्मात् सम्मोहनास्त्रं प्राप्नोति ?

(क) भोजनरेशात् (ख) महादेवात् (ग) गन्धर्वात् (घ) स्वपितुः

(9) अजविलापः कस्मिन् सर्गे वर्तते ?

(क) पञ्चम (ख) सप्तम (ग) अष्टम (घ) नवम

(10) रघुवंशानुसारं अस्य वंशस्य अन्तिमः राजा कः अस्ति ?

(क) अग्निवर्णः (ख) सुदर्शनः (ग) निषधः (घ) क्षेममधन्वा

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) आश्रममार्गे के दिलीपसुदक्षिणयोः स्वागतं कुर्वन्ति ?

(२) कस्मात् कारणात् दिलीपस्य सन्ततिः नासीत् ?

(३) दिलीपस्य परीक्षां कर्तुं नन्दिनी कुत्र प्रविशति ?

(४) कौत्सः किमर्थं रघोः समीपम् आगच्छति ?

(५) अष्टमसर्गे कयोः द्वयोः तुलनात्मकं वर्णनं कविना कृतमस्ति ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) द्वितीयसर्गस्य सारांशं लिखत ।

(२) रघुकौत्सयोः प्रसङ्गः ।

(३) इन्दुमत्याः स्वयंवरवर्णनं कुरुत ।

**४. टिप्पणी लेख्या ।**

(१) दिलीपस्य धेनुसेवा

(२) पञ्चदशसर्गसारांशः

(३) रघुवंशकथानकम्

**५. सूचनानुसारं उत्तरं लिखन्तु ।**

(१) 'सुदक्षिणया' विभक्तिपरिचयं कारयत ।

(२) सः ______________ प्रत्यागच्छत् । ('अयोध्या' शब्दस्य उचितं रूपं रिक्तस्थाने लिखत)

(३) 'क्षयग्रस्तः' इत्यत्र कः समासः ?

(४) कः नृपः सिंहेण निहतः ?

(५) दशरथः ________________ चरूं यच्छति । (रिक्तस्थाने उचितं पदं लिखत)

(६) अश्वमेधस्य अश्वं कः अहरत् ?

**छात्रप्रवृत्तिः**

- छात्राः रघुवंशमहाकाव्यस्य विषये अधिकं ज्ञानं प्राप्नुयुः ।

**शिक्षकप्रवृत्तिः**

- शिक्षकः रघुवंशनिहितश्लोकैः कालिदासस्य उपमावैशिष्ट्यं ज्ञात्वा छात्रेभ्यः कथयेत् ।

# ७ रघुवंशश्लोकाः

**प्रस्तावना**

कालिदासः संस्कृतसाहित्यजगतः अद्वितीयः महाकविः मन्यते । तस्य कृते 'न भूतो न भविष्यति' इत्युक्तिः सर्वथा उचिता प्रतिभाति । कालिदासेन यथा मानवहृदयस्य सूक्ष्मातिसूक्ष्मभावानां निरीक्षणं कृतमस्ति न तथा अन्येन केनापि कविना कृतं स्यात् । कालिदासः अन्तः तथा बाह्यजगतः सूक्ष्मनिरीक्षकः वर्तते ।

तथा तु कालिदासकृतिषु सर्वरसानां सन्निवेशः वर्तते । तथापि सः शृङ्गाररसरसिकः कविः आसीत् । तस्य प्रकृतिवर्णनम् अद्भुतमस्ति । रघुवंशस्य नवमसर्गे वायुना दोलायमानां लतां लक्षीकृत्य तेन कृतं वसन्तर्तोः वर्णनमनुपममस्ति ।

**श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदन्तरुचो बभुः ।**

**उपवनान्तलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः ॥**

कालिदासस्य उपमाकौशलं जगत्यस्मिन् सुप्रसिद्धमेवास्ति । कालिदासकृतिषु सरसम्, सरलम्, सुबोधं कमनीयञ्च हृद्भावसाम्राज्यं सहृदयानां साधारणमानवानाञ्च चित्तमाकर्षयति ।

कविना विरचितं रघुवंशमहाकाव्यं संस्कृतसाहित्यजगति अनुपमं स्थानं भजते । अत्र सूर्यवंशप्रभवानां नृपाणां चरित्रं प्रेरकं वर्तते । वयमत्र रघुवंशमहाकाव्यस्य दशश्लोकानाम् आस्वादनं करिष्यामः ।

---

1. **वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।**

**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १ ॥** (1.1)

**अन्वयः**:- अहं वागर्थौ इव संपृक्तौ जगतः पितरौ पार्वतीपरमेश्वरौ वागर्थप्रतिपत्तये वन्दे ।

**व्याख्या**- वागर्थाविव-शब्दार्थाविव सम्पृक्तौ- नित्यसम्बद्धावित्यर्थः । 'नित्यः शब्दार्थसम्बन्धः' इति मीमांसकः । जगतः- लोकस्य पितरौ-माता च पिता च इति पितरौ । एतेन शर्वशिवयोः सर्वजगज्जनकतया वैशिष्ट्यम् इष्टार्थप्रदानशक्तिः परमकारुणिकत्वं च सूच्यते । वागर्थप्रतिपत्तये - शब्दार्थयोः सम्यग्ज्ञानार्थं वन्दे - अभिवादये नमामि वा।

**सरलार्थः**:- शब्दार्थवत् सदैव सम्मिलितौ लोकस्य पितरौ पार्वतीपरमेश्वरौ, उमामहेश्वरौ शब्दार्थसिद्धिहेतवे (अहं) अभिवादये ।

2 **लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।**

**सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥ २ ॥** (1-69)

**अन्वयः**:- तपोदानसमुद्भवं पुण्यं लोकान्तरसुखम् । हि शुद्धवंश्या सन्ततिः परत्र इह च शर्मणे (भवतीति शेषः)।

**व्याख्या**- तपोदानसमुद्भवं - तपसा दानेन च उत्पन्नं यत् पुण्यं - सुकृतं तद्, लोकान्तरे - परलोके, सुखं - सुखकरम् - सुखप्रदं भवति । हि - खलु, शुद्धवंश्या -विशुद्धवंशे सञ्जाना- भवा, सन्ततिः - सन्तानः परत्र - परलोके, इह च - अत्र लोके- मनुष्यलोके, शर्मणे - सुखाय भवतीति शेषः ।

**सरलार्थः**:- तपसा दानेन च उत्पन्नं पुण्यं परलोके सुखदायकं सुखप्रदं भवति । विशुद्धवंशे सदाचारसम्पन्ने कुले उत्पन्ना सन्ततिः इह मनुष्यलोके एवं परलोके स्वर्गादिलोकेऽपि सुखकरा सुखप्रदा भवति ।

3 **अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।**

**वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ ३ ॥ (2-1)**

**अन्वयः-** अथ यशोधनः प्रजानाम् अधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्यां पीतप्रतिबद्धवत्सां ऋषेः धेनुं वनाय मुमोच।

**व्याख्या-** अथ - निशानयनान्तरं, यशोधनः - यशः एव धनं यस्य सः यशोधनः (दिलीपः), प्रजानाम् अधिपः - प्रजापतिः प्रजेश्वरः, प्रभाते - प्रातःकाले, जायया-भार्यया सुदक्षिणया, प्रतिग्राहिते - स्वीकारिते स्वीकृते, गन्धमाल्ये - गन्धश्च मालाश्च गन्धमाल्ये - चन्दनमालिके जायाप्रतिग्राहितगन्धमाल्ये- चन्दनमालिके जायाप्रतिग्राहितगन्धमाल्यां, तां - तथोक्तां धेनुं, पीतः- पीतवान्, प्रतिबद्धः वत्सः यस्याः ताम्, ऋषेः- मुनेः वसिष्ठस्य, धेनुं - नन्दिनीं वनाय-अरण्याय वनं गन्तुम्, मुमोच- मुक्तवान् ।

जायापदसामर्थ्यात् सुदक्षिणायाः पुत्रजननयोग्यत्वम् अनुसन्धेयम् । 'तज्जाया जाया भवति यदस्यां जायते पुनः' । तथा हि श्रुतिः -

पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम् ।

तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ॥

**सरलार्थः-** निशानयनान्तरं यशसः स्वामी, प्रजापालकः राजा दिलीपः प्रातःकाले सुदक्षिणया प्रदत्तगन्धमाल्यां (गन्धमाला द्वारा पूजितां) पयःपानानन्तरं पुनः बद्धवत्सां महर्षेः वसिष्ठस्य 'नन्दिनी' नामधेनुं वनाय मुमोच मुक्तवान् ।

4 **एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।**

**अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम् ॥ ४ ॥ (2-47)**

**अन्वयः-** एकातपत्रं जगतः प्रभुत्वं नवं वयः इदं कान्तं वपुः च इति एवं अल्पस्य हेतोः बहु हातुम् इच्छन् त्वं विचारमूढः मे प्रतिभासि ।

**व्याख्या-** एकातपत्रम् - एकच्छत्रं, जगतः - विश्वस्य, प्रभुत्वं - स्वामित्वम् । नवं - नूतनं, वयः - यौवनम्। इदं - एतत्, कान्तं - रम्यं, सुन्दरं, वपुः - तनुः, शरीरं, कायः च । इत्येवं बहु सर्वं अल्पस्य हेतोः - अल्पेन कारणेन अल्पफलाय इत्यर्थः हातुं - त्यक्तुम्, इच्छंस्त्वं - इच्छुकः त्वं मूढः-मूर्खः, मे - मम, प्रतिभासि - दृश्यसे ।

**सरलार्थः-** संसारस्य एकछत्रमाधिपत्यं नूतनं यौवनम् एवं च इदं सुन्दरं सौष्ठवपूर्णं शरीरं एतत् सर्वं स्वल्पस्य हेतोः त्यक्तुम् इच्छुकः त्वं मे मूर्खः इव संदृश्यसे । कर्तव्याकर्तव्यमूढः प्रतिभासि । केवलं गोरक्षार्थं त्वं स्वकीयं सर्वस्वं त्यक्तुम् इच्छसि । तद् उचितं नास्ति ।

5 **श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।**

**अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवम् ॥ ५ ॥ (3-4)**

**अन्वयः-** अर्थवित् पार्थिवः अयम् अर्भकः श्रुतस्य तथा च युधि परेषां अन्तं यायात् इति धातोः गमनार्थम् अवेक्ष्य आत्मसम्भवं नाम्ना रघुं चकार ।

**व्याख्या-** अर्थवित् - शब्दार्थज्ञः, पार्थिवः - पृथ्वीश्वरः दिलीपः । अयम् अर्भकः - अयं बालकः, श्रुतस्य - शास्त्रस्य, तथा च - एवं च, युधि - समरे, परेषां - शत्रूणाम्, अन्तं - पारं, यायात् - यातुं शक्नोति,

इति हेतोः - तस्मात् कारणात्, धातोः गमनार्थम् अवेक्ष्य - अवलोक्य, आत्मसम्भवं - स्वतः उत्पन्नं जातं वा । ''आत्मा वै जायते पुत्रः'' । नाम्ना रघुं चकार - रघु इति नाम कृतवान् ।

**सरलार्थः-** शब्दार्थज्ञः राजा दिलीपः 'अयं बालः शास्त्रान्तं गमिष्यति' अर्थात् सर्वशास्त्रज्ञः भविष्यति । एवं च समरे सर्वशत्रूणां संहारं करिष्यति।' इत्येवं लधि धातोः गमनाख्यम् अर्थं विदित्वा स्वपुत्रस्य नाम 'रघु' इति स्थापितवान् ।

6. **अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।**

**अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥ ६ ॥ (3-29)**

**अन्वयः-** अथ विधिवत् उपनीतं गुरुप्रियम् एनं विपश्चितो गुरवो विनिन्युः । ते अत्र अवन्ध्ययत्ना च बभूवुः । हि क्रिया वस्तूपहिता प्रसीदति ।

**व्याख्या-** अथ विधिवत् - विधिपूर्वम्, उपनीतं - प्राप्त उपवीतं, गुरुप्रियम् एनं - रघुं, विपश्चितः - विद्वांसः गुरवः, विनिन्युः - शिक्षितवन्तः । ते - गुरवः, अत्र - अस्मिन् रघौ, अवन्ध्ययत्ना - सफलप्रयत्नाः, बभूवुः - सञ्जाताः । तथा हि क्रिया - शिक्षा । वस्तुनि पात्रभूत उपहिता- प्रयुक्ता, प्रसीदति - फलति, सफला भवति ।

**सरलार्थः-** विधिपूर्वकं प्राप्तयज्ञोपवीताय गुरुप्रियाय रघवे विद्वांसः गुरवः शिक्षाम् अयच्छन् एवं च ते गुरवः तत्र सफलाः अपि अभवन् । नूनं सुपात्रे प्रयुक्ता शिक्षा (क्रिया) सफला भवति ।

7. **स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।**

**दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥ ७ ॥ (4-1)**

**अन्वयः-** स गुरुणा दत्तं राज्यं दिनान्ते सवित्रा निहितं तेजः हुताशनः इव प्रतिपद्य अधिकं बभौ ।

**व्याख्या-** सः - रघुः, गुरुणा - पित्रा, दत्तं- प्रदत्तं, राज्यं - राज्ञः कर्म प्रजापरिपालनात्मकम् प्रतिपद्य - प्राप्य दिनान्ते - सायंकाले, सवित्रा - सूर्येण, निहितं - प्रस्थापितं, तेजः - ओजः, प्रतिपद्य - प्राप्य, हुताशनः इव- अग्निः इव । अधिकं बभौ - अधिकः शोभमानः सञ्जातः ।

''सौरं तेजः सायमग्निं संक्रमते । आदित्यो वा अस्तं सन् अग्निम् अनुप्रविशति । अग्निं आदित्यः सायं प्रविशति'' इत्यादि श्रुतिः प्रमाणम् ।

**सरलार्थः-** सः रघुः पित्रा प्रदत्तं राज्यं प्राप्य सायंकाले सूर्येण प्रस्थापितं तेजः सम्प्राप्य अग्निः इव अधिकं शोभते स्म ।

८ **स विश्वजितमाजह्वे यज्ञं सर्वस्वदक्षिणम् ।**

**आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ८ ॥ (4-86)**

**अन्वयः-** सः सर्वस्वदक्षिणं विश्वजितं यज्ञम् आजह्वे, हि सतां वारिमुचाम् इव आदानं विसर्गाय ।

**व्याख्या-** सः- रघुः, सर्वस्व दक्षिणा यस्य तं सर्वस्वदक्षिणम् 'विश्वजित्सर्वस्वदक्षिणः' इति श्रुतेः - विश्वजितं नाम, यज्ञम् - मखम्, आजह्वे-कृतवान् इति अर्थः । हि-खलु, सतां - साधूनाम्, वारिमुचां - मेघानाम् इव आदानम् - अर्जनं, विसर्गाय - त्यागाय, पात्रविनियोगाय इति अर्थः ।

**सरलार्थः-** रघुणा दक्षिणारूपेण सर्वस्वप्रदानात्मकः विश्वजित् नामाख्यः यज्ञः कृतः । (अस्मिन् यज्ञे विश्वविजयं कृत्वा यत् प्राप्तं तद् सर्वं दानरूपेण प्रदीयते) यतः सज्जनानाम् अर्जनं मेघानाम् इव परेभ्यः (पात्रेभ्यः) प्रदानाय एव भवति ।

९ **तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातम् ।**

**उपात्तविद्यो गुरुदक्षिणाऽर्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ ९ ॥ (5-1)**

**अन्वयः-** विश्वजिति अध्वरे निःशेषविश्राणितकोशजातम् तं क्षितीशम् उपात्तविद्यः गुरुदक्षिणार्थी वरतन्तुशिष्यः कौत्सः प्रपेदे ।

**व्याख्या-** विश्वजिति - विश्वजित् नाम्नि, अध्वरे - यज्ञे निःशेषं विश्राणितं-दत्तम् कोषानाम् - अर्थराशीनां, जातं - समूहः, येन तं तथोक्तम्, तं - रघुं, क्षितीशं - भूपतिम्, उपात्तविद्यः - लब्धविद्यः, वरतन्तोः- तन्नामाख्यगुरोः, शिष्यः-अन्तेवासी कौत्सः, गुरुदक्षिणार्थी - गुरुदक्षिणा आकाङ्क्षी, प्रपेदे-प्राप्तवान्, प्राप ।

**सरलार्थः-** विश्वजित् नामाख्ये अध्वरे सर्वस्वप्रदानान्तरं महर्षेः वरतन्तोः शिष्यः कौत्सः प्राप्तविद्यः गुरुदक्षिणा आकाङ्क्षी तं रघुं प्राप ।

१० **उपात्तविद्यं विधिवद् गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तम् ।**

**श्रीः साभिलाषाऽपि गुरोरनुज्ञां धीरेव कन्या पितुराचकाङ्क्ष ॥ १० ॥ (5-38)**

**अन्वयः-** गुरुभ्यः विधिवत् उपात्तविद्यम् यौवनोद्भेदविशेषकान्तम् तम् प्रति साभिलाषा अपि श्रीः धीरा कन्या पितुः इव गुरोः अनुज्ञाम् आचकाङ्क्ष ।

**व्याख्या-** गुरुभ्यः विधिवत् - यथाविधि, उपात्तविद्यम् - प्राप्तविद्यम्, यौवनोद्भेदविशेषकान्तम् - यौवनत्वात् विशेषकमनीयं, तम् - अजं, प्रति साभिलाषाऽपि - अभिलाषपूर्णाऽपि, श्रीः - लक्ष्मीः (राज्यलक्ष्मीः) धीरा - स्थिरचित्ता, कन्या पितुरिव - तातस्य इव, गुरोः अनुज्ञां - गुरोः आज्ञां, आचकाङ्क्ष - आकाङ्क्षामकरोत्। युवराजपदार्हः अभवत् । इत्यर्थः ।

**सरलार्थः-** यथाविधि लब्धविद्यं यौवनत्वात् कमनीयम् अजं प्रति साभिलाषा अपि राज्यलक्ष्मीः धीरा कन्या जनकस्य इव गुरोः पितुः आज्ञाम् अभ्यलषत् ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) 'पुण्यम्' शब्दस्य पर्यायशब्दः कः ?

(क) दुष्कृतम् (ख) सुकृतम् (ग) धर्मः (घ) तपः

(२) वागर्थाविव ______________ वागर्थप्रतिपत्तये ।

(क) पितरौ (ख) पार्वतीपरमेश्वरौ (ग) संपृक्तौ (घ) वन्दे

(३) नृपः कदा धेनुं वनाय मुमोच ?

(क) प्रभाते (ख) मध्याह्ने (ग) सायंकाले (घ) निशीथकाले

(४) नृपः दिलीपः कस्य हेतोर्बहुहातुम् इच्छति ?

(क) राज्यस्य (ख) अल्पस्य (ग) धर्मस्य (घ) नियमस्य

(५) दिलीपस्य पुत्रः कः आसीत् ?

(क) अजः (ख) दशरथः (ग) कुशः (घ) रघुः

(६) 'अर्भकः' शब्दस्यार्थः कः ?

(क) युवा (ख) स्थविरः (ग) बालकः (घ) सूर्यः

(७) रघुं कीदृशाः गुरवः विनिन्युः ?

(क) समर्थाः (ख) समृद्धाः (ग) विपश्चितः (घ) गुणज्ञाः

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) राज्यं प्राप्य रघुः कथं बभौ ?

(२) जगतः पितरौ कौ स्तः ?

(३) तपोदानसमुद्भवं पुण्यं कीदृशम् ?

(४) पीतप्रतिबद्धवत्सां कस्याः विशेषणमस्ति ?

(५) दिलीपस्य वयः वपुश्च कीदृशमासीत् ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) 'क्रिया हि वस्तूपहिता प्रसीदति' अर्थविस्तारं कुरुत ।

(२) रघुणा कृतस्य यज्ञस्य विवरणं कुरुत ।

(३) राज्यलक्ष्मीः कीदृशं अजम् अभ्यलषत् ।

**४. टिप्पणी लेख्या ।**

(१) दिलीपस्य धेनुसेवा ।

(२) रघोःपात्रपरिचयः ।

(३) कविकृतमङ्गलाचरणम् ।

**५. सूचनानुसारमुत्तरं लिखन्तु ।**

(१) 'स विश्वजितम्...................... वारिमुचामिव' इति श्लोकपूर्तिं कुरुत ।

(२) विचारमूढः त्वं मे ...................... । रिक्तस्थानं पूरयत ।

(३) नृपशब्दस्य पर्यायशब्दान् लिखत ।

(४) 'वन्दे' धातुरूपपरिचयं कारयत ।

(५) 'यशोधनः' पदेऽस्मिन् कः समासः वर्तते ?

(६) 'गुरवः' शब्दरूपपरिचयं कारयत ।

(७) 'निहितम्' कृदन्तप्रकारं लिखत ।

**छात्रप्रवृत्तिः**

- रघुवंशीय भूपानां नामानि तेषां वैशिष्ट्यं च जानीयुः ।

**शिक्षकप्रवृत्तिः**

- अन्यत्र निहितरघुवंशविषयककथाः सम्प्राप्य छात्रेभ्यः निवेदयेत् ।

●

# ८ महाकविभारविः

**प्रस्तावना**

संस्कृतसाहित्यजगति नैके कवयः सञ्जाताः सन्ति । तेषु भास-कालिदास-भवभूति-माघ-हर्ष-भारवि आदि मुख्याः सन्ति । तेषु विद्वत्शिरोमणिःभारविः संस्कृतसाहित्यस्य प्रसिद्धः महाकविः वर्तते । कवीनां गणनाप्रसङ्गे अस्य प्रमुखं स्थानमस्ति । तस्य रचनाशैली अतीव मनोहरा वर्तते । भारवेः अर्थगाम्भीर्यं सुविदितमेवास्ति विदुषाम् । भारविः याचनाकार्यम् अधमं मन्यते स्म 'धिग्विभिन्नबुधसेतुमर्थिताम्' । भारवेः प्रकृतिवर्णनं पूर्णतया नैसर्गिकमस्ति । भारवेः सर्वतोभद्रादिचित्रकाव्यं एवञ्च श्लेषात्मकाः एकाक्षर-द्व्यक्षरश्लोकाः अतीव रमणीयाः सन्ति । तस्मात् मल्लिनाथेनोक्तम् -

**नारिकेलफलसन्निभं वचो भारवेः सपदि यद्विभज्यते ।**

**स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ।**

भारविः राजनीतेः अपि ज्ञाता आसीत् । पाठेऽस्मिन् दन्तकथामाश्रित्य भारवेः जन्म-समयादिविषये निरूपणं कृतमस्ति।

---

**जन्म**

संस्कृतसाहित्याकाशे ''अर्थगौरवेण'' प्रसिद्धः महाकविः भारविः नूनम् उत्तमः साहित्यसर्जकः वर्तते । परन्तु तस्य जन्मविषये किमपि प्रमाणं न प्राप्यते । तेन स्वरचिते 'किरातार्जुनीयम्' महाकाव्येऽपि आत्मश्लाघाभयेन किमपि विलिखितं नास्ति ।

तथाऽपि सद्भाग्यात् दण्डिरचित 'अवन्तिसुन्दरीकथा' नामाख्ये ग्रन्थे भारवि-विषये वृत्तान्तः प्राप्यते । तदनुसारं भारविः कौशिकगोत्रोत्पन्नस्य नारायणस्वामिनः पुत्रः आसीत् । तस्य जन्मभूमिः आनन्दपुरम् (वडनगरम्) आसीत् । ततः कार्यवशात् जन्मभूमिं त्यक्त्वा दक्षिणे नासिक्यसमीपस्थे अचलपुरनाम्नि स्थाने समागच्छत् ।

भारतस्य मध्यप्रान्ते विद्यमानं एल्लीचपुरम् एव अचलपुरनाम्ना प्रसिद्धमासीत् । किन्तु नासिक्यप्रान्तः नासिकसमीपस्थं स्थानं सूचयति । 'किरातार्जुनीयम्' महाकाव्यस्य अष्टादशतमे सर्गे सह्याद्रिपर्वतस्य उल्लेखः प्राप्यते । तस्योल्लेखं कृत्वा प्रो. आर. आर. भागवतः भारविं दक्षिणभारतनिवासिनं मन्यते । तेन कृतहिमालयवर्णनेन सः उत्तर-भारतीयः आसीत् इति कथनं योग्यं नास्ति । एतादृशं वर्णनं कदाचित् तेन स्वकवित्वशक्त्या कृतं स्यात् । एवं तस्य जन्मस्थानविषये समुचितं प्रमाणं न कुत्रापि प्राप्यते । भारवेः मूलनाम 'दामोदर' आसीत् । भारविः तस्य उपनाम आसीत् इति मन्यते। तस्य प्रतिभा सूर्यवत् आसीत् (भा-रविः) अतः भारविः इति उपनाम सञ्जातम् ।

भारवेः त्रयः पुत्राः आसन् । तेषु 'मनोरथ' नामाख्यस्य पुत्रस्य 'वीरदत्त' नाम पुत्रः आसीत् । महान् गद्यकारः 'दण्डी' वीरदत्तस्य पुत्रः आसीत् । तदनुसारं भारविः दण्डिनः चतुर्थः पूर्वपुरुषः आसीत् । अर्थात् भारविः दण्डिनः प्रपितामहः आसीत् इति अवगन्तुं शक्यते ।

| | | |
|---|---|---|
| भारविः (दामोदरः) | - | प्रपितामहः । |
| मनोरथः | - | पितामहः । |
| वीरदत्तः | - | पिता । |
| दण्डी | - | पुत्रः । |

किन्तु अर्वाचीनान्वेषणानुसारं दण्डिनः प्रपितामहः भारविः एव दामोदरः नेदं प्रमाणितं भवति । अपि तु उभौ भिन्न-भिन्नकवी आस्ताम् इति प्रमाणितं भवति ।

यदा भारविः अचलपुरे दक्षिणप्रदेशे आसीत् । तदा तत्रत्यस्य पुलकेशिद्वितीयस्य अनुजेन विष्णुवर्धनेन सह तस्य सम्बन्धः आसीत् । तत्र एकदा राज्ञा सह भारविः मृगयार्थं गतवान् । तत्र क्षुधापीडितः सः मांसभक्षणमकरोत् । अतः प्रायश्चित्तार्थं सः यात्रार्थं निर्गतवान्।

यात्राकाले दुर्विनीतनाम्ना नृपेण सह भारवेः संयोगः सञ्जातः । ततः तेन सह किञ्चित् कालपर्यन्तं सः तत्रैव न्यवसत् । तत्रावसरे तेन 'सिंहविष्णु' नाम्नः नृपस्य प्रशंसायाम् एकः श्लोकः (आर्याछन्दसि) विलिखितः । तं श्लोकं पठित्वा तेन नृपेण भारविः स्वराज्ये आहूय सभापण्डितरूपेण स्वसभायां संस्थापितः । भारविः सिंहविष्णोः तस्य पुत्रस्य महेन्द्रविक्रमस्य च कृपापात्रम् आसीत् ।

भारविः शैवधर्मी आसीत् । ''किरातार्जुनीयम्'' महाकाव्ये निरूपितशिवभक्त्या तद्सिद्धं भवति ।

**किंवदन्ती**

भारविः बाल्यात् प्रभृति विद्वान् आसीत् । तथाऽपि तस्य तातः तं भृशं तिरस्करोति स्म । पितुः आशयः शुद्धः आसीत् । यद् अनेनैव सः प्रकाण्ड-पण्डितो भविष्यति । विद्याभ्यासात् विचलितो न भवेत् । पाण्डित्यं प्राप्तस्याऽपि भारवेः अवमानं तिरस्कारश्च भवति स्म । एकदा कुपितेन भारविना स्वपितुः वधस्य निश्चयः कृतः । पितृवधार्थं गतः भारविः मातृ-पित्रोः संवादं शृणोति । भारवेः पिता स्वपत्नीं कथयति यत् ''पुत्रस्य प्रसिद्धिं ज्ञात्वा मम हृदयं तु अत्यन्तं प्रसन्नं वर्तते । किन्तु इतोऽपि अधिकां प्रसिद्धिं सः प्राप्नुयात् अत एव अहं तं तिरस्करोमि । पुत्रोन्नतिं विहाय मम मनसि नान्यः भावः विद्यते । एतत् सर्वं श्रुत्वा साश्रुपातः भारविः पितुः चरणयोः अपतत् । तेन प्रायश्चित्तरूपेण दण्डस्य याचना कृता । पित्रा कथितं त्वं स्वश्वसुरग्रामं गत्वा धेनूः चारय । तेन सः तत्र गत्वा धेनूः अचारयत् । एकदा तस्य भार्या तं पश्यति । उभयोः मेलनं भवति । किन्तु रहस्यमेतत् अन्यः कोऽपि न जानाति स्म ।

एकदा तया भारविसमीपे धनस्य याचना कृता । किन्तु तस्य समीपे तु धनं नासीत् । अतः तेन एकः श्लोकः विरचितः कस्मैचित् श्रेष्ठिने जनाय धनं स्वीकृत्य प्रदत्तः ।

**श्लोकः**

**''सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।**
**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः'' (किरातः २-३०)**

येन श्लोकोऽयं क्रीतः आसीत् तेन स्वशयनखण्डे भित्तौ प्रस्थापितः वा विलिखितः । कार्यवशात् सः महाजनः देशान्तरमगच्छत् । बहुकालान्ते सः स्वगृहं पुनरागच्छत् । तदा सः स्वभार्यया सह पर्यङ्के सुप्तम् एकं पुरुषमपश्यत् । क्रोधाविष्टः सः तं हन्तुम् उद्यतः भवति । तस्मिनेव काले सः भित्तौ विलिखितं तं श्लोकं पठति । धैर्यं समाश्रित्य सः सर्वं वृत्तान्तं जानाति । तदा ज्ञानं भवति यत् सः परपुरुषः अन्यः कोऽपि न किन्तु तस्यैव पुत्रः वर्तते । अनेन सः भारविं प्रति स्वकृतज्ञतां प्रकटयति । तस्य बहुमानमपि करोति ।

किंवदन्त्यनुसारं भारवेः पिता श्रीधरः, माता-सुशीला, श्वसुरः- चन्द्रकीर्तिः भार्या च रसिका आसीत् । किन्तु नात्र तथ्यं प्रतिभाति । एतत् सर्वं कपोलकल्पितमिव दृश्यते ।

अतः तेन विरचितस्य 'किरातार्जुनीयम्' महाकाव्यस्य आश्रयेणैव तथ्यं ज्ञातुं शक्यते ।

भारविना साहित्यस्य साङ्गोपाङ्गाभ्यासः कृतः स्यात् इति दृश्यते । तेन अर्थशास्त्र-कामशास्त्र-व्याकरण-अलङ्कार-धर्मशास्त्रादीनामपि सूक्ष्माध्ययनं कृतं स्यात् इति प्रतिभाति ।

भारविः राजनीतिशास्त्रस्य महापण्डितः आसीत्। राजनीतिविषयकं तस्य अपारं ज्ञानं 'किरातार्जुनीयम्' महाकाव्ये प्रथम-द्वितीयसर्गयोः दृग्गोचरं भवति । राजनीतिसिद्धान्तानां तर्कपूर्णं प्रतिपादनं, प्रकृतेः दृश्याणां मनोहारिवर्णनं भारवेः

भव्यकवित्वकलायाः प्रौढमङ्गमस्ति । संसारस्य विशालानुभवस्य आधारशिलोपरि भारविना कृतं संवादप्रधानं वास्तविकञ्च राजनीति-विषयकं निरूपणं संस्कृतसाहित्ये अविस्मरणीयमस्ति । संदर्भेऽस्मिन् भारविना यल्लिखितमस्ति तत्तस्य प्रौढतायाः, अनुभूतेः भावुकतायाश्च प्रतीकमस्ति । नात्र कोऽपि संशयः ।

भारविः एकः सिद्धहस्तः कविः आसीत् । आदर्शगिरायाः तस्य विचारः 'किरातार्जुनीये' नैकस्थानेषु प्रकीर्णः दृग्गोचरः भवति । ते विचाराः उदीयमानं वक्तारं मार्गदर्शनं दातुमर्हाः सन्ति ।

भारविना स्वकीयायां कृतौ मुख्यत्वेन वीररसस्य निरूपणं कृतमस्ति । तथाऽपि कुत्रचित् शृङ्गारस्याऽपि अपूर्वं वर्णनं कृतमस्ति । स्वर्गकन्यानां विहारः, पुष्पचयनं, अप्सरसां गन्धर्वानाञ्च जलक्रीडा, कामकेलीत्यादिवर्णने भारवेः प्रणयकलाविशारदत्वं सिद्धं भवति ।

भारविः वर्णनकलायाः अद्वितीयः प्राज्ञः दृश्यते । 'किरातार्जुनीये' विविधवर्णनेषु तत् स्पष्टं भवति । तस्मिन् कृतं शरद्वर्णनं तु मधुरता-तरलता-सुन्दरतापूर्णं दृश्यते । तत्र कवेः कल्पनाशक्तेः परिचयः प्राप्यते ।

भारविः अलङ्कारशास्त्रस्य पिङ्गलछन्दःशास्त्रस्य च पण्डितः आसीत् । तेन विरचिते 'किरातार्जुनीयम्' महाकाव्ये नैके अलङ्काराः प्रायःत्रयोविंशतिः वृत्तानि च दृश्यन्ते । तेन चित्रकाव्यरचनायां सर्वतोभद्र, यमक, प्रहेलिका, गोमूत्रिकाबन्धादि शब्दालङ्काराणां निरूपणे स्वकीयं पाण्डित्यं प्रदर्शितमस्ति । भारविना एकाक्षरः श्लोकः विरचितः तद्यथा-

**ननोननुन्नो नुन्नोनो नाना नानानना ननु ।**
**नुन्नोऽनुन्नो ननुनेन्नो नानेना नुन्ननुन्ननुत् ॥ कि. १५: १८**

**अन्वयः-** नानाननाः ऊननुन्नः ना न नुन्नोनः अना ननुन्नेनः नुन्नः अनुन्नः नुन्ननुन्ननुत् अनेना न ।

**व्याख्या-** नानाननाः - नैकाननाः, ऊननुन्नः - न्यूनहतः ना न - सः पुरुषः न, नुन्नोनः - येन न्यूनः हतः अना -सोऽपि अपुरुष एव । ननुन्नेनः - यस्य स्वामी अक्षतः, नुन्नः - विक्षतः अपि, अनुन्नः - अक्षतः ज्ञेयः, नुन्ननुन्ननुत् - अतिविक्षतान् पीडकः, अनेना - निर्दोष न ।

**सरलार्थः-** हे नैकाननाः ! यः ऊनात् जनात् विक्षतः भवति सः पुरुषः नास्ति । यस्मात् ऊनः विक्षतः भवति सोऽपि अपुरुष एव । यस्य स्वामी अक्षतः वर्तते सः विक्षतः अपि अक्षतः एव तथा च विक्षतान् हतान् पीडादायकः (पीडाग्रस्तान् पीडादायकः) अपि निर्दोषः नास्ति । अनेन काव्ये माधुर्येण सह काठिन्यमपि अनुभूयते ।

**भारवेः समयः**

संस्कृतसाहित्यस्य प्राचीनकवीनां जन्मसमयसन्दर्भे किमपि सुनिश्चितं न भवति । तस्मात् विद्वांसः विषयेऽस्मिन् विविधान् तर्कान् कुर्वन्ति । भारविविषयेऽपि एतादृशमेव वर्तते । महाकाव्यसर्जनेतिहासे कालिदासानन्तरं भारवेः स्थानं वर्तते । तथाऽपि तस्य कालविषये नाधिकं ज्ञानं कुत्रापि प्राप्यते । तथाऽपि तर्कवितर्केण वयं समयनिर्धारणे प्रयत्नं कुर्मः ।

(1) पुलकेशिद्वितीयस्य समयः ई.स. 634 वर्तते । दक्षिणस्य 'ऐहोळ' ग्रामे एकः शिलालेखः प्राप्तः वर्तते । अस्मिन् शिलालेखे कालिदासेन सह भारवेः नामोल्लेखः कृतः वर्तते । कविकुलगुरुकालिदासेन सह नामोल्लेखस्य सिद्धिः भारविना वर्षशतान्ते प्राप्ता स्यात् । इति चिन्तयन् कालिदासस्य समयः यदि पञ्चमी शताब्दी वर्तते तर्हि भारवेः समयः षष्टि शताब्दी अवगन्तुं शक्यते । एतेन ज्ञातं भवति यत् भारवेः भा सप्तम्यां शताब्द्यां पूर्णतया भारते प्रकाशिता स्यात् ।

(2) कीथः कथयति यत् ई.स. ६६० समीपवर्तिकाले विरचितायां 'काशिकावृत्ति' कृतौ भारवेः निर्देशः प्राप्यते। कीथस्य कथनानुसारं ई.स. ६७१ तः ६९५ मध्ये भारतवर्षस्य प्रवासकर्ता 'चीन' देशस्य पथिकः इत्सिंगः स्वप्रवासवर्णने

लिखति यत् संस्कृतव्याकरणपठनेच्छुकछात्राणां कृते प्रारम्भे 'काशिकावृत्ति' ग्रन्थस्य अध्ययनम् आवश्यकमस्ति । अस्मिन्नेव ग्रन्थे भारवेः निर्देशः प्राप्यते । तेन अनुमानं कर्तुं शक्यते यत् भारवेः कालः षष्ठशताब्द्याः उत्तरार्धः स्यात् ।

अन्ये केचन इतिहासज्ञाः भारवेः समयः ई.स. ५५० प्रायः मन्यन्ते । तेषां कथनमस्ति यत् ई.स. ७७६ तमे वर्षे विलिखितशिलालेखे पृथ्वी कोङ्गणी राज्ञः निर्देशः प्राप्यते । अस्य राज्ञः पञ्चमः पूर्वजः दुर्विनीतः आसीत्। तेन भारवेः महाकाव्यस्य 15 (पञ्चदश) सर्गस्य उपरि टिप्पणी लिखिता । एकस्य पूर्वजस्य कृते 25 (पञ्चविंशतिः) वर्षाणां समयः मन्यते चेत् दुर्विनीतस्य समयः प्रायः ई.स. 620 मन्यते । अतः भारविः दुर्विनीतात् 50 (पञ्चाशत्) वर्षपूर्वं मन्यते चेत्तु तस्य समयः षष्ठशताब्द्याः मध्यकालः मन्तुं शक्यते ।

भारविः नरेन्द्र-विष्णुवर्धनस्य सभापण्डितः आसीत् इति 'अवन्तिसुन्दरी' कथायां प्रमाणं प्राप्यते । केचन विद्वांसः नरेन्द्र-विष्णुवर्धनं पुलकेशिद्वितीयस्य भ्रातरं मन्यन्ते । तस्य कुब्ज-विष्णुवर्धन इति नाम प्राप्यते । कुब्ज-विष्णुवर्धनः स्वभ्रातुः आज्ञया ख्रिस्ताब्दस्य सप्तम्यां शताब्द्यां दक्षिणस्य शासनमकरोत् । यदि सत्यमिदं मन्यते चेत् ई.स. 634 ऐहोळ शिलालेखसमये भारवेः एतावती प्रसिद्धिः आसीत् इति अनुमानं सर्वथा अनृतं प्रतिभाति । अतः विष्णुवर्धन कुब्जविष्णुवर्धनः न किन्तु ई.स. 570 वर्षे जातस्य सिंह-विष्णुवर्मणः पूर्ववर्ती अन्यः कोऽपि विष्णुवर्धनः स्यात् । अनेन भारवेः समयः षष्ठशताब्द्याः उत्तरार्धः स्यात् ।

कृतयः- भारवेः एका एव रचना 'किरातार्जुनीयम्' वर्तते ।

नामानि- भारविः, दामोदरः ।

विशेषता भारवे विशेषता तस्य अर्थगौरवम् अस्ति ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) भारवेः ख्यातिः केन अस्ति ?

(क) उपमया (ख) पदलालित्येन (ग) ध्वनिना (घ) अर्थगौरवेण

(२) 'अवन्तिसुन्दरीकथा' केन रचितः ग्रन्थः वर्तते ?

(क) बाणभट्टेन (ख) अश्वघोषेण (ग) दण्डिना (घ) भासेन

(३) भारविः कस्य पुत्रः आसीत् ?

(क) नारायणस्य (ख) विष्णुशर्मणः (ग) वीरदत्तस्य (घ) मनोरथस्य

(४) भारवेः कति पुत्राः आसन् ?

(क) पञ्च (ख) त्रयः (ग) चत्वारः (घ) सप्त

(५) कदा भारवेः दुर्विनीतेन सह संयोगः जातः ?

(क) प्रभातकाले (ख) सायंकाले (ग) यात्राकाले (घ) शयनकाले

(६) दन्तकथानुसारं भारवेः पत्न्याः नाम किमासीत् ?

(क) सुशीला (ख) रसिका (ग) सुलोचना (घ) सुनयना

(७) कीथस्य कथनानुसारं भारवेः समयः कः ?

(क) षष्ठशताब्देः पूर्वार्धः (ख) षष्ठशताब्देः उत्तरार्धः

(ग) सप्तमशताब्देः पूर्वार्धः (घ) सप्तमशताब्देः उत्तरार्धः

(८) भारवेः मूलनाम किमासीत् ?

(क) दामोदरः (ख) चन्द्रकीर्तिः (ग) श्रीधरः (घ) विष्णुवर्धनः

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) अष्टादशसर्गे कस्य पर्वतस्य उल्लेखः वर्तते ?

(२) भारविः कस्य सभापण्डितः आसीत् ?

(३) कस्मिन् ग्रामे शिलालेखः प्राप्तः ?

(४) भारविः बाल्यात् प्रभृति कीदृशः आसीत् ?

(५) भारविना कीदृशः श्लोकः रचितः ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) 'अवन्तिसुन्दरी' कथानुसारं भारवेः जन्मस्थलम् ?

(२) 'चीन' देशीय इत्सिङ्गानुसारं भारवेः समयः कः ?

(३) भारविविरचितस्य एकाक्षरश्लोकस्य सरलार्थं लिखतु ।

(४) केन भारवेः प्रणयकलाविशारदत्वं सिद्धं भवति ?

**४. टिप्पणी लेख्या ।**

(१) भारवेः परिवारः ।

(२) भारवेः प्रायश्चित्तम् ।

(३) भारवेः छन्दोऽङ्कारपाण्डित्यम् ।

**५. सूचनानुसारमुत्तरं लिखन्तु ।**

(१) दण्डिनः पितामहः ................ । रिक्तस्थानं पूरयत ।

(२) 'क्षुधापीडितः' पदेऽस्मिन् कः कृदन्तः ?

**६. अ विभागेन सह ब विभागं योजयत**

| **अ** | **ब** |
|---|---|
| (१) भारविः | (१) पिता |
| (२) मनोरथः | (२) पुत्रः |
| (३) वीरदत्तः | (३) प्रपितामहः |
| (४) दण्डी | (४) पितामहः |

**छात्रप्रवृत्तिः**

- अन्यसंस्कृतकवीनां परिचयं प्राप्नुवन्तु ।

**शिक्षकप्रवृत्तिः**

- भारविविषये किंवदन्तीः सम्प्राप्य छात्रेभ्यः कथयेत् ।

●

# ९ किरातार्जुनीयम्

**प्रस्तावना**

संस्कृतसाहित्ये पञ्च महाकाव्यानि सन्ति । तद्यथा रघुवंशम् – कालिदासः, कुमारसम्भवम् – कालिदासः, किरातार्जुनीयम् – भारविः, शिशुपालवधम् – माघः तथा च नैषधीयचरितम् – श्रीहर्षः । तेषु महाकाव्येषु भारवेः 'किरातार्जुनीयम्' अनुपमं स्थानं भजते । महाकाव्येऽस्मिन् अष्टादशसर्गाः सन्ति । मिलित्वा प्रायः महाकाव्येऽस्मिन् 1044 (एकसहस्राधिकचतुःचत्वारिंशत्) श्लोकाः सन्ति । अस्य कथावस्तु महाभारतस्य वनपर्वणि प्राप्यते । तत्र यथोचितं परिवर्तनं कृत्वा स्वकवित्वशक्त्या भारविना विरचितमिदं महाकाव्यम् । 'किरातार्जुनीयम्' कवेः एका एव रचना वर्तते।

अत्र वयं 'किरातार्जुनीयम्' महाकाव्यस्य प्रतिसर्गसारांशं तथा च दशश्लोकानाम् अध्ययनं करिष्यामः ।

---

**कथानकम्**

'किरातार्जुनीयम्' महाकाव्ये अष्टादश सर्गाः सन्ति । महाकविभारविप्रोक्तमिदं महाकाव्यं महाकाव्यस्य सर्व-लक्षणसम्पन्नम् उत्कृष्टं महाकाव्यं वर्तते । तथा च बृहत्त्रयी काव्येषु अन्यतमं मन्यते । एतस्य कथानकं महाभारतस्य वनपर्वणः उद्धृतमस्ति । काव्यस्यास्य प्रारम्भः 'श्री' शब्देन विभूषितः वर्तते । अस्य प्रत्येकसर्गान्ते 'लक्ष्मी' शब्दः प्रयुक्तः विद्यते । महाकाव्येऽस्मिन् इन्द्रकीलपर्वते अस्त्रलाभाय तपश्चर्यां कर्तुं गतस्य पाण्डुपुत्रस्य – अर्जुनस्य एवं किराताधिपतेः भगवतः शिवस्य युद्धं वर्णितमस्ति । कविना युद्धस्य प्रसङ्गं मुख्याधारं कृत्वा काव्यस्य विस्तारः कृतः वर्तते । तयोः युद्धमेव अत्र मुख्यत्वेन प्रतिपाद्यविषयः वर्तते । अतः एतस्य महाकाव्यस्य 'किरातार्जुनीयम्' इति नाम कृतमस्ति । अस्मिन् मकाकाव्ये राजनीतेः प्रदर्शनं कुर्वता कविना साम-दाम-दण्ड-भेदानां गम्भीरतया निरूपणं कृतमस्ति । भारतवर्षस्य प्राचीननारीणां विचाराः कियन्तः उपयुक्ताः आसन् तद् द्रौपदीवचनेन स्पष्टं भवति । भारविना पात्रानुसारं शब्दप्रयोगः कृतः वर्तते । तद् भीमोक्त्या विदितं भवति ।

काव्यस्यास्य नायकः धीरोदात्तः वर्तते । अत्र अर्जुनः नायकः किराताधिपतिशिवः प्रतिनायकश्च वर्तते । काव्यमिदं वीररसप्रधानमस्ति । अत्र दूतमुखकथनं किरातपतिशङ्करस्य वचनञ्च उद्दीपनविभावः, नायक एवं प्रतिनायकस्य धनुरादि आकर्षणं अनुभावः, धैर्यक्षमादि व्यभिचारभावाः, उत्साहः स्थायिभावः, शृङ्गारादि रसाङ्गं, पाञ्चाली रीतिः, प्रसादगुणश्चास्ति। दिव्यपाशुपतास्त्रप्राप्तिः महाकाव्यस्य फलमस्ति ।

## प्रतिसर्गस्य कथावस्तु

दुर्योधनेन द्यूते पराजितः धर्मराज-युधिष्ठिरः भीमार्जुननकुलसहदेवद्रौपदीभिः साकं द्वैतवने निवसति स्म । तत्र एकदा युधिष्ठिरः दुर्योधनस्य शासनसन्देशं ज्ञातुं वनेचरं प्रेषयति । दुर्योधनस्य राज्यं हस्तिनापुरं गत्वा, ब्रह्मचारिवेशः सः वनेचरः सर्वं वृत्तान्तं ज्ञात्वा युधिष्ठिरं प्रत्यागच्छत् । इतः 'किरातार्जुनीयम्' महाकाव्यस्यारम्भः भवति ।

**प्रथमसर्गः-**

वनेचरः महाराजं युधिष्ठिरं प्रणम्य कथयति यत् इदानीं दुर्योधनः नीतिपूर्वं राज्य-शासनं करोति । ममैषः राजधर्मः इति मत्वा सः मित्रशत्रून् च प्रति उचितं व्यवहरति । महान्तः राजानः तं नमन्ति । तस्य राज्ये उत्तमा कृषिव्यवस्था वर्तते । दुःशासनं युवपदे संनियुज्य स्वयं यज्ञेन अग्निं प्रसादयति । एवं छलजितं राज्यं नीत्या जेतुमिच्छति । एवं सुचारुशासनः अपि सः चर्चाप्रसङ्गे भवतां नाम श्रुत्वा व्यथितः भवति । सः सदैव भवतामहितं कामयति । एतत् सर्वं विदित्वा भवान् एव उचितं करोतु ।

सर्वं वृत्तान्तं श्रुत्वा तस्य योग्यं सत्कारं कृत्वा द्रौपद्यै भ्रातृभ्यश्च वनेचरोक्तं सर्वं वृत्तान्तं कथयति । श्रुत्वेदं द्रौपदी

खिन्नमना भवति । सा मौनं परित्यज्य सरोषं कथयति । हे नाथ ! जाया स्वामिनम् उपदिशति तन्नोचितं किन्तु मम हृदि प्रच्छन्नं दुःखं मां वक्तुं प्रेरयति । देवराज तुल्य-भवतां पूर्वजैः उपभुक्तमिदं राज्यम् एवं परिहातुं नार्हति भवान्।

एवमुक्त्वा युधिष्ठिरादीनां कष्टमयीं स्थितिं निरूप्य द्रौपदी युधिष्ठिरं पराक्रमाश्रयाय कथयति ।

**द्वितीयसर्गः-**

द्रौपद्याः वचनं श्रुत्वा भीमोऽपि क्रोधाविष्टः सन् कथयति यत् महाराज ! द्रौपद्या यदुक्तं तत् सर्वथा उचितमस्ति। सः स्वकीयं मन्तव्यं प्रस्तौति । भवतां समीपे देवविस्मापनं पौरूषमस्ति । इदानीं कदाचित् तावत् शक्तिः नास्ति । किन्तु यदि शत्रुविजयाय प्रयत्नं करिष्यति चेत् भवतां स्वागतं कृत्वा प्रजाः साहाय्यं करिष्यन्ति । अस्मान् आज्ञापयतु। शत्रुपक्षे भवदनुजानां पराक्रमस्य प्रतिकारं कर्तुं कः समर्थः वर्तते ? भीमस्य वचनं श्रुत्वा युधिष्ठिरः तं नीतिं दर्शयन् धैर्याश्रयं कर्तुं कथयति । यदा युधिष्ठिरः एवं भीमं कथयति तदा तत्र महर्षिः व्यासः समागच्छति । तेषाम् उचितं स्वागतं कृत्वा स्वयं युधिष्ठिरः व्यासेन सह तत्रोपविशति ।

**तृतीयसर्गः-**

व्यासागमनेन प्रसन्नः युधिष्ठिरः तेषामागमनस्य कारणं पृच्छति । महर्षिव्यासः युधिष्ठिरस्य प्रशंसां कृत्वा शत्रुबलाधिक्यं दर्शयन् दिव्यास्त्रं प्राप्तुं कथयति । मत्तः मन्त्रं सम्प्राप्य अर्जुनः इन्द्रं संतुष्टं कृत्वा दिव्यास्त्रं सम्प्राप्य विजयं शत्रुजयं कर्तुमर्हति । एवमुक्त्वा वेदव्यासः अर्जुनं समीपम् आह्वयति । मानं दत्त्वा तं कथयति यत् अर्जुन ! त्वं मम कथनानुसारं शस्त्रं धृत्वा मुनिवत् तपश्चर्यां कुरु । यक्षमेकं त्वया सह प्रेषयामि । सः तं तपःस्थलीं इन्द्रकीलपर्वतं प्रति नेष्यति। एवमुक्त्वा वेदव्यासः निर्गच्छति । गुह्यक नाम यक्षः तत्र समुपस्थितः भवति । अर्जुनः तेन सह तपः तप्तुम् इन्द्रकीलपर्वतं गच्छति ।

**चतुर्थसर्गः-**

शरदर्तोः रम्यः कालः प्रवर्तते स्म । मार्गदर्शकेन यक्षेण सह अर्जुनः गच्छति । कुत्रापि पङ्कः न दृश्यते । सरसि कमलानि विकसितानि सन्ति । वसुंधरा शस्यसम्पन्ना दृश्यते । अर्जुनः सर्वमिदं दृष्ट्वा प्रसन्नः भवति ।

तदा यक्षः शरदर्तोः वर्णनं कुर्वन् अर्जुनेन सह हिमालयमागच्छति ।

**पञ्चमसर्गः-**

इन्द्रकीलं समागतः अर्जुनः हिमालस्य वैभवं दृष्ट्वा प्रसन्नः भवति । यक्षः हिमालयस्य वर्णनं करोति । अर्जुन! अस्मिन्नेव हिमालये कैलासशिखरमस्ति । अत्र भगवान् शङ्करः स्वगणैः सार्धं निवसति । एषः इन्द्रकीलपर्वतः अतीव मनोहरः वर्तते । अर्जुन ! अत्र त्वं शस्त्रं धृत्वा तपश्चर्यां कुरु । तपश्चर्याकाले विघ्नविहितं भवन्तमभिरक्षतु भगवान् शिवः । एवमुक्त्वा यक्षः निर्गच्छति । अर्जुनः तत्रैव तिष्ठति ।

**षष्ठसर्गः-**

इन्द्रकीलस्य शोभां दृष्ट्वा प्रसन्नः अर्जुनः तपः कर्तुं उद्यतः भवति । संयतेन्द्रियः अर्जुनः तपश्चर्यां करोति धृतशस्त्रोऽपि अर्जुनः सरलः दृश्यते । अर्जुनः शीलेन सज्जनानां मनः जयति । अर्जुनस्यानने दिव्यतेजो दृश्यते । तपश्चर्यामग्नमर्जुनं दृष्ट्वा हिंसकपशवः हिसां त्यजन्ति । सुखदः शीतलः वातः वाति । वनं नवपल्लवयुतं भवति । निर्मलं नभः प्रसन्ना च वसुंधरा दृश्यते ।

अर्जुनस्य तपश्चर्यां दृष्ट्वा जनाः इन्द्र-सकाशं गत्वा तपश्चर्यायाः वर्णनं कुर्वन्ति । इन्द्रः अर्जुनस्य परीक्षां करोति।

**सप्तमसर्गः-**

अधुना मार्गे अतीव आतपः वर्तते । तेषां शरीरात् प्रस्वेदः निर्गच्छति किन्तु यदा ते (इन्द्र-प्रेषित गन्धर्वाप्सरसः) हिमालस्य मन्दाकिनीसमीपं गच्छन्ति तदा सर्वेषां परितापः दूरीभवति । सर्वे अर्जुनस्य तपश्चर्यायां विघ्नं कर्तुं वार्तालापं कुर्वन्ति । एतेषामागमनेन इन्द्रनीलः नगरवत् प्रतिभाति ।

**अष्टमसर्गः-**

सर्गेऽस्मिन् गन्धर्वाणां देवकन्यानाञ्च वनपुष्पचयनक्रीडारम्भः भवति अनन्तरं तेषां जलक्रीडावर्णनमत्र कृतमस्ति।

**नवमसर्गः-**

नवमसर्गस्यारम्भे सूर्यास्तवर्णनमस्ति । शनैः शनैः सूर्यास्तान्ते चन्द्रोदयस्य वर्णनं वर्तते । तदा गन्धर्वदेवकन्यानां विहारक्रीडायाः प्रारम्भः भवति । विहारक्रीडायां तेषां रात्रिः व्यतीता भवति । अत्र भारविना तेषां सुरतकेलिवर्णनं, मदिरापानवर्णनं पुनश्च सुरतवर्णनं कृतं ततः प्रभातवर्णनं कृतम् अस्ति ।

**दशमसर्गः-**

सूर्योदयान्ते देवकन्याः शृङ्गारादिप्रसाधनं कृत्वा तपोनिष्ठस्य अर्जुनस्य समीपं समागच्छन्ति । ताः नानाविधयत्नैः अर्जुनस्य तपोभङ्गं कर्तुमिच्छन्ति । गङ्गातटे अर्जुनः निश्चलः वर्तते । तस्य शरीरात् दिव्यप्रभा निःसरति । तस्य परिवेशः मुनिवत् वर्तते । किन्तु तेजसा सः इन्द्रवत् प्रतिभाति । ततः अर्जुनं समाक्रष्टुं प्रयत्नः भवति । गन्धर्वाणां वीणागानं भवति । सर्वाः ऋतवः एकस्मिन्नेव समये तत्र समागच्छन्ति । मेघमालया गगनमाच्छादितं भवति । विद्युल्लताः दृग्गोचराः भवन्ति । वृष्ट्या तपोवनमाद्रं भवति । तत्र कोकिलाः मधुरं गायन्ति । मालतीकुसुमानि विकसन्ति । मलयानिलः मनः संहरते । तत्र ऋतवः स्वप्रभावं दर्शयन्ति । तदा सुरकन्याः स्वकीयं नृत्यं कृत्वा भावभङ्गिमाद्वारा अर्जुनं समाक्रष्टुं प्रयत्नं कुर्वन्ति । किन्तु तेषामायासः निष्फलः भवति । अन्ते हताशयाः सर्वाः स्वर्गं गच्छन्ति ।

**एकादशसर्गः-**

ततः मुनिवेशं धृत्वा इन्द्रः स्वयं परीक्षां कर्तुं समागच्छति । अर्जुनः तस्योचितं सत्कारं करोति । इन्द्रः अर्जुनं कथयति यत् सज्जनाः मोक्षप्राप्त्यर्थं तपः कुर्वन्ति किन्तु त्वं कथं शस्त्रं धृत्वा तपः तपसि ? अर्जुनः प्रत्युत्तरं ददाति। अहं मोक्षप्राप्तये न तपश्चरामि अपि तु शत्रुविजयाय तपः करोमि । तत्र भगवतः व्यासस्य आज्ञयाऽहं सशस्त्रः तपश्चरामि। अहं भगवन्तमिन्द्रं प्रसादयितुं तपः करोमि । अर्जुनस्य वचनं श्रुत्वा इन्द्रः दिव्यरूपेण उपस्थितः सन् अर्जुनमालिङ्ग्य शिवाराधनं कर्तुं कथयति । लोकपालैः सह अहं तव साहाय्यं करिष्यामि इत्युक्त्वा स्वधाम प्रति गच्छति ।

**द्वादशसर्गः-**

इन्द्रवचनं श्रुत्वा अर्जुनः निर्भयः सन् भगवतः शिवस्याराधनं करोति । अर्जुनस्य कठिनां तपश्चर्यां विलोक्य ऋषयः शिव-समीपं गच्छन्ति । अर्जुनकृतां तपश्चर्यां वर्णयन्ति । ऋषिवचनं श्रुत्वा भगवान् शङ्करः कथयति यत् एषः पुरुषः बद्रिकाश्रमस्थितस्य भगवतः नारायणस्य अंशः वर्तते । शत्रुपराजयार्थं सः तपः तपति ।

देवकार्ये रतम् अर्जुनं दृष्ट्वा 'मूक' नामाभिधः दानवः वराहरूपं धृत्वा छलेन तस्योपरि आक्रमणं करिष्यति । तस्मिन् समये किरातरूपः अहं तस्य वधं करिष्यामि । अर्जुनोऽपि तस्य वधार्थं शरप्रयोगं करिष्यति । तदा आवयोः युद्धं भविष्यति । तदा भवन्तः सर्वे अर्जुनस्य पराक्रमं द्रक्ष्यन्ति । भगवता यथोक्तं तथा 'मूक' अर्जुनस्योपरि आक्रमणं करोति । किरातैः साकं भगवान् शिवः तम् अनुगच्छति ।

**त्रयोदशसर्गः-**

वराहरूपेणागतं मूकदानवं दृष्ट्वा अर्जुनः मनसि तर्कवितर्कं करोति । शिवस्य शरेण वराहः विक्षतः भवति ।

अर्जुनोऽपि स्वकीयं शरं प्रहरति । येन आहतः दानवः प्राणत्यागं करोति । अर्जुनः स्वशरं गृहीतुम् गच्छति तदा किरातदूतः तत्र आगच्छति तयोः मध्ये उग्रं वाग्युद्धं भवति ।

**चतुर्दशसर्गः-**

अर्जुनोऽपि प्रतिवदति । पुनरागतः किरातः भगवन्तं शिवं सर्वं निवेदयति । शिवः प्रसन्नः भवति । तथापि अर्जुनस्योपरि आक्रमणं कर्तुं कथयति । परस्परं बाणवृष्टिः भवति । किरातबलं पलायनं करोति । केचन मूर्च्छिताः भवन्ति ।

**पञ्चदशसर्गः-**

महादेवस्य भूतगणोऽपि भयान्वितः सन् पलायते । महादेवं एकाकिनं दृष्ट्वा अर्जुनः अन्येन किरातपतिना (स्कन्देन) सह योद्धुं गच्छति । कार्तिकेयस्य सैनिकाः अपि विक्षताः भवन्ति । तेऽपि पलायनं कुर्वन्ति । कार्तिकेयः तान् पुनः आह्वयति । शिवोऽपि तान् पुनः युद्धार्थमाह्वयति । पुनः द्वयोः मध्ये अद्भुतं युद्धं भवति । अर्जुनस्य पराक्रमं दृष्ट्वा भगवान् शिवः हृदि प्रसन्नः भवति ।

**षोडशसर्गः-**

किरातार्जुनयोः घोरं युद्धं भवति । तत्र किरातस्य वीरत्वं पश्यन् अर्जुनः आश्चर्यचकितः भवति । अर्जुनः प्रस्वापनं शस्त्रं प्रयुज्य सर्वं बलं मूर्च्छितं करोति । सर्वत्र अन्धकारः भवति । तस्मिन्नेव काले आशुतोषललाटात् दिव्यं तेजः प्रकटितं भवति । तेन अन्धकारः नश्यति । पुनः तयोः युद्धं भवति । तत्र नानाविधशस्त्राणां प्रयोगः भवति । अर्जुनः सामान्यशस्त्रैः स्ववीरतां प्रदर्शयति ।

**सप्तदशसर्गः-**

इदानीं किरातपतिः शिवः भयङ्करं रूपं धारयति । अर्जुनस्य वर्म (कवचं) नष्टं भवति । अर्जुनः चापान्ते खड्गं तदन्ते पाषाणवृष्टिं करोति ।

**अष्टादशसर्गः-**

तदा अर्जुनः बाहुयुद्धं कर्तुं धावति । किरातार्जुनयोः द्वन्द्वयुद्धं भवति । तेन इन्द्रनीलपर्वतः कम्पायमानः भवति। अर्जुनः शिवस्य चरणयोः पतति । आशुतोषः सदाशिवः प्रसन्नः भवति ।

तदनन्तरं भगवान् शिवः निजरूपं प्रकटयति । तेन अर्जुनः भक्तियुक्तहृदयः भवति । जलवर्षा पुष्पवर्षा च भवति। इन्द्र-वरुण-यम-कुबेर इत्यादयः लोकपालाः तत्रागत्य शिवं स्तुवन्ति अर्जुनाय च आशिषः ददति ।

अर्जुनः स्वतपश्चर्यां सफलां ज्ञात्वा सन्तुष्टः भवति । भगवतः स्तुतिं करोति । अपराधस्य क्षमां याचते । अभीष्टसिद्ध्यर्थं प्रार्थयते । दिव्यास्त्राणां याचनां करोति ।

आशुतोषः शङ्करः पाशुपतास्त्रं तस्मै ददाति । धनुर्वेदः अर्जुनाय विद्यां प्रददाति । इन्द्रादिदेवाः विजयार्थं अमोघशस्त्राणि ददति । ततः भगवान् शिवः अर्जुनं शत्रुविजयाय आज्ञापयति । भगवतः चरणयोः प्रणामं कृत्वा, देवानां प्रशंसां संप्राप्य सः पुनः वनं प्रत्यागच्छति ।

## किरातार्जुनीयश्लोकाः

**श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।**

**स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥ (1-1)**

**अन्वयः-** कुरूणां अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुम् यं अयुङ्क्त सः वर्णिलिङ्गी वनेचरः विदितः (सन्) द्वैतवने युधिष्ठिरं समाययौ ।

**व्याख्या-** कुरूणाम् अधिपस्य - कुरुप्रदेशनृपस्य (दुर्योधनस्य), श्रियः - राजलक्ष्म्याः, पालनीं - रक्षणं कर्त्रीम् प्रजासु - जनेषु, वृत्तिम् - व्यवहारम्, वेदितुम् - ज्ञातुम्, यम् - वनेचरम्, अयुङ्क्त - नियुक्तवान्, सः - वनेचरः, वर्णिलिङ्गी- ब्रह्मचारिवेषवान्, वनेचरः- किरातः, विदितः - विदितं वेदनम् अस्यास्ति इति । द्वैतवने - तन्नाम्नि अरण्ये, युधिष्ठिरं - धर्मराजं, समाययौ - सम्प्राप्तः ।

**सरलार्थः-** कुरुराज्ञः (दुर्योधनस्य) राजलक्ष्म्याः पालनक्षमं जनव्यवहारं ज्ञातुं युधिष्ठिरेण नियुक्तः सः ब्रह्मचारिवेषधारी वनेचरः सर्वं ज्ञात्वा द्वैतवने युधिष्ठिरस्य समीपमागच्छति ।

**क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।**

**अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥ २ ॥ (1-4)**

**अन्वयः-** हे नृप ! क्रियासु युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः न वञ्चनीयाः । अतः साधु असाधु वा क्षन्तुम् अर्हसि । (हि) हितं मनोहारि च वचः दुर्लभम् (अस्ति) ।

**व्याख्या-** हे नृप !- हे भूप, क्रियासु - कृत्यवस्तुषु, युक्तैः - नियुक्तैः, अनुजीविभिः - भृत्यैः, चारचक्षुषः - चाराः चक्षूंषि येषां ते, प्रभवः - क्षितिपतयः, न वञ्चनीयाः - न प्रतारणीयाः, अतः असाधु - अप्रियं, साधु वा - प्रियं वा, क्षन्तुम् - सोढुम्, अर्हसि - क्षमः असि, हि - यतः, हितं - पथ्यं, मनोहारि - प्रियं, वचः दुर्लभम् - दुष्करं, अस्ति - वर्तते इत्यर्थः ।

**सरलार्थः-** हे राजन् ! कार्येषु नियुक्तैः भृत्यैः चारचक्षुषः प्रभवः न वञ्चनीयाः । अतः मम वचनं प्रियं अप्रियं वा स्यात् भवान् क्षन्तुम् अर्हति । यतो हि हितकरं मनोहरं, प्रियं वचः जगत्यस्मिन् दुर्लभम् अस्ति ।

**विहाय शान्तिं नृप ! धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम् ।**

**व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥ ३ ॥ (1-42)**

**अन्वयः-** हे नृप ! प्रसीद शान्तिं विहाय, विद्विषां वधाय पुनः तत् धाम संधेहि । निस्पृहाः मुनयः शमेन शत्रून् अवधूय सिद्धिं व्रजन्ति । न भूभृतः ।

**व्याख्या-** हे नृप ! प्रसीद - प्रसन्नो भव। शान्तिं विहाय - शान्तिं त्यक्त्वा, विद्विषां वधाय - शत्रूणां विनाशाय, पुनः - भूयः, तत् धाम - तत् प्रसिद्धं तेजः, संधेहि - अङ्गीकुरु, निःस्पृहाः - स्पृहारहिताः, मुनयः - ऋषयः, शमेन - शान्त्या, शत्रून् - रिपून्, अवधूय - निर्जित्य, सिद्धिं - सफलतां, व्रजन्ति - प्राप्नुवन्ति, न भूभृतः - न नृपतयः ।

**सरलार्थः-** हे नृप ! प्रसन्नो भव । इदानीं शान्तिं त्यक्त्वा शत्रूणां विनाशाय पुनः तत् प्रसिद्धं तेजः अङ्गीकुरु । कारणं शान्त्या शत्रून् अवधय एव ऋषयः सफलतां (सिद्धिं) प्राप्नुवन्ति, न नृपतयः ।

**इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।**

**ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥ ४ ॥ (2-5)**

**अन्वयः-** इष्टगुणाय भवते अपि, रुचिरार्था इयम् भारती रोचताम् । गुणगृह्या, विपश्चितः, वचने वक्तृविशेषनिःस्पृहा ननु ।

**व्याख्या-** इष्टगुणाय - गुणग्राहिण इत्यर्थः । भवते - तुभ्यमपि, रुचिरार्था - रुचिहेतूक्तिः, इयं भारती - इयं वाणी, (द्रौपदीवाक्यं) रोचताम् - स्वदताम्, गुणगृह्याम् - गुणपक्षपातिनः, विपश्चितः - विद्वांसः, वचने - विषये, वक्तृविशेषनिःस्पृहा - स्त्रीपुंसादिलक्षणे निरास्थाः खलु । 'बालादपि सुभाषितं ग्राह्यम्' इति ।

**सरलार्थः-** वचनस्य मूल्यं ज्ञेयं, वक्ता कः वर्तते इति चिन्तनं न करणीयम् । यः गुणप्रियोऽस्ति सः अर्थसम्पन्नां मधुरां गिरां पश्यति । गुणपक्षपातिनः विद्वांसः वक्तुः भेदं नावलोकयन्ति ।

**ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।**

**अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः ॥ ५ ॥ (2-20)**

**अन्वयः-** जनः भस्मनां चयम् आस्कन्दति, न ज्वलितं हिरण्यरेतसम् । अतः मानिनः अभिभूतिभयात् सुखम् असून् उज्झन्ति, न धाम ।

**व्याख्या-** जनः - मनुष्यः, भस्मनां चयं - भस्मपुञ्जम्, आस्कन्दति - आक्रमति, न ज्वलितं - न प्रज्वलितं, हिरण्यरेतसम् - (हिरण्यं रेतो यस्य तं) अग्निं (आस्कन्दति) दाहकत्वात् इति भावः । अतः - हेतोः, मानिनः - स्वमानिनः, अभिभूतिभयात् - पराभवभयात्, सुखम् - सुखेन, असून् - प्राणान्, उज्झन्ति - त्यजन्ति, न धाम - न पराक्रमम् ।

**सरलार्थः-** मानवः भस्मपुञ्जम् आस्कन्दति न तु प्रज्वलितम् अग्निम् आक्रमति । अतः स्वाभिमानिनः अपयशोभयात् सुखेन प्राणान् त्यजन्ति किन्तु स्वपराक्रमं न त्यजन्ति इति भावः ।

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।**

**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ ६ ॥ (2-30)**

**अन्वयः-** सहसा क्रियां न विदधीत । अविवेकः आपदां परं पदम् । गुणलुब्धा सम्पदः विमृश्यकारिणम् स्वयमेव वृणुते ।

**व्याख्या-** सहसा - अकस्मात् (आकस्मिकम्), क्रियां - कार्यं, न विदधीत - न कुर्यात् । अविवेकः - अविमृश्यकारित्वं (अविनयः), आपदाम् - विघ्नानां (विपदां), पदम् - स्थानम् । गुणलुब्धाः - गुणग्राहिण्यः, सम्पदः - श्रियः, विमृश्यकारिणम् - विचार्यकार्यकारिणं, स्वयमेव वृणुते - स्वयमेव भजन्ते ।

**सरलार्थः-** सहसा कार्यं न कुर्वीत । अविनयः आपदां परं धाम वर्तते । गुणग्राहिण्यः श्रियः विचार्यकर्तृकं स्वयमेव भजन्ते ।

**अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः सम्प्रति भूमिदेवाः ।**

**आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद् बहुमानपात्रम् ॥ ७ ॥ (3-6)**

**अन्वयः-** अद्य त्वयि आगते क्रतूनां क्रियाः कामदुघाः जाताः, सम्प्रति भूमिदेवाः सत्याशिषः, आसंसृतेः जगत्सु यत् बहुमानपात्रं जातः ।

**व्याख्या-** अद्य - अद्यदिने, त्वयि आगते - तव आगमनेन, क्रतूनां - यज्ञानाम्, क्रियाः - अनुष्ठानानि, कामदुघाः - फलदाः, जाताः - सञ्जाताः - सम्प्रति अधुना, भूमिदेवाः - ब्राह्मणाः, सत्याशिषः - सत्याशीर्वादाः, आसंसृतेः - आसंसारात्, जगत्सु - लोकेषु, बहुमानपात्रं - बहुयोग्यताभाजनम्, जातः - सञ्जातः ।

**सरलार्थः-** भवताम् आगमनेन अद्य मे सर्वाः क्रियाः सफलाः सञ्जाताः । ब्राह्मणानाम् आशिषः सत्याः जाताः । संसारस्य आरम्भात् अद्य अहं बहुमानभाजम् अभवम् ।

**लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः ।**

**अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ ८ ॥ (3-17)**

**अन्वयः-** तव विक्रमेण धरित्री लभ्या, विपक्षः वीर्यास्त्रबलैः ज्यायान् अतः प्रकर्षाय विधिः विधेयः हि रणे जयश्रीः प्रकर्षतन्त्रा ।

**व्याख्या-** तव - भवतः, विक्रमेण - पराक्रमेण, धरित्री - धरा, लभ्या - सुलभ्या, विपक्षः -शत्रुः, वीर्यास्त्रबलैः - शौर्यास्त्रसैन्यैः, ज्यायान् - प्रशस्यतरः, प्रकर्षाय - आधिक्याय, विधिः - उपायः, विधेयः - कर्तव्यः, हि - नूनं, रणे- समरे, जयश्रीः - राज्यलक्ष्मीः, प्रकर्षतन्त्रा - प्रकर्षप्रधाना ।

**सरलार्थः-** पराक्रमाश्रयेणैव भवान् धरित्र्याः अधिकारं प्राप्तुमर्हति । भवतां शत्रुः बलास्त्राभ्यां प्रशस्यतरः वर्तते । अतः बलाधिक्याय भवता उपायः चिन्तनीयः कारणं राज्यलक्ष्मीः (विजयलक्ष्मीः) प्रकर्षाधीना विद्यते ।

**ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषम् ।**

**उवाच यक्षस्तमचोदितोऽपि गां न हीङ्गितज्ञोऽवसरेऽवसीदति ॥ ९ ॥ (3-20)**

**अन्वयः-** ततः सः शरद्गुणश्रियम्, शरद्गुणालोकनलोलचक्षुषम्, तम् अचोदितः उवाच, हि इङ्गितज्ञः, अवसरे, न अवसीदति ।

**व्याख्या-** ततः - तदनन्तरम्, सः - पूर्वोक्तः यक्षः, शरद्गुणश्रियम् - शरदर्तोः शोभां, शरद्गुणालोकनलोलचक्षुषम् - शरदर्तोः शोभा - अवलोकनेन चलदृष्टिम्, तम् - अर्जुनम्, अचोदितः - अपृष्टः, उवाच - उक्तवान्, हि - यतः, इङ्गितज्ञः - भावज्ञः, अवसरे - उक्तियोग्ये काले, न अवसीदति - न वाचं यच्छति ।

**सरलार्थः-** सः यक्षः शरद्कालगुणानां शोभां दृष्ट्वा शरद्कालशोभादर्शने संसक्तनयनम् अर्जुनम् अपृष्ट्वा अवदत् कारणं अभिप्रायज्ञाता जनः समये लब्धे सति मूकः न भवति । अर्थात् यक्षः अर्जुनस्य मनोगतभावान् ज्ञात्वा वार्तालापाय किञ्चित् उक्तवान् ।

**व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।**

**प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृत्ताङ्गान्निशिता इवेषवः ॥ १० ॥ (1-30)**

**अन्वयः-** ते मूढधियः पराभवम् व्रजन्ति ये मायाविषु मायिनः न भवन्ति, ते शठाः तथाविधान् असंवृत्ताङ्गान् प्रविश्य हि निशिताः इषवः इव घ्नन्ति ।

**व्याख्या-** ते - तथोक्ताः जनाः, मूढधियः - निर्विवेकबुद्धयः, पराभवम् - पराजयम्, व्रजन्ति - प्राप्नुवन्ति, ये मायाविषु - मायावत्सु, मायिनः - मायावन्तः, न भवन्ति - न स्युः, ते शठाः - ते दुष्टपुरुषाः, तथाविधान् - तथोक्तान्, असंवृत्ताङ्गान् - अनाच्छादितशरीरान्, निशिताः - तीक्ष्णाः, इषवः - शराः, इव - वत्, घ्नन्ति - निघ्नन्ति ।

**सरलार्थः-** ते अविवेकिनः जनाः सर्वदा पराजयं प्राप्नुवन्ति । ये मायावत्सु मायावन्तः न भवन्ति । ते दुर्जनाः तथाविधान् अनाच्छादितशरीरान् तीक्ष्णाः शराः इव निघ्नन्ति ।

## स्वाध्यायः

१. **प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) अर्जुनः किमर्थं तपश्चर्यां करोति ?

(क) धनलाभाय (ख) राज्यलाभाय (ग) अस्त्रलाभाय (घ) यशोलाभाय

(२) महाकाव्येऽस्मिन् प्रधानरसः कः ?

(क) शृङ्गारः (ख) करुणः (ग) वीरः (घ) हास्यरसः

(३) युधिष्ठिरः कुत्र निवसति ?

(क) दण्डकवने (ख) बद्रिवने (ग) द्वैतवने (घ) अद्वैतवने

(४) 'द्रौपद्या यदुक्तं तत् सर्वथा उचितमस्ति' इति वाक्यं कः वदति ?

(क) अर्जुनः (ख) नकुलः (ग) भीमः (घ) सहदेवः

(५) कस्यागमनेन युधिष्ठिरः प्रसन्नः भवति ?

(क) दुर्योधनस्य (ख) किरातस्य (ग) वनेचरस्य (घ) व्यासस्य

(६) किं नामा यक्षः अर्जुनं तपःस्थलीं नयति ?

(क) मरुत्वान् (ख) गुह्यकः (ग) सुदर्शनः (घ) नीलग्रीवः

(७) कः दानवः वराहरूपेण अर्जुनम् आक्रमति ?

(क) मूकः (ख) मयः (ग) शम्बरः (घ) दुर्मदः

(८) कैः प्रभवः न वञ्चनीयाः ?

(क) स्वजनैः (ख) भ्रातृभिः (ग) सुहृदयैः (घ) अनुजीविभिः

(९) जनः .................. चयम् आस्कन्दति ?

(क) ज्वलितमग्नेः (ख) भस्मनाम् (ग) शान्ताग्नेः (घ) तेजसः

(10) अद्य ..................... आगते क्रियाः कामदुघाः जाताः ।

(क) तव (ख) त्वयि (ग) त्वया (घ) तुभ्यम्

२. **अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) महाकाव्यस्य प्रारम्भः केन शब्देन विभूषितः वर्तते ?

(२) दुर्योधनः कान् प्रति समानं (उचितं) व्यवहरति ?

(३) कस्योक्तिं श्रुत्वा भीमः क्रोधाविष्टः भवति ?

(४) कयोः द्वयोः घोरं युद्धं भवति ?

(५) शिवः किं नाम अस्त्रम् अर्जुनाय ददाति ?

३. **अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) दशमसर्गस्य सारांशं लिखत ।

(२) 'किरातार्जुनीयम्' शीर्षकस्य यथार्थतां चर्चयत ।

(३) भारवेः अर्थगौरवं सोदाहरणं निरूपयत ।

**४. टिप्पणी लेख्या ।**

(१) तपोनिष्ठः अर्जुनः ।

(२) किराताधिपतिशङ्करः ।

(३) युधिष्ठिरः ।

**५. सूचनानुसारम् उत्तरं लिखन्तु ।**

**अधोदत्तसूक्तीनां विस्तारं कुरुत ।**

(१) हितं मनोहारि च दुर्लभं वचः ।

(२) शमेन सिद्धिं मुनयो न भूभृतः ।

(३) प्रकर्षतन्त्रा हि रणे जयश्रीः ।

**श्लोकपूर्तिं कुरुत ।**

(४) श्रियः कुरूणाम् ................. द्वैतवने वनेचरः ।

(५) सहसा विदधीत ................ स्वयमेव सम्पदः ।

**छात्रप्रवृत्तिः**

- किरातार्जुनीयस्य अन्यश्लोकान् सम्प्राप्य अर्थं जानन्तु ।

**शिक्षकप्रवृत्तिः**

- अन्यमहाकाव्येन सह अस्य तुलनात्मकम् अध्ययनं कृत्वा छात्रेभ्यः विनिवेदयेत् ।

●

# १० महाकविः माघः

## प्रस्तावना

### जन्मसमयः कृतिविशेषताश्च ।

संस्कृतसाहित्यस्याकाशे देदीप्यमानतारकरूपाः बहवः कवयः सन्ति तत्र महाकविः माघः अन्यतमः कविवरः । एकया कृत्या अद्यापि विद्वद्भिः संस्मर्यते । **'एकश्चन्द्रः तमो हन्ति न च तारागणोऽपि च'** । शिशुपालवधेनैकेन महाकाव्येन महाकविमाघः घण्टामाघेनोपाधिना राराजते ।

यद्यपि संस्कृतसाहित्ये सहस्राधिककवयस्सन्ति येषां ग्रन्थरत्नानि नितरां राजन्ते । तथापि विदुषां कथनानुसारं रघुवंशम्, कुमारसंभवम्, मेघदूतम्, किरातार्जुनीयम्, नैषधीयचरितम् एवञ्च शिशुपालवधम् इमानि षट्काव्यानि सविशेषतो अध्ययनाध्यापनक्षेत्रे प्रचलितानि सन्ति ।

---

### महाकविमाघस्य जन्म-समयः-

महाकवेः माघस्य पिता दत्तकः परमौदार्यगुणेन दानीपुरुषेण प्रसिद्धश्चासीत् । स्वाश्रये बहून् जनान् स दत्तकत्वेन स्थापयति स्म । तेन **''सर्वाश्रयदाता''** इति उपाधिना स प्रथितः प्रसिद्धश्चासीत् । माघस्य पितामहः सुप्रभदेवश्चासीत्। स च वर्मलात (वर्मनाभ, धर्मनाभ, धर्मलात) नाम्नः राज्ञः मन्त्री चासीत् । महाकविमाघस्य स्वरचिते कविवंशवर्णनेन एतावदेव परिचयः प्राप्यते ।

माघस्य जन्म भीनमल्लाख्यनगरे अभवत् ।

अत्रैव भीनमल्ले स्थित्वा ज्योतिषाचार्यो ब्रह्मगुप्तो ब्रह्मस्फुटसिद्धान्तनामकं ग्रन्थं रचितवान् । पितुर्दानशीलतायाः प्रभावो माघस्योपरि अपि पतितश्चासीत् । असीमदानदोषेणायं निर्धनत्वं गतः ।

भोजेन माघस्य मैत्रीभावेन तस्मै धनसाहाय्यं दत्वोपकारः कृतः । अत्र भोजस्य माघस्य चासमकालिकत्वेन साहाय्यवृत्तान्तमसत्यमातिष्ठते । परं भोजस्यैकस्य भिन्नकालिकत्वेऽपि परस्य भोजस्य तत्कालजातत्वे न किमपि हीयते । कर्नल टॉड नाम्ना महाशयेन त्रयो भोजाः सप्रमाणं स्वीकृतास्सन्ति । तस्मान्माघकालेऽपि भोजस्य सद्भावः सम्भवति ।

### माघस्य समयः-

वसन्तगढनामके स्थाने एकः शिलालेखः प्राप्तः स हि ६२५ ई. वर्षे उत्कीर्णो विद्यते । तत्र वर्मलात इति नाम लिखितम् अतः सप्तमशतकप्रारम्भो माघस्य समयो निश्चीयते । माघस्य काव्ये द्वितीयसर्गे एकः श्लोकः समागच्छति ।

> **अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना ।**
>
> **शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥**

अत्र श्लोके वृत्तिन्यासशब्दयोः प्रयोगेण वृत्तिन्यासकर्तुः माघस्य पश्चात् भाविना भवितव्यम् । वृत्तिकर्ता जयादित्यश्च ६६१ ई. वर्षे मृत इति इत्सिङ्गकथनम् अतो माघः अष्टमशताब्द्यां समुद्भूतः स्यान्न तु ततः पूर्वमिति केचनाभिप्रयन्ति। परन्तु तत्र युक्तम् ततः प्राचीनस्यापि वृत्तिग्रन्थस्य प्रमाणसिद्धत्वात् । यदि जयादित्यात्पूर्वं वृत्तिग्रन्थो नाभविष्यत् तदा बाणेन वृत्तेश्चर्चा स्वीये हर्षचरिते कथमकरिष्यत् ? उक्तं हि तेन हर्षचरिते **''प्रसन्नवृत्तयो गृहीतवाक्याः कृतपदन्यासा लोक इव व्याकरणेऽपि अतो माघेनापि वृत्तिन्यासौ स्मृताविति तत्समयस्य पूर्वोक्ते निश्चये न कापि विचिकित्सा ।''**

भारवेरर्थतोऽनुकरणं माघकाव्ये प्राप्यते इत्यप्यस्य समयनिश्चयं समर्थ्यते । माघस्य समयविषये विद्वत्सु मतभेदः वर्तते। केचन एकादशशताब्द्यां मध्यभागे तथा च तृतीयमतेन सप्तमशताब्द्याम् उत्तरार्धे परिगणयन्ति । प्रचुरप्रमाणेन सप्तमशताब्द्याः उत्तरार्धकालः न्यायसङ्गतेन प्रमाणीभवति ।

महाकवेर्माघस्य कालनिर्णये एकं प्रमाणं तदपि प्राप्यते डॉ. किलहार्न वसन्तगढ नाम्नः स्थानकात् एकं शिलालेखं प्राप्नोति । शिशुपालवधकाव्यहस्तप्रतानुसारेण च सुप्रभदेवस्याश्रयदातुर्नाम वर्मलात नाम्नः भिन्नं मिलति । भिन्नमालसमीपे ये प्रदेशास्सन्ति तस्मात् शिलालेखात् डॉ. किलहार्न महोदयः वर्मलात इति आश्रयदातुर्नाम प्रमाणीकरोति । स एव वर्मलात नाम्नः नृपः सुप्रभदेवस्य माघस्य पितामहस्य आश्रयदाता आसीदिति स्वीकरोति । तेन माघस्य समयः सप्तमशताब्द्याः उत्तरार्ध एव स्वीकारणार्हः वर्तते ।

### महाकवेर्माघस्य कृतिः-

महाकवेरेतस्य गौरवाधायकं ग्रन्थरत्नमेकमेव शिशुपालवधनामकम् उपलभ्यते । अस्मिन् महाकाव्ये विंशतिः सर्गाः १६४५ श्लोकाश्च सन्ति । पञ्चदशतमे सर्गे क्षेपकाः चतुस्त्रिंशत् श्लोकाश्च विद्यन्ते । ग्रन्थान्ते च कविवंशवर्णनश्लोकाः पञ्च, तेषामपि समाहारे संयोगेन श्लोकसङ्ख्या १६८९ भवति ।

महाकविमाघस्य सुप्रसिद्धा एकैव कृतिरस्ति तत्तु सर्वविदितमेवास्ति किन्तु शिशुपालवधस्य व्याख्याः टीकाकारैः बहुधा कृतास्सन्ति । आहत्य अष्टादश टीकाः शिशुपालवधमहाकाव्ये लिखितास्सन्ति तासु सर्वास्वपि टीकासु ''**मल्लिनाथस्य सर्वाङ्कषा**'' व्याख्या एव सर्वत्र समुपलभ्यते । सर्वाङ्कषा टीका विद्वत्प्रिया श्रेष्ठा च वर्तते ।

### महाकविमाघस्य विशेषताः-

यदा माघस्य वा तत्कृतेः समुल्लेखो भवति तदा एकं वाक्यमागच्छति ''**माघे सन्ति त्रयो गुणाः**'' तर्हि ते त्रयः गुणाः के ? सुप्रसिद्धं पद्यं तदुत्तरे वर्तते ।

**उपमा कालिदासस्य भारवेरर्थगौरवम् ।**

**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥**

यदा माघस्य विशेषता प्रतिपादनीया भवति तदा कालिदासग्रन्थावल्यां या उपमाः यो वा उपमालङ्कारः वर्तते तादृश्य एव उपमाः माघग्रन्थे प्राप्यन्ते । उपमायां माघः कालिदास इव । अर्थगौरवे अर्थप्राचुर्ये प्रौढार्थे अर्थचमत्कृतो यत् स्थानं भारवेः तादृशमेव गौरवपूर्णं स्थानं माघस्यापि वर्त्तते । शब्दलालित्यं पदलालित्यं यथा दण्डिनः तथैव माघग्रन्थे शिशुपालवधे पदानां शब्दानां चमत्कृतिः दरीदृश्यते । माघः नाम कालिदासस्य भारवेः दण्डिनञ्च समन्वयः कुत्रचिदेकत्रावलोक्यते चेत् स माघः ।

द्वितीयं माघस्य ग्रन्थविषयकं गौरवं तदस्ति यत् ''**नवसर्गगते माघे नवशब्दो न विद्यते**'' **।** शिशुपालवधमहाकाव्ये नवसर्गान्तं यावदेकस्य शब्दस्य पुनः प्रयोगो न भवति । अर्थात् शब्दसमृद्धिः, कोशसमृद्धिः माघस्य तावती आसीत् येन नव नव शब्दाः नवसर्गं यावत् प्रयुक्ताः एकस्य शब्दस्य न पुनरावृत्तिरिति भावः ।

महाकवि माघः विद्यतोमानं स्वप्रतिमानिरस्तान्यतेजः प्रसरम् अनुपमं नक्षत्रम् । माघस्यापूर्वं वैदुष्यं द्योतमानं निखिलं संस्कृतसाहित्यवाङ्मयम् । विविधानां शास्त्राणामवगाहनत्वं कियदासीत् तदवगम्यते शिशुपालवधमहाकाव्यस्य स्वाध्यायेन सूक्ष्मेक्षिकया स्वसामान्यप्रतिभायाः परिचयः कविना प्रदत्तो विद्यते । कविरयं न केवलं काव्यशास्त्रस्यैव पारंगत अपि तु व्याकरणशास्त्रस्य, राजनीतेः, अर्थशास्त्रस्य, धर्मशास्त्रस्य, कामशास्त्रस्य, दर्शनानाम्, ज्योतिषशास्त्रस्य, संगीतस्य, पावकशास्त्रस्य, हस्तिविद्यायाः, अश्वशास्त्रस्य, पुराणादीनां च सारविदनुपमा मनीषी । अस्य कवेः चमत्कृतिपूर्णं पाण्डित्यं प्रेक्षं प्रेक्षं प्रशंसन्ति विपश्चितः ।

माघविषये तदपि साधूच्यते यत् ''**मेघे माघे गतं वयः**'' अर्थात् मेघदूतस्य शिशुपालवधस्य अनुशीलने चायुर्व्यतीतम्। काव्येऽस्मिन् तस्य विशालं शब्दकोशमुद्वीक्ष्य माघे साहजिकं गौरवमनुभूयते अध्ययनशीलैः । पदे पदे लालित्यं, पाण्डित्यं, माधुर्यञ्चावलोक्यते । काव्यानामभ्यासेन कोविदैरेकः निष्कर्षः संप्राप्तः स चैकेन वाक्येन प्रोक्तः ''**काव्येषु माघः**'' शास्त्रीयग्रन्थेषु काव्यमहाकाव्येषु महाकविमाघस्यैकं प्रशस्तपूर्णनाम सर्वैः सगौरवं नीयते तथैव शिशुपालवधमहाकाव्यस्य शब्दनिधिना अमरकोशस्य शब्दरत्नाकरः सहजभाषाशैल्यां वार्तालापे च प्रवाहितो भवति ।

महाकवेर्माघस्य शिशुपालवधमहाकाव्ये यत् कथानकं विद्यते तद् महाभारतादुद्धृतमस्ति । अत्र युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतो शिशुपालस्य वधः मुख्यतया वर्णितः । महाभारतोक्तां निष्प्राणामिमां कथां माघो वर्णनमाहात्म्येन चमत्कारिणीं कृतवान् ।

काव्यस्य यावन्तो गुणाः सन्ति तावन्तः माघे दरीदृश्यन्ते । माघस्य शैली सहजा सरसा च वर्त्तते ।

माघो महान् कविः पण्डितश्चासीत् तेन कवितामलङ्कर्तुं सर्वेषामेव शास्त्राणामुपयोगः कृतः । तदीया कविता नानाविधभूषायुता कामिनीव सगर्वं पदन्यासमाचरन्ती प्रचरति ।

माघकवौ प्रकृतिपर्यवेक्षणकृतपाण्डित्यमपि न न्यूनमासीत्तेन स्वकाव्ये बहुधा-तत्परिचितमेवास्ति ।

महाकवेरनुपमकाव्यकौशलं पठित्वा शिशुपालवधमहाकाव्यमेकैव कृतिः तथापि संस्कृतसाहित्याकाशे नितरां विलसति विलसिष्यतीति विश्वासः ।

माघस्तु माघः यस्योपाधिः गिरिवरवर्णनेन ज्ञायते यत् कविरयं घण्टामाघेन प्रथितः प्रसिद्धश्च वर्तते ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) महाकविमाघः केनोपाधिना विभूषितः ?

(क) दीपशिखा (ख) घण्टामाघः (ग) पञ्चाननः (घ) गजाननः

(२) लघुत्रय्यां कस्याः कृतेः समावेशः न भवति ?

(क) रघुवंशम् (ख) कुमारसंभवम् (ग) किरातार्जुनीयम् (घ) मेघदूतम्

(३) बृहत्त्रय्यां कस्याः कृतेः समावेशो न भवति ?

(क) रघुवंशम् (ख) शिशुपालवधम् (ग) किरातार्जुनीयम् (घ) नैषधीयचरितम्

(४) महाकविमाघस्य कालः मन्यते ?

(क) अष्टमशतकम् (ख) नवमशताब्दी (ग) सप्तमशताब्द्योत्तरभागः (घ) दशमशताब्दी

(५) कः माघं धनसहाय्यं कृतवान् ?

(क) कालिदासः (ख) व्यासः (ग) भवभूतिः (घ) भोजः

(६) माघस्य स्थानविशेषं किम् ?

(क) कुशावर्तः (ख) मगधः (ग) भिन्नमालः (घ) आनर्तप्रदेशः

(७) शिशुपालस्य का टीका सर्वप्रसिद्धा वर्तते ?

(क) आनन्ददेवायिनी (ख) हसन्ती (ग) चन्द्रिका (घ) सर्वाङ्कषा

२. **अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) महाकविर्माघः कति ग्रन्थान् लिखितवान् ?

(२) माघस्य निवासस्थानं किम् ?

(३) महाकवेर्माघस्य पितामहस्य नाम किम् ?

(४) त्रयः भोजाः केन महोदयेन स्वीकृताः सन्ति ?

(५) माघस्य पितामहः कस्य नृपस्य मन्त्री आसीत् ?

३. **अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) माघस्य जन्मसमयः ।

(२) माघस्य विशेषताः ।

४. **टिप्पणी लेख्या ।**

(१) माघस्य कृतिः ।

(२) महाकाव्यशिशुपालवधस्य विशेषता ।

५. **अ विभागं ब विभागेन सह संयोजयत ।**

| **अ** | **ब** |
|---|---|
| (१) महाकविमाघः | (१) सर्वाश्रयदाता |
| (२) माघपिता | (२) त्रयः |
| (३) दत्तकः | (३) सर्वाङ्कषा |
| (४) माघे कतिगुणाः | (४) घण्टामाघः |
| (५) टीकाग्रन्थः | (५) दत्तकः |

**छात्रप्रवृत्तिः**

- माघस्य विशेषपरिचयाय अन्येऽपि ग्रन्थाः अवलोकनीयाः ।

**शिक्षकप्रवृत्तिः**

- अन्येषां महाकवीनां परिचयं ज्ञात्वा छात्रान् बोधयेत् ।

# ११ शिशुपालवधम्

**प्रस्तावना**

महाकविमाघस्येयं एकैव रचना शिशुपालवधमहाकाव्यमिति । महाकवय: स्वमहाकाव्यस्य कथावस्तु प्राय: महाभारतादेव स्वीकुर्वन्ति । शिशुपालवधमहाकाव्यस्य कथा महाभारतात् सभापर्वण: गृहीता विद्यते । महाकाव्येऽस्मिन् द्वारिकानाथस्य श्रीकृष्णस्य चेदिराजशिशुपालस्य वैरं तथा युद्धे श्रीकृष्णेन कृत: शिशुपालस्य वध: तत्कथा विवर्णिता विद्यते। महाकाव्येऽस्मिन् विंशति: सर्गा: १६४५ श्लोकाश्च सन्ति ।

---

**प्रथमसर्गे** भगवत: श्रीकृष्णस्याग्रे इन्द्रसन्देशं गृहीत्वा देवर्षिनारद: समागच्छति । कृष्ण: नारदमुने: सत्कारान्ते आगमनस्य कारणं पृच्छति । तदा देवर्षि: प्रत्युत्तरति यत् चेदिराजशिशुपालादिन्द्रादय: भीताश्च सन्ति । तस्याचारेण देवराज: बिभेति तन्निवारणाय इन्द्रेणाहं संप्रेषित: कृपया भवान् तस्य शिशुपालस्य वधं कृत्वा सुखिन: कुर्वन्तु देवान् । श्रीकृष्ण: तथैव करिष्यति इति स: समाश्वासनं नारदाय प्रददाति सम्प्रेषयति च ।

**द्वितीयसर्गे** भगवान् श्रीकृष्ण: बलरामोद्धवाभ्यां सह एकान्ते सभाभवने समुपविश्य मन्त्रणां करोति । श्रीकृष्ण: द्वयो: कार्ययो: समुपस्थित्या परस्परकार्यद्वयस्य विरोधं प्रदर्शयति पृच्छति यत् युधिष्ठिरस्य यज्ञनिमन्त्रणमपि वर्तते तथा इन्द्रस्य शिशुपालवधाय नारदात् सन्देशोऽपि आगत: वर्तते ते कार्ययो: । द्वयमपि कार्यमत्यावश्यकं विद्यते । द्वयो: कार्ययो: सम्पादनं कथं सम्भवेत् ? अत: स्थित्यामस्याम् अस्माभि: किं कर्तव्यमुचितं स्यात् ?

एतावदुक्त्वा भगवान् श्रीकृष्ण: शिशुपालस्य वध: प्रथमोऽनिवार्येति स्वमतमुपस्थापयति । मतमनुसरति बलराम: तथा च समर्थयति बलभद्र: यत् आम्, आदौ शिशुपालस्य संहार: परमावश्यक: तदेव करणीयमिति । यदा उद्धव: स्वाभिप्रायं प्रददाति तदा कथयति शान्त्या चर्चया मध्ये-मध्ये रौहिणेयस्य विचारखण्डनं कृत्वा युधिष्ठिरस्य यज्ञानुष्ठाने समुपस्थातष्यमिति। तदनु उद्धवेन तदपि स्मरणं कार्यते यत् हे भगवन् ! भवता शिशुपालस्य मात्रे शतापराधानां क्षमायै प्रतिज्ञा कृता वर्तते तद् सहजं स्मारयामि । तेन समं गुप्तचरै: शिशुपालस्य शक्तिपराक्रमादिविषये आदौ ज्ञेयं भवति पक्षभेदनं तस्य कथं सम्भवेत् तदपि ज्ञेयं भवति अथवा तादृशी नीति: काऽपि कर्तव्या भविष्यति येन तस्य पक्षभेद: भवेत् । अन्ते चोद्धवस्य वचनानुसारं समभिप्रायानुसारं त्रिभि: निर्णय: क्रियते युधिष्ठिरस्य यज्ञं गन्तुमिति ।

**तृतीयसर्गे** श्रीकृष्णस्य सेनाया: इन्द्रप्रस्थाय प्रस्थानं तस्य वर्णनमागच्छति । प्रसङ्गेऽस्मिन्नेव कविना द्वारकापुर्या: समुद्रस्य चालङ्कारिकं वर्णनं विहितमस्ति ।

**चतुर्थसर्गे** सेना रैवतकपर्वतं प्राप्नोति । संपूर्णेऽस्मिन् सर्गे रैवतकपर्वतस्य वर्णनं सविशदं कविना कृतं विद्यते। अनेन रैवतकवर्णनेनैव महाकविमाघ: घण्टामाघ इति उपाधिना विभूषितो प्रसिद्धो च भवति ।

**पञ्चमसर्गे** रैवतकपर्वते सेनाया: निवास: तद्विशदतया विवर्णितमस्ति ।

**षष्ठे सर्गे** श्रीकृष्णस्य सेवायै षड्ऋतव: समुपस्थिता: भवन्ति तद् सरसतया कविना विवर्णितमस्ति अत्र यमकालङ्कारेण समं षण्णां ऋतूनां स्वाभाविकं मनोहरञ्च वर्णनं दरीदृश्यते ।

**सप्तमसर्गे** यादवाङ्गनानां विलासपूर्णं वनविहारवर्णनं सम्प्राप्यते ।

**अष्टमसर्गे** स्वस्त्रीभि: सह यादवानां जलक्रीडावर्णनं विद्यते ।

**नवमे सर्गे** सूर्यास्त:, चन्द्रोदय:, समुद्रोल्लास: तथा च चन्द्रोदयेन साकं फलस्वरूपेण नायिकानां प्रसाधनं दूतीप्रेषणादिविषये चमत्कारपूर्णं वर्णनं समुपलभ्यते ।

**दशमे सर्गे** मद्यपानस्य सुन्दरीसेवनस्य विलासमयं वर्णनं वर्तते ।

**एकादशसर्गे** प्रातःकालस्य वातावरणं कीदृशं भवति तद्विवर्णितं विद्यते ।

**द्वादशतमे सर्गे** पञ्चमसर्गमिव कतिपयविस्ताराणां तत्र च सेनाप्रयाणस्य वर्णनं मिलति । सर्गेऽस्मिन् यमुनापारं कृत्वा सेना कथं गच्छति तस्य सुन्दरं चित्रणं विद्यते ।

**त्रयोदशतमे सर्गे** श्रीकृष्णदर्शनाभिलाषिण्यः पुरसुन्दर्यः कथं प्रधावन्ति तासां दिदृक्षीणां सरसं वर्णनं विद्यते ।

**चतुर्दशतमे सर्गे** यज्ञस्य श्रीकृष्णस्य च वर्णनं मिलति । सर्गेऽस्मिन् कविः स्वदर्शनशास्त्रस्य, मीमांसाशास्त्रस्य कर्मकाण्डस्य च ज्ञानमुपस्थापयति पाण्डित्यं प्रदर्शयति च ।

**पञ्चदशतमे सर्गे** कृष्णाग्रपूजया रुष्टः शिशुपालः श्रीकृष्णं भीष्मं युधिष्ठिरञ्च स्वच्छन्दतया वाण्या तिक्तवचनानि श्रावयति ।

**षोडशे सर्गे** कृष्णस्य समीपं शिशुपालस्य दूतः गच्छति तथा च शिशुपालस्य दर्पपूर्णं क्लिष्टसन्देशं श्रावयति । सन्देशस्यास्याशयः तादृशः भवति यत् श्रीकृष्णः शिशुपालस्याधीनतां स्वीकरोतु वा युद्धाय निश्चयं करोत्विति। तस्य दूतस्योत्तरं सात्यकिः ददाति ।

**सप्तदशतमे सर्गे** दूतसन्देशं श्रुत्वा कुपितानां यादवानां युद्धसज्जतायै निर्णयोऽस्ति तद् वर्णनमागच्छति ।

**अष्टादशतमे सर्गे** द्वयोः सेनयोः युद्धभूमौ मेलनं सेनयोर्द्वयोः तुमूलं युद्धं सर्गेऽस्मिन् प्रतिपादितं विद्यते ।

**एकोनविंशतितमे सर्गे** शिशुपालस्य श्रीकृष्णस्य च स्वसेनायाः परस्परं भीषणं युद्धं यद्भवति तद् द्वन्द्वयुद्धं सविशदं विवर्णितं विद्यते । अत्र कवेः चित्रकाव्ये कीदृक् प्रावीण्यमस्ति तद्दर्शितं विद्यते ।

**विंशतितमे सर्गे** उपसंहाररूपेण युद्धवर्णनं कृत्वा शिशुपालस्य जीवनेन समं काव्यस्यास्य परिपूर्णता कविना सुचारुतया प्रकटिता विद्यते ।

इत्थं विंशतिसर्गात्मकं महाकाव्यमिदं संस्कृतसाहित्यवाङ्मयस्य शोभां वर्द्धयति तथा च माघस्य श्रीकृष्णभक्तिः तया भक्त्या स्वस्य वैष्णवत्वञ्च प्रकटितं भवति । दशकविषु माघोऽपि अन्यतमः कविः तदनेन ग्रन्थेन काव्येनावगम्यते ।

**श्लोकाः**

( १ ) **श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।**
**वसन् ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥**

**अन्वयः**- श्रियः पतिः जगन्निवासः (तथापि) जगत् शासितुं श्रीमति वसुदेवसद्मनि वसन् हरिः अम्बरात् अवतरन्तं हिरण्यगर्भाङ्गभुवं मुनिं ददर्श ॥

**व्याख्या**- श्रियः पतिः - लक्ष्म्याः पतिः, जगन्निवासः - जगतां निवासः, जगत् - विश्वम्, शासितुं - नियन्तुम्, श्रीमति - शोभासम्पन्ने, वसुदेवसद्मनि - वसुदेवगेहे, वसन् - तिष्ठन्, हरिः - श्रीकृष्णः, अम्बरात् - आकाशात्, अवतरन्तम् - आगच्छन्तम्, हिरण्यगर्भाङ्गभुवं - ब्रह्मणः मानसपुत्रं नारदमुनिं अवलोकयामास ॥ (वंशस्थवृत्तम्)

**सरलार्थः**- लक्ष्म्याः पतिः जगतां निवासः विश्वं नियन्तुं शोभायुक्ते वसुदेवगृहे तिष्ठन् श्रीकृष्णः आकाशात् आगच्छन्तं ब्रह्मणः मानसपुत्रं नारदम् अपश्यत् ।

**( २ )** **तमर्घ्यमर्घ्यादिकयाऽऽदिपुरुषः सपर्यया साधु स पर्यपूजयत् ।**

**गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः ॥**

**अन्वयः-** आदिपुरुषः सः अर्घ्यं तं अर्घ्यादिकया सपर्यया साधु पर्यपूजयत् । मनीषिणः अपुण्यकृतां गृहान् उपैतुम् अभीप्सवः न भवन्ति ।

**व्याख्या-** आदिपुरुषः - पुराणपुरुषः, सः - श्रीकृष्णः, अर्घ्यम् - पुण्यम्, तम् - नारदम्, अर्घ्यादिकया - पाद्यार्घ्यादिपूर्विकया, सपर्यया - पूजया, साधु - यथाविधि, पर्यपूजयत् - पूजयामास, मनीषिणः - विद्वांसः, अपुण्यकृताम् - पुण्यमकृतवताम्, गृहान् - वेश्मानि, प्रणयात्- स्नेहात्, उपैतुम् - प्राप्तुम्, अभीप्सवः - इच्छुकाः न - नैव, भवन्ति - जायन्ते ।

**सरलार्थः-** आदिपुरुषेण श्रीकृष्णेन भगवता पूज्यस्य नारदस्य अर्घ्यादिपूजासामग्र्यादिभिः विधिपूर्वकं पूजा कृता । (भगवता श्रीकृष्णेन नारदस्य पूजा या कृता सा सर्वथैव समुचिता कथमिति चेत्) विचारशीलाः महात्मनः अपुण्यात्मवतां गृहे स्नेहेन गन्तुम् इच्छुकाः न भवन्ति अर्थात् पुण्यवतां गृहे एव प्रेम्णा गच्छन्तीति भावः ।

**( ३ )** **विधाय तस्याऽपचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः ।**

**ग्रहीतुमार्यान्परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः ॥**

**अन्वयः-** यज्वनां प्रियः (श्रीहरिः) तस्य अपचितिं विधाय प्रकामम् अप्रीयत । महानुभावाः आर्यान् परिचर्यया मुहुः ग्रहीतुं नितान्तं हि अर्थिनः (सन्ति) ।

**व्याख्या-** यज्वनाम् - यायूजकानाम्, प्रियः - अभीष्टः (सः - श्रीकृष्णः) प्रसेदुषः - प्रसन्नस्य, तस्य - नारदस्य, अपचितिम् - पूजाम्, विधाय - कृत्वा, प्रकामम् - नितराम्, अप्रीयत -प्रीतोऽभवत्, हि- यतः, महानुभावाः - महात्मानः, आर्यान् - पूज्यान्, परिचर्यया - सेवया, मुहुः - वारं वारम्, ग्रहीतुम् अनुकूलयितुम्, नितान्तम् -नितराम्, अर्थिनः - इच्छुकाः (भवन्ति - जायन्ते)

**सरलार्थः-** विधिपूर्वकं यज्ञकर्तृणां प्रियः भगवान् श्रीकृष्णः प्रसन्नचेतसः नारदस्य पूजां कृत्वा हर्षम् अनुभवति . कथमिति चेत् महानुभावाः श्रेष्ठजनानां सेवया पुनः पुनः तान् वशी कर्तुं नैरन्तर्येण इच्छुकाः भवन्ति ॥

**( ४ )** **हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।**

**शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥**

**अन्वयः-** भवदीयदर्शनं कालत्रितये अपि शरीरभाजां योग्यतां व्यनक्ति सम्प्रति अघं हरति, एष्यतः (शुभस्य) हेतुः पूर्वाचरितैः शुभैः (तत्) कृतम् ।

**व्याख्या-** भवदीयदर्शनम् - श्रीमतां तत्रभवतां दर्शनम्, शरीरभाजाम् - शरीरिणाम्, कालत्रितयेऽपि - भूतादिकालत्रयेऽपि, योग्यताम् - अर्हताम्, व्यनक्ति - प्रकटयति, सम्प्रति - इदानीम्, अघम् - पापम्, हरति - विनाशयति, किं च एष्यतः - भाविनः, शुभस्य - कल्याणस्य, हेतुः - कारणम्, पूर्वाचरितैः - पूर्वानुष्ठितैः, शुभैः - सुकृतैः, कृतम् - उपलब्धम् ।

**सरलार्थः-** भवतः दर्शनम् त्रिषु लोकेषु प्राणिनां पवित्रतां योग्यतां वा प्रकटयति । (कुतः) वर्तमानकाले प्रत्यक्षदर्शनेन पापनाशः भवति, भविष्यकालस्य कल्याणहेतुरूपं दर्शनमिदम्, भूतकाले कृतानां पुण्यानां फलेन वर्तमाने दर्शनं जातमिति भावः ॥

**(५)** **विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽस्मि निबर्हितांहसा ।**

**तथापि शुश्रूषुरहं गरीयसीर्गिरोऽथवा श्रेयसि केन तृप्यते ॥**

**अन्वयः-** हे मुने ! निबर्हितांहसा तव अमुना विलोकनेन एव कृतार्थः कृतः अस्मि । तथापि अहं (तव गरीयसीः गिरः शुश्रूषुः (अस्मि) । अथवा, श्रेयसि केन तृप्यते ?

**व्याख्या-** हे मुने ! – हे मुनिश्रेष्ठ नारद, निबर्हितांहसा – निरस्तपापेन, अमुना – अनेन, तव – भवतः, विलोकनेन – दर्शनेन, कृतार्थः – कृतकृत्यः, कृतः – विहितः, तथापि – एवमपि, अहम् – श्रीकृष्णः, गरीयसीः– अर्थवत्तराः (तव – भवतः), गिरः – वाचः, शुश्रूषुः – श्रोतुमिच्छुः । अथवा – तथाहि, श्रेयसि – कल्याणविषये, केन केन पुंसा, तृप्यते – सन्तुष्यते । न केनापि तृप्यते इत्यर्थः ।

**सरलार्थः-** हे मुने नारद ! भवतः पापनिरस्तकृतवता दर्शनेन अहं कृतार्थोऽस्मि । तथापि भवतः कल्याणमयीं वाणीं श्रोतुकामोऽस्मि । कारणं कल्याणविषये कः तृप्तः भवति ? अर्थात् कल्याणप्राप्त्यै न कोऽपि कदापि तुष्टः।

**(६)** **उपप्लुतं पातुमदो मदोद्धतैस्त्वमेव विश्वम्भर विश्वमीशिषे ।**

**ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः ॥**

**अन्वयः-** हे विश्वम्भर! मदोद्धतैः उपप्लुतम् अदः विश्वं पातुं त्वम् एव ईशिषे । क्षमातमस्काण्डमलीमसं नभः क्षालयितुं रवेः ऋते कः क्षमेत ?

**व्याख्या-** विश्वम्भर – हे जगत्पालक, मदोद्धतैः – दर्पवृद्धैः, उपप्लुतम् – वीडितम्, अदः – इदम्, विश्वम् – जगत्, पातुम् – रक्षितुम्, त्वमेव– भवान् एव, ईशिषे – समर्थोऽस्ति । क्षमातमस्काण्डमलीमसम् – निशान्धकारसन्तानमलिनम्, नभः – आकाशम्, क्षालयितुम् – प्रकाशयितुम्, रवेः – सूर्यात्, ऋते – विना, कः – कः पुरुषः, क्षमेत – शक्नुयात् ? न कोऽपि शक्नुयात् इति भावः ॥

**सरलार्थः-** हे जगत्पाल ! दर्पोद्धतैः कंसादिभिः पीडितस्यास्य संसारस्य रक्षां कर्तुं भवानेव समर्थोऽस्ति । (कुतः) तर्हि रात्र्यां स्थितस्य अन्धकारसमूहस्य मलिनाकाशस्य स्वच्छतायै सूर्यं विना अन्यः कः समर्थो भवति ? अर्थात् न कोऽपि इति भावः ।

**(७)** **अमानवं जातमजं कुले मनोः प्रभाविनं भाविनमन्तमात्मनः ।**

**मुमोच जानन्नपि जानकीं न यः सदाऽभिमानैकधना हि मानिनः ॥**

**अन्वयः-** अमानवम् अजं तथापि मनोः कुले जातं प्रभाविनं (भवन्तं) आत्मनः अन्तं भाविनं जानन् अपि यः जानकीं न मुमोच, मानिनः सदा अभिमानैकधनाः (सन्ति) ।

**व्याख्या-** अमानवम् – अमानुषम्, अजम् – नित्यम्, मनोः – एतन्नामकालस्य राजर्षेः, जातम् – उत्पन्नम्, कुले – वंशे, प्रभाविनम् – महाप्रभावशालिनम्, आत्मनः – स्वस्य, अन्तम् – विनाशम्, भावनम् – भविष्यन्तम्, जानन्नपि – विदन्नपि, यः – रावणः, जानकीम् – सीताम्, न मुमोच – न तत्याज, हि– यतः, मानिनः – मानवन्तः, सदा – सर्वदा, अभिमानैकधनाः – अभिमानमात्रैकसाराः भवन्तीति शेषः ।

**सरलार्थः-** मानवात् भिन्नः जन्मरहिते सति मानुषरूपे मनोः कुले उत्पन्नः तथा प्रभावशाली भवान् श्रीकृष्ण ! रामावतारे रावणः जानाति स्म यत् सः माम् मारयिष्यति तथापि रावणः सीताम् अपहृतवान् । कथमिति चेत् मानिनाम् अभिमानमेव मुख्यं धनं भवति ।

**(८)** **भवद्‌गिरामवसरप्रदानाय वचांसि नः ।**

**पूर्वरङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः ॥**

**अन्वयः-** भवद्‌गिराम् अवसरप्रदानाय नः वचांसि (वर्तन्ते) नाटकीयस्य वस्तुनः प्रसङ्गाय पूर्वरङ्गः (क्रियते) ।

**व्याख्या-** भवद्‌गिराम् - युष्मद्वाचाम्, अवसरप्रदानाय - अवकाशदानाय, नः - अस्माकम्, मम, श्रीकृष्णस्येत्यर्थः, वचांसि- वचनानि, (तथा हि) - पूर्वरङ्गः - विघ्ननिवारककुशीलवकर्तुकमङ्गलम्, नाटकीयस्य - अभिनेयस्य, वस्तुनः - कथायाः, प्रसङ्गाय प्रवर्तनायैव भवतीति शेषः ।

**सरलार्थः-** (भगवान् श्रीकृष्णः कथयति यत्) भवद्भ्यः वचनेभ्यः अवसरं दातुम् अस्माकं वचनानि सन्ति । कुतः तर्हि पूर्वरङ्गे (नाटकारम्भे कृतं मङ्गलाचरणम्) नाटकीयकथायाः प्रवृत्त्यै भवति ॥

**(९)** **उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।**

**समौ हि शिष्टैराम्नातौ वत्स्यर्न्तमामयः स च ॥**

**अन्वयः-** पथ्यम् इच्छता उत्तिष्ठमानः परः तु न उपेक्ष्य, हि वत्स्यर्न्तौ, आमयः सः च शिष्टैः समौ आम्नातौ ।

**व्याख्या-** उत्तिष्ठमानः - वर्धमानः, परः - शत्रुः, तु - किन्तु, पथ्यम् - हितम्, इच्छता - वाञ्छता, पुंसेति शेषः । नोपेक्ष्यः - नोपेक्षणीयः, हि - यतः, वत्स्यर्न्तौ - वृद्धिं गमिष्यन्तौ, आमयः - रोगः, स च - शत्रुश्च, शिष्टैः - नीतिशास्त्रविशारदैः, समौ - तुल्यौ, आम्नातौ - आख्यातौ ।

**सरलार्थः-** स्वस्य हितं स्वास्थ्यञ्चेच्छता जनेन वर्धमानस्य शत्रोः न कदापि उपेक्षा कर्तव्या भवति । कथमिति चेत् वर्धमानस्य रोगस्य शत्रोश्च साम्यं नीतिविद्भिः दर्शितं विद्यते । (वर्धमानः रोगः वर्धमानः शत्रुश्च द्वावपि समानौ)

**(१०)** **यावदर्थपदां वाचमेवमादाय माधवः ।**

**विरराम महीयांसः प्रकृत्या मितभाषिणः ॥ २-१३**

**अन्वयः-** माधवः यावदर्थपदां एव वाचम् आदाय विरराम । महीयांसः प्रकृत्या मितभाषिणः सन्ति ।

**व्याख्या-** माधवः - लक्ष्मीपतिः श्रीकृष्णः इत्यर्थः । यावदर्थपदाम् - निरर्थकपदरहिताम्, वाचम् - वाणीम्, एवम् - इत्थम्, आदाय - गृहीत्वा, विरराम - तूष्णीं बभूव, महीयांसः - महात्मानः, प्रकृत्या - स्वभावेन, मितभाषिणः - परिमितभाषिणः, भवन्तीति ।

**सरलार्थः-** इत्थं भगवान् श्रीकृष्ण अर्थानुकुलवचनमुक्त्वा मौनं जातः । कथमिति चेत् महापुरुषाः स्वभावेन एव परिमितभाषिणः स्वल्पभाषिणश्च वा भवन्ति । (अनुष्टुप् वृत्तम्)

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) महाकवेमार्घस्य कति रचनाः सन्ति ?

(क) एका (ख) द्वे (ग) चतस्रः (घ) तिस्रः

(२) शिशुपालवधमहाकाव्ये कति सर्गाः सन्ति ?

(क) २३ (ख) १९ (ग) २० (घ) १८

(३) शिशुपालवधस्य कथानकं कस्मात् ग्रन्थात् समुद्धृतम्?

(क) रामायणात् (ख) महाभारतात् (ग) उपपुराणात् (घ) धर्मशास्त्रात्

(४) स्वर्गात् क अवतरति ?

(क) इन्द्रः (ख) वरुणः (ग) नारदः (घ) श्रीकृष्णः

(५) रैवतकपर्वतस्य वर्णनं कस्मिन् सर्गे आगच्छति ?

(क) तृतीये (ख) चतुर्थे (ग) पञ्चमे (घ) नवमे

(६) प्रथमे सर्गे किं छन्दः प्रयुक्तम् अस्ति ?

(क) अनुष्टुप् (ख) आर्या (ग) उपजातिः (घ) वंशस्थ

**२. सविस्तरमुत्तरं दीयताम् ।**

(१) शिशुपालवधस्य प्रथमः सर्गः ।

(२) महाकाव्यस्यास्य विशेषता ।

**३. श्लोकपूर्तिं कुरुत ।**

(१) श्रियः पति ...................... ॥

(२) यावदर्थपदां ....................... ॥

**४. अ विभागं ब विभागेन सह संयोजयन्तु ।**

| अ | ब |
|---|---|
| (१) शिशुपालवधम् | (१) बलरामः |
| (२) चेदिराजः | (२) इन्द्रः |
| (३) रौहिणेयः | (३) मितभाषिणः |
| (४) शतक्रतुः | (४) महाकाव्यम् |
| (५) महानुभावाः | (५) शिशुपालः |

**५. एकेन वाक्येनोत्तरं लिखत ।**

(१) शिशुपालवधमहाकाव्ये कति श्लोकास्सन्ति ?

(२) द्वितीयसर्गे के त्रयः सम्भूय मन्त्रणां कुर्वन्ति ?

(३) युधिष्ठिरेण कृतस्य यज्ञस्य नाम किम् ?

(४) शिशुपालवधमहाकाव्यस्योपजीव्यं किम् ?

(५) माघस्य प्रशस्तिमेकेन वाक्येन लिखत ।

**छात्रप्रवृत्तिः**

- शिशुपालवधमहाकाव्यस्य मूलग्रन्थस्याश्रयेण श्लोकान् पठत ।

**शिक्षकप्रवृत्तिः**

- महाभारतस्य मूलग्रन्थस्य कथानकं पठिष्यति छात्रेभ्यः कथयिष्यति च ।

●

# १२ श्रीहर्षः

**प्रस्तावना -**

**अपारे काव्यसंसारे कविरेकः प्रजापतिः ।**

**यथेदं रोचते विश्वं तथेदं परिवर्तते ॥**

**शृङ्गारी चेत्कविः काव्ये सर्वं रसमयं जगत् ।**

**स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ॥**

**उपमा कालिदासस्य भारवेरर्थगौरवम् ।**

**नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः ॥**

अत्र दण्डिनः पदलालित्यमपि पाठः वर्तते । संस्कृतसाहित्यशास्त्रे शब्दार्थयोः सरसं साहचर्यं भवति चेत् तत्काव्यं लोकप्रियं विद्वत्प्रियञ्च भवति । कृतेः परिचयेन कर्तुः परिचयः कर्तुः परिचयेन कृतेः परिचयो भवति । महाकाव्येषु नैषधमप्येकं विशिष्टं स्थानं मानञ्चावाप्नोति । काव्यमहाकाव्यैः छात्रेषु शब्दसमृद्धिः कोशज्ञानं रसज्ञानं रीतिशैलीगुणदोषपरिचयो भवति तेन भाषासौष्ठवं सहजं सम्प्राप्यते ।

---

**श्रीहर्षस्य जन्म -**

महाकवेरस्य पिता श्रीहीरः माता मामल्लदेवी च वर्तते । श्रीहीरः काशीवासिनो गढवालवंशोद्भवस्य विजयचन्द्रस्य सभापण्डित आसीत् । शास्त्रार्थे केनापि विपश्चिता जितः श्रीहीरो मरणसमये स्वजेतारं पण्डितं विद्वांसं पराजेतुं स्वपुत्रं श्रीहर्षम् आहूतवान् । पितुराज्ञापरायणेन श्रीहर्षेण गङ्गातीरे चिन्तामणिमन्त्रानुष्ठानं सश्रद्धं कृतं तेन जपानुष्ठानेन स श्रीहर्षः विशिष्टां प्रतिभां प्राप्तवान् । लब्धवैदुष्यश्चासौ विजयचन्द्रस्य सभां प्रविश्य श्लोकस्यैकस्य समुच्चारणमकरोत् ।

**तद्यथा -** **गोविन्दनन्दनतया च वपुः श्रिया च**

**मास्मिन् नृपे कुरुत कामधियं तरुण्यः ।**

**अस्त्रीकरोति जगतां विजये स्मरः स्त्री-**

**रस्त्रीजनः पुनरनेन विधीयते स्त्री ॥**

पद्यस्यास्य कश्मीरेषु महती प्रतिष्ठाऽऽसीत् । महाकवयः प्रायः स्वजीवनकवनविषये साङ्केतितभाषयैव प्रतिपादयन्ति। किन्तु श्रीहर्षस्य पित्रोः नामोल्लेखः स्वेन महाकाव्येन कविरयं कृतवानस्ति ।

**श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं**

**श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।**

**तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-**

**काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥**

(नैषध - १/१४५)

**श्रीहर्षस्य जन्मकालः**

कवीनामिदं क्षेत्रं प्राय: प्रच्छन्नमेव भवति । श्रीहर्षस्य जीवनकवनविषये तु तथापि कानिचित् प्रमाणानि इतिहासमाध्यमेन लभ्यन्ते तत्र संस्कृतसाहित्येतिहासमाध्यमेन कवेरस्य जन्मकालविषये समुल्लेखः प्राप्यते ।

कान्यकुब्जेश्वरस्य जयचन्द्रस्याश्रयमाशिश्रियत् ।

**''ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्''**

(नैषध-२२/१५३)

जयचन्द्रो गढवालवंश्यो राजाऽऽसीत् । एकादशे द्वादशे ईश्वीयशतके अस्य वंश्योत्तरभारते प्रचुरः प्रभाव आसीत्। विजयचन्द्रजयचन्द्रौ मिलित्वा ११५६ ईशवीतः ११९३ ई. पर्यन्तं राज्यं चक्रतुः । अतो हर्षस्य स्थितिकालः द्वादशशतकोत्तरार्धभागो मन्यते इतिहासेन निश्चीयते च ।

**श्रीहर्षस्य कृतयः-**

संस्कृतमहाकाव्येषु नैषधीयचरितमेकमुच्चं स्थानं भजते । संस्कृतसाहित्ये अपरिमितकाव्यानि महाकाव्यानि च सन्ति किन्तु पठनपाठने लघुत्रयी, बृहत्त्रयी च पञ्चमहाकाव्यानि नितरां प्रसिद्धानि सन्ति । लघुत्रय्यां नैषधीयचरितस्य गणना न भवति बृहत्त्रय्याम् अस्याः कृतेः समावेशो भवति । किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम् एतानि त्रीणि महाकाव्यानि बृहत्त्रय्यां समागच्छन्ति । श्रीहर्षस्य बहव्यः कृतयः सन्ति किन्तु **नैषधं विद्वदौषधम्** इति वाक्येन नैषधीयचरितमहाकाव्यस्य महिमा प्रकटितः भवति । पञ्चमहाकाव्यानि कुमारसंभवम्, रघुवंशम्, किरातार्जुनीयम्, शिशुपालवधम् एवं नैषधीयचरितम् इत्येतेषां पञ्चानां ग्रन्थानां पञ्चमहाकाव्येन प्रसिद्धिः वर्तते ।

श्रीहर्षेण समये समये ग्रन्थाः विरचितास्सन्ति । अयं कविः असामान्यवैदुष्यपूर्णां प्रतिभां धारयति । एतादृश्यपि एका उक्तिरस्ति यत् महाकविश्रीहर्षः प्रसिद्धस्य आलङ्कारिकस्य मम्मट्टस्य भागिनेय आसीत् ।

महाकविश्रीहर्षः, कान्यकुब्जस्य (कन्नौज) एवं वाराणस्याः महाराज्यस्य विजयचन्द्रजयचन्द्रयोः सभापण्डितश्चासीत्। अयं श्रीहर्षः न्यायवेदान्तादिषु नैकेषु शास्त्रेषु पूर्णाधिकारी आसीत् । श्रीहर्षस्य कृतयः तेषां संक्षिप्तः परिचय इत्थं वर्त्तते।

(१) स्थैर्यविचारप्रकरणम् - संभवतः ग्रन्थेऽस्मिन् बौद्धस्य क्षणिकवादस्य खण्डनं वर्तते ।

(२) विजयप्रशस्तिः - ग्रन्थेऽस्मिन् जयचन्द्रस्य पिता विजयचन्द्रस्य प्रशस्तिः अस्ति ।

(३) खण्डनखण्डखाद्यम् - ग्रन्थेऽस्मिन् न्यायस्य रीतिः वर्णिता वर्तते । न्यायस्य खण्डनं च अद्वैतसिद्धान्तस्य मण्डनं विद्यते । ग्रन्थोऽयम् अत्यन्तं दुरुहस्य पाण्डित्यस्य निकषग्रावा मन्यते । षोडशशताब्द्यां शङ्करमिश्रेण अस्य खण्डनखण्डखाद्यस्य शैलीं लक्षीकृत्य **''वादविनोदः''** नाम्नः ग्रन्थस्य रचना कृता आसीत् ।

(४) गौडोर्वीशकुलप्रशस्तिः - अस्मिन् ग्रन्थे बङ्गदेशस्य कस्यचिद् राज्ञः प्रशस्तिवर्णनमस्ति ।

(५) अर्णववर्णनम् - ग्रन्थेऽस्मिन् समुद्रस्य वर्णनं वर्तते ।

(६) छिन्दप्रशस्ति - अस्मिन् ग्रन्थे छिन्दनाम्नः कस्यचित् राज्ञः प्रशस्तिः वर्तते ।

(७) शिवशक्तिसिद्धिः - ग्रन्थेऽस्मिन् शिवस्य शक्त्याः सिद्धिः विवर्णिताऽस्ति ।

(८) नवसाहसाङ्कचरितचम्पूः - संभवतः राज्ञः भोजस्य पितुः ''नवसाहसाङ्क'' उपाधिना भूषितस्य सिन्धुराज्ञः चरित्रं वर्तते।

(९) नैषधीयचरितम् – महाकाविना ''**तच्चिन्तामणिमन्त्रचिन्तनफले**'' एतदुक्त्वा चिन्तामणिमन्त्रस्य जपं कृत्वा चिन्तनेन महाकाव्यमिदं तस्य मन्त्रस्य फलरूपेण प्राप्तमस्ति । महाकाव्येऽस्मिन् २२ सर्गाः सन्ति । प्रायः प्रत्येकं सर्गे शताधिकाः श्लोकाः सन्ति । १३, १५, १९ सर्गत्रयं त्यक्त्वा सर्वेषु शताधिकश्लोकास्सन्ति । किं बहुना १७ सप्तदशतमे सर्गे तु २२२ श्लोकाः विद्यन्ते समष्टिरूपेण महाकाव्येऽस्मिन् २८२८ श्लोकाः विद्यन्ते । तादृशी उक्तिः वर्तते आश्रयदातुः महाराजजयचन्द्रस्याज्ञया महाकविना महाकाव्यमिदं रचितम् ।

**श्रीहर्षस्य विशेषता –**

श्रीहर्षः महाकविमहादार्शनिको महावैयाकरणश्चेत्यादिविविधगुणैः सम्पन्नः अप्रतिमासामान्यप्रतिभावान् च वर्तते । सर्वान् अस्मान् महाकवीन् पाण्डित्यप्रदर्शने वाग्वैभवे कविरचनायां भावाभिव्यक्तौ साधुशब्दसंकलने विद्यावैशारद्ये वक्रोक्तिव्यवहारे च पाण्डित्यम् अवधारयति कविरयम्। अनुपमवैदुष्यवैभवेन भूषितोऽस्ति । पाण्डित्यपुटपाकप्रतीकाराः प्रतीयन्ते । नैकेषु शास्त्रेषु प्रावीण्यमयं धारयति पाण्डित्यप्रवीणः ''**नैषधं विद्वदौषम्**'' इति साह्लादमुद्घोष्यते यशोऽस्य सुधीभिः सर्वदा गीयते । नैषधीयचरितमहाकाव्ये पदलालित्यं सम्यक् प्रतीयते तेन ''**नैषधे पदलालित्यम्**'' इति प्रशस्तिः श्रीहर्षेण सहर्षं प्राप्यते।

अस्य महाकवेः प्रतिभा तादृशी आसीत् येन विद्वांसः श्रीहर्षस्य खण्डनखण्डखाद्यमिति ग्रन्थस्य भाषाशैलीं वाग्प्रवाहं च दृष्ट्वा श्रीहर्षस्य पितृभ्यां कथयन्ति स्म अयं प्रतिभासम्पन्नः बहुक्लिष्टं लिखति । एतादृशस्य परिश्रमस्य किमपि फलं नास्ति कारणं ज्ञानस्य पाण्डित्यस्य तात्पर्यं तादृशमस्ति येन सामान्यजनानां बुद्धौ ग्रन्थोऽयं न प्रविशति । कृपया अस्य किमपि करोतु येन अन्यासां कृतीनां रचना तथा भवेत् येन एतादृशस्य पाण्डित्यस्य लाभः सर्वैः प्राप्येत कारणं ''**वैदुष्यं विदुषां मध्ये भुक्तये न तु मुक्तये**'' पश्चात् दध्ना सह माषानां भक्षणेन श्रीहर्षस्य बुद्धिः किंचित् क्षीणा जाता ततश्च लोकगम्यं पाण्डित्यप्रियं विद्वद्भ्यः बुद्धिगम्यं महाकाव्यमिदं नैषधीयचरितम् रचितवान् तेन विद्वांसः स्वस्य संशयग्रस्तानां रोगाणां प्रश्नानां समाधानम् अनेन महाकाव्येन प्राप्तवन्तः अत एव ''नैषधं विद्वदौषधम्'' अनेन महाकाव्येन अन्यैः विद्वद्भिः स्वपरितोषः प्रकटितः तथा च श्रीहर्षस्य प्रसिद्धौ महाकाव्यस्यास्य महद्योगदानम् अस्ति ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) श्रीहर्षस्य पितुः नाम किम् ?

(क) अम्बिकादतः (ख) मल्लिनाथः (ग) श्रीहीरः (घ) दत्तकः

(२) श्रीहर्षस्य मातुः नाम किम् ?

(क) अम्बिकादेवी (ख) मामल्लदेवी (ग) मुम्बादेवी (घ) मनसादेवी

(३) कस्मिन् वंशे श्रीहर्षः समागतः ?

(क) भोजः (ख) यदुः (ग) सूर्य (घ) गढवाल

(४) श्रीहर्षस्य पिता कस्य नृपस्य सभापण्डित आसीत् ?

(क) भोजस्य (ख) विजयचन्द्रस्य (ग) भीमस्य (घ) चेदिराजस्य

(५) श्रीहर्षः कस्य नृपस्य राज्याश्रयं कृतवान् ?

(क) जयचन्द्रस्य (ख) अजयचन्द्रस्य (ग) भानुप्रसादस्य (घ) भोजस्य

(६) श्रीहर्षस्य कालः कः मन्यते ?

(क) द्वादशशताब्दी (ख) त्रयोदशशतकम् (ग) नवमशतकम् (घ) नैकमपि

(७) नैषधीयचरितमहाकाव्ये कति सर्गाः सन्ति ?

(क) २० सर्गाः (ख) २२ सर्गाः (ग) २४ सर्गाः (घ) १८ सर्गाः

(८) नैषधीयचरिते प्रथमसर्गे किं छन्दः ?

(क) वंशस्थम् (ख) उपजातिः (ग) द्रुतविलम्बितम् (घ) इन्द्रवज्रा

(९) श्रीहर्षेण चिन्तामणिमन्त्रानुष्ठानं कुत्र कृतमासीत् ?

(क) वृक्षाधोभागे (ख) गङ्गातटे (ग) यमुनातटे (घ) गौशालायाम्

(१०) अधस्तनासु का रचना श्रीहर्षस्य नास्ति ?

(क) विजयप्रशस्तिः (ख) हर्षचरितम् (ग) अर्णववर्णनम् (घ) शिवशक्तिसिद्धिः

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) श्रीहीरः कदा श्रीहर्षम् आहूतवान् ?

(२) विजयचन्द्रजयचन्द्रौ कति कालं यावत् शासनं चक्रतुः ?

(३) लघुत्रय्यां त्रीणि पुस्तकानि कानि समाविशन्ति ?

(४) बृहत्त्रय्यां केषां ग्रन्थानां समावेशः भवति ?

(५) श्रीहर्षस्य कति ग्रन्थास्सन्ति ?

**३. सविस्तरेणोत्तरं लिखत ।**

(१) श्रीहर्षस्य जन्मस्थितिकालं वर्णयत ।

(२) श्रीहर्षस्य कृतीनां परिचयो देयः ।

(३) कवेः कृतीनाञ्च विशेषतां वर्णयत ।

**४. टिप्पणी लेख्या ।**

(१) नैषधीयचरितम्

(२) श्रीहर्षः

**५. अ विभागेन सह ब विभागं योजयत ।**

| अ | ब |
|---|---|
| (१) श्रीहर्षः | (१) नवसाहसाङ्क चरितम् |
| (२) कान्यकुब्जः | (२) प्रशस्तिग्रन्थः |
| (३) विजयप्रशस्तिः | (३) रत्नाकरः |
| (४) चम्पूग्रन्थः | (४) मम्मट्टस्य भागिनेयः |
| (५) अर्णवः | (५) कन्नौज |

**छात्रप्रवृत्तिः**

- श्रीहर्षस्य परिचयाय अन्येऽपि ग्रन्था अवलोकनीयाः ।

**शिक्षकप्रवृत्तिः**

- अन्येषां महाकवीनां जीवनं कृतिपरिचयं च दास्यति।

# १३ नैषधीयचरितम्

**प्रस्तावना**

''नैषधं विद्वदौषधम्'' नैषधे पदलालित्यम् द्वाभ्यां पङ्क्तिभ्याम् महाकाव्यस्य महाकवेश्च महिमा स्वयं प्रकाशितो भवति । पञ्चमहाकाव्येषु बृहत्त्रय्यां च श्रीहर्षस्येयं कृतिरागच्छति । अस्मिन् महाकाव्ये २२ (द्वाविंशतिसर्गाः वर्तन्ते) २८२८ (अष्टाविंशत्यधिक-अष्टाविंशतिशतम्) श्लोकाश्च सन्ति । महाराजजयचन्द्रस्याज्ञया इयं रचना श्रीहर्षेण कृता आसीत्। महाकाव्येऽस्मिन् नवदश छन्दसां प्रयोगः तत्र भवता श्रीहर्षेण कृतः वर्तते । येषु छन्दस्सु प्रचुरमात्रेणोपजाति छन्दः प्रयुक्तं विद्यते । अस्मिन् छन्दसि सप्तसर्गाः सन्ति । वंशस्थे छन्दसि चत्वारः सर्गाः विद्यन्ते । ग्रन्थेऽस्मिन् २३ (त्रयोविंशतिः) टीकाः समुपलभ्यन्ते । महाकाव्येऽस्मिन् दोधक-वसन्ततिलका, स्वागता, द्रुतविलम्बितम्, रथोद्धता, शार्दूलविक्रीडितम्, स्रग्धरा, शिखरिणी एवं अनुष्टुप् छन्दसां प्रयोगः पाण्डित्यपूर्णः दृष्टिपथि आगच्छति । टीकासु प्राचीनतमा विद्यते मल्लिनाथस्य जीवातुटीका, नारायणपण्डितस्य प्रकाशटीका तथा नवीनेन स्वरूपेण जीवानन्दविद्यासागरस्य हरिदाससिद्धान्तवागीशस्य टीकाः समुपलब्धाश्च सन्ति ।

---

**कथानकम्**

श्रीहर्षस्य ग्रन्थेषु नैषधीयचरितम् खण्डनखण्डखाद्यमिति द्वौ ग्रन्थौ समुपलभ्येते । अन्ये ग्रन्थाः अप्राप्यास्सन्ति नैषधीयचरितमहाकाव्यस्य कथानकं ज्ञेयं भवता किन्तु तत्पूर्वं तदपि ज्ञातव्यं भवति यत् अस्य महाकाव्यस्य उपजीव्यं महाभारतं तत्रापि वनपर्व वनपर्वणि अपि नलोपाख्यानपर्व वर्तते । प्रारम्भे नलस्यानुपमगुणानां वर्णनं सविस्तरं विद्यते।

दमयन्त्याः पूर्वानुरागस्य विशदी चर्चा विद्यते । ततश्च नलस्य दमयन्त्यामासक्तिः । दमयन्त्याः विरहेण नलः वनविहारमधीरो भूत्वा करोति । तत्र वनविहारकाले तडागपार्श्वे एकं हंसं पश्यति । हंसस्य मानुषीं वाणीं श्रुत्वा विलापं च श्रुत्वा नलः तं हंसं त्यजति । स च हंसः पुनरागत्य दमयन्त्या सह तव सम्बन्धं स्थापयिष्यामीति (पणं) वचनं ददाति । ततः हंसः दमयन्त्याः सविधे गच्छति । तत्र गत्वा हंसः दमयन्त्यग्रे नलस्य प्रभावं गुणान् सौन्दर्यञ्च सर्वं वर्णयति । राजा भीमः दमयन्त्याः स्वयंवरं समायोजयति । नारदमुखात् दमयन्त्याः सौन्दर्यवर्णनं श्रुत्वा स्वयंवरस्यायोजनं श्रुत्वा इन्द्राग्नियमवरुणाः देवाः दमयन्त्याः स्वयंवरं गच्छन्ति । मार्गे नलं दृष्ट्वा स्वकौशलेन देवाः नलस्य दूतरूपेण नियुक्तिं कुर्वन्ति । स्वयंवरस्य महदायोजनं दृष्ट्वा चत्वारः देवाः नलस्य रूपं धृत्वा तत्र समुपस्थिताः भवन्ति । एतेषु चतुर्षु नलः कः स्यात् ? इति संशयेन दमयन्ती व्याकुलतां गच्छति । अन्ते दमयन्त्यां नलानुरागं दृष्ट्वा देवाः प्रसन्नाः भवन्ति । पश्चात् दमयन्ती नलं पतिरूपेण प्राप्नोति । तयोर्द्वयोः विवाहः भवति । प्रतिनिवृत्तिकाले कलिना सह देवानां समागमो भवति । कलेः नास्तिकवादेन देवाः तस्य खण्डनं कुर्वन्ति । कलिः नलाय कुप्यति ततश्च नलं पीडयिष्यामीति निश्चयं करोति । द्वापरेण सह कलिः गच्छति स्थातुं न स्थानं प्राप्नोति तदा नलस्योद्याने स कलिः निवसति । ततः कलिः नलं प्रवेष्टुमवसरमन्विषति । अन्ते नलदमयन्त्योः प्रथमरात्रिकाले मिलनरात्रिमनोहरेण ग्रन्थोऽयं पूर्णतामेति ।

**श्लोकाः**

(1) **निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधास्सुधामपि ।**
**नलस्सितच्छत्रितकीर्तिमण्डलस्स राशिरासीन्महसां महोज्ज्वलः ॥**

**अन्वयः-** यस्य क्षितिरक्षिणः कथां निपीय बुधाः सुधाम् अपि तथा न आद्रियन्ते सितच्छत्रितकीर्तिमण्डलः महसां राशिं महोज्ज्वलः स नलः आसीत् ॥

**व्याख्या-** यस्य - प्रकृतस्य, क्षितिरक्षिणः - भूपतेः, कथाम् - उपाख्यानम्, निपीय - नितरामास्वाद्य सादरं श्रुत्वेतिभावः, बुधाः - विद्वांसः, सुधाम् अपि तथा - तेन प्रकारेण, न आद्रियन्ते - न आदरं कुर्वन्ति, सितच्छत्रितकीर्तिमण्डलः - शुक्लातपत्रीकृत यशोमण्डलः, महसाम् - तेजसाम्, राशिः - समूहः, महोज्ज्वलः - उत्सवदीप्यमानः, सः - प्रसिद्धः, नलः - नलनामको राजा, आसीत्- अभवत् ॥

**सरलार्थः-** यस्य नृपस्य नलस्य कथां श्रुत्वा विद्वांसः देवताः वा अमृतस्य अपि तथा आदरं न कुर्वन्ति । महाराजः नलः कीर्तिमण्डलं श्वेतच्छत्रं निर्मातुं सूर्यसमानं उत्सवैः समुज्वलः अथवा अतिशयः शृङ्गाररसयुक्त आसीत्।

**( २ )** **अधीतिबोधाचरणप्रचारणैर्दशचतस्रः प्रणयन्नुपाधिभिः ।**

**चतुर्दशत्वं कृतवान् कुतस्स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ॥ १-४**

**अन्वयः-** अयं चतुर्दशसु विद्यासु अधीतिबोधाचरणप्रचारणैः उपाधिभिः चतस्रः दशाः प्रणयन् चतुर्दशत्वं कुतः कृतवान् (इति) स्वयं न वेद्मि ॥

**व्याख्या-** नलस्यचतुर्दशविद्यायनं प्रतिपादयति । अधीतीति अयं - नलः, चतुर्दशसु - चतुर्दशसङ्ख्यकासु विद्यासु - वेदादिषु, अधीतिबोधाचरणप्रचारणैः - श्रवणाऽर्थज्ञानतदर्थाऽनुष्ठानप्रसारणैः, उपाधिभिः - भेदैः, चतस्रः - चतुःसङ्ख्यकाः, दशाः - अवस्थाः, प्रणयन् - कुर्वन्, स्वयम् - आत्मना, चतुर्दशत्वम् - चतुर्दशसङ्ख्यत्वम्, कुतः - कस्मात्, कृतवान् - विहितवान्, न वेद्मि - न जाने ॥

**सरलार्थः-** महाराजेन नलेन चतुर्दशसु विद्यासु शब्दशःअध्ययनम्, अर्थज्ञानम्, शास्त्रोक्त कर्मणामाचरणम् तथा च प्रसारणम् एतैः भेदैः प्रकारैः चतसृभिः चतुर्दशत्वं कथं कया रीत्या कृतम् ? तद् अहं न जाने । चतुर्दशविद्यानां चतुर्भिः भेदैः गुणेन षड्पञ्चाशत् भेदाः भवितव्याः परन्तु चतुर्दशमेव कथं जातमिति अध्ययनादिचतसृभिः अवस्थाभिः तस्य परिहारः भवति ।

**( ३ )** **न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तम् ।**

**तदात्मताध्यातधवा रते च का चकार वा न स्वमनोद्भवोभवम् ॥**

**अन्वयः-** का निशि तं स्वप्नगतं न ददर्श का च गोत्रस्खलिते तं न जगाद तदात्मताध्यातधवा का च वा रते स्वमनोद्भवं न चकार ।

**व्याख्या-** का- स्त्री, निशि - रात्रौ, स्वप्नगतं - स्वप्नप्राप्तम्, तम् - नलम्, न ददर्श - न दृष्टवती, अपि तु सर्वा अपि ददर्शेति भावः । का च - स्त्री, गोत्रस्खलिते - नामविपर्यासे, तम् - नलम्, न जगाद - न बभाषे, का च - स्त्री, रते - सुरते, तदात्मताध्यातधवा - नलरूपचिन्तितभर्तृका सती, स्वमनोद्भवं - निजचित्तकामोत्पत्तिम्, न चकार - न कृतवती ।

**सरलार्थः-** का स्त्री रात्रौ तं न दृष्टवती ? कया स्त्रिया नामोच्चारणभ्रान्त्या तस्य नलस्य नाम न गृहीतम् ? कया स्त्रिया रात्रौ रतिक्रीडायां कामदेवरूपस्य नलस्य भावः स्वपतौ न कृतः ? अर्थात् सर्वाभिः स्त्रीभिः रात्रौ नलः दृष्टः नलस्य नामोच्चारणं कृतम् एवं रतिक्रीडायां नलस्य भावः कृतः ॥

**( ४ )** **मनोरथेन स्वपतीकृतं नलं निशि क्व सा न स्वपती स्म पश्यति ।**

**अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम् ॥**

**अन्वयः-** स्वपती सा मनोरथेन स्वपतीकृतं नलं क्व निशि न पश्यति स्म ? सुप्तिः अदृष्टम् अपि अर्थम् अदृष्टवैभवात् जनदर्शनातिथिं करोति ।

**व्याख्या-** स्वपती - निद्राती, सा - दमयन्ती, मनोरथेन - अभिलाषेण, स्वपतीकृतं - निजनाथीकृतम्, नलम् - नैषधम्, क्व - कुत्र, निशि - रात्रौ, न पश्यति - न दृष्टवती, सुप्तिः - स्वप्नः, अदृष्टवैभवात् - धर्माऽधर्मप्रभावात्, अदृष्टमपि - अविलोकितम् अपि, अर्थम् - पदार्थम्, जनदर्शनातिथिम् - लोकविलोकनगोचरम्, करोति - विदधाति, स्वप्नरूपेण दर्शयतीति भावः ।।

**सरलार्थः-** निद्राती दमयन्ती अभिलाषेण स्वपतिं नलं कस्यां रात्र्यां न पश्यति ? अर्थात् सर्वासु रात्रिषु पश्यति । स्वप्नः धर्माधर्मप्रभावेण अवलोकितपदार्थानिव दर्शयति तथा नास्ति अनावलोकितपदार्थानामपि स्वप्नाः समागच्छन्ति ॥

**( ५ )** **स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनयामयाचत ।**

**त्यजन्त्यसून्शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् ॥**

**अन्वयः-** भृशं स्मरोपतप्तः अपि सः प्रभुः विदर्भराजं तनयां न अयाचत मानिनः असून् शर्म च त्यजन्ति एवम् अयाचितव्रतं न त्यजन्ति ।

**व्याख्या-** प्रभुः - समर्थः, स - नलः, भृशम् - अत्यर्थम्, स्मरोपतप्तः अपि - कामसन्तप्तः अपि, विदर्भराजम् - भीमनृपम्, तनयाम् - पुत्रीम्, न अयाचत - नो याचितवान्, मानिनः - अभिमानिनः, असून् - प्राणान्, शर्म च - सुखं च, त्यजन्ति - जहति, वरं - प्राणसुखत्यागोऽपि मनाक्प्रियः, तु- किन्तु, एकम् - अद्वितीयम्, अयाचितव्रतम् - अयाचनानियमं तु, न त्यजन्ति - न जहति ।

**सरलार्थः-** समर्थः महाराजः नलः अतिशयकामपीडितो भूत्वापि विदर्भराजभीमात् पुत्रीं दमयन्तीं न याचते । किमर्थं तर्हि मनस्विनः पुरुषाः प्राणान् सुखानि च त्यजन्ति किन्तु अयाचकव्रतं नियमं न त्यजन्ति ।

**( ६ )** **फलानि पुष्पाणि च पल्लवे करे वयोऽतिपातोद्गतवातवेपिते ।**

**स्थितैः समाधाय महर्षिवार्द्धकाद्वने तदातिथ्यमशिक्षिशाखिभिः ॥ १- ७७**

**अन्वयः-** वयोऽतिपातोद्गतवातवेपिते पल्लवे करे फलानि पुष्पाणि च समाधाय स्थितैः शाखिभिः वने महर्षिवार्द्धकात् तदातिथ्यम् अशिक्षि ॥

**व्याख्या-** वयोऽतिपातोद्गतवातवेपिते - पक्षिपातोत्पन्नवायुकम्पिते, पल्लवे - किसलये, करे- पाणौ, फलानि - सस्यानि, पुष्पाणि - कुसुमानि, समाधाय - निधाय, स्थितैः - तिष्ठद्भिः, वने - उपवने, शाखिभिः - वृक्षैः, महिर्षवार्द्धकात् - वृद्धमहर्षिसङ्घात्, तदातिथ्यम् - नलाऽतिथिसत्कारः, अशिक्षि - शिक्षितम् ॥

**सरलार्थः-** बाल्यादि-अवस्थान्ते समुत्पन्नेन वातदोषेण कम्पितपल्लवसमानं हस्ते फलानि पुष्पाणि च गृहीत्वा स्थितैः वेदशाखाध्ययनवृद्धैः महर्षिभिरिव वने पक्षिणामुड्डयनेन समुत्पन्नेन वायुना कम्पितपल्लवरूपे हस्ते फलानि पुष्पाणि च गृहीत्वा स्थितेभ्यः वृक्षेभ्यः महर्षयः राज्ञः नलस्य आतिथ्यसत्कारं शिक्षितवन्तः ॥

**( ७ )** **विलासवापीतटवीचिवादनात् पिकालिगीतेः शिखिलास्य लाघवात् ।**

**वनेऽपि तौर्य्यत्रिकमारराध तं क्व भोगमाप्नोति न भाग्यभाग्जनः ॥**

**अन्वयः-** (नलः) विलासवापीतटवीचिवादनात् पिकालिगीतेः शिखिलास्य लाघवात् वने अपि तं तौर्यत्रिकम् आरराध भाग्यभाक् जनः क्व भोगम् न आप्नोति ?

**व्याख्याः-** विलासवापीतटवीचिवादनात् - विहारदार्घिकातीरतरङ्गनादात्, पिकालीगीतेः - कोकिलभ्रमरगानात्, शिखिलास्य लाघवात् - मयूरनृत्यनैपुण्यात्, वने अपि - उपवने अपि, तम् - नलम्, तौर्यत्रिकम् - नृत्यगीतवाद्यत्रयम्, आरराध - आराधयामास, भाग्यभाक् - भाग्यवान्, जनः - लोकः, क्व - कुत्र, भोगं-सुखम्, न आप्नोति- न प्राप्नोति ।

**सरलार्थः-** विहारवापीतटतरङ्गनादैः कोकिलभ्रमरगीतैः मयूरैः नृत्यनैपुण्येन राज्ञः नलस्य नृत्येन, गीतेन, वाद्येन च सेवा कृता । भाग्यवान् जनः कुत्र सुखं न प्राप्नोति ? सर्वत्र सुखं प्राप्नोतीति भावः ।

**(८)** **न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः ।**

**विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि ॥**

**अन्वयः-** त्वदीक्षणाद्विश्वसितान्तरात्मनः मम वधः केवलं प्राणिवधः न विश्वासजुषां द्विषाम् अपि निबर्हणं धर्मधनैः विशिष्य विगर्हितम् ।

**व्याख्या-** (हे नृप) त्वदीक्षणात् - भवन्मूर्तिदर्शनात्, विश्वसितान्तरामत्मनः - विश्रब्धचित्तस्य, मम- हंसस्य, वधः - व्यापादनम्, केवलः प्राणिवधः - जन्तुव्यापादानमात्रम्, न - न अस्ति, विश्वासजुषां - विश्रम्भभाजाम्, द्विषाम् अपि - शत्रूणाम् अपि, निर्बर्हणं - वधः, धर्मधनैः - धर्मपरैः विशिष्य - अतिरिच्य, विगर्हितं - अत्यन्तनिन्दितम् ।

**सरलार्थः-** भवन्तं दृष्ट्वा विश्वस्तचित्तस्य मम हिंसा न केवलं प्राणिहिंसा वर्तते । ये शत्रवः विश्वासं कुर्वन्ति तादृशानां विश्वस्तशत्रूणां हिंसामपि धर्मज्ञाः निन्दन्ति तर्हि मादृशानां निर्दोषप्राणिनां तु हिंसया किं तव हे नल निन्दा भविष्यति ? भविष्यत्येव ॥

**(९)** **श्रियमेवपरंधराऽधिपाद् गुणसिन्धोरुदितामवेहि ताम् ।**

**व्यवधावपि वा विधोः कलां मृगचूडानिलयां न वेद कः ॥**

**अन्वयः-** (हे राजन्) तां गुणसिन्धोः धराऽधिपात् उदितां श्रियम् एव परम् अवेहि,वा व्यवधौ अपि मृगचूडानिलयां विधोः कलां को न वेद ?

**व्याख्या-** (हे राजन्) तां - दमयन्तीम्, गुणसिन्धोः - दयादाक्षिण्यादिगुणसमुद्रात्, धराऽधिपात् - भीमनरेन्द्रात्, उदिताम् - उत्पन्नाम्, श्रियम् एव - लक्ष्मीम् त्वं, परम् - ध्रुवम्, अवेहि - जानीहि, वा - अथवा, व्यवधौ अपि - व्यवधाने सत्यपि, मृगचूडानिलयाम् - शिवशिखाऽऽश्रयाम्, विधोः - चन्द्रमसः, कलाम् - षोडशभागम्, को न वेद - को न जानाति ? सर्वोऽपि वेदेत्यर्थः ।

**सरलार्थः-** हे राजन् ! दमयन्तीम् गुणसमुद्रात् भीमात् समुत्पन्नां लक्ष्मीम् एव जानीहि । अथवा व्यवधाने जाते सति शिवाश्रयभूतां चन्द्रकलां को वा न जानाति ? सर्वे जानन्त्येव इति भावः ॥

**(१०)** **धन्याऽस्ति वैदर्भि ! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।**

**इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥ ३ - ११५**

**अन्वयः-** हे वैदर्भि ! धन्या असि,यया उदारैः गुणैः नैषधोऽपि समाकृष्यत । चन्द्रिकायाः यत् अब्धिम् अपि उत्तरलीकरोति इतः का स्तुतिः खलु ।

**व्याख्या-** हे वैदर्भि ! - हे दमयन्ति ! धन्या - पुण्यवती, असि - वर्तसे, यथा - त्वया, उदारैः - उत्कृष्टैः, गुणैः - लावण्यविनयादिभिः, नैषधोऽपि - नलोऽपि, समाकृष्यत - सम्यक् आकृष्टः वशीकृतः, चन्द्रिकायाः - कौमुद्याः, यत् - यस्माद्धेतोः, अब्धिम् अपि - समुद्रम् अपि, उत्तरलीकरोति - क्षोभयति, इतः - अस्मात् का स्तुतिः खलु - का वर्णना खलु । न काऽपीति भावः ।

**सरलार्थः-** हे विदर्भदेशकुमारि ! भवती धन्यास्ति । त्वया नलोऽपि आकृष्टः कृतः । या चन्द्रिका समुद्रमपि क्षोभयति ततोऽप्यधिकं तस्याः किं वर्णनं भवितुमर्हति ? न किमपीति भावः ॥

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) नैषधीयचरिते कति सर्गास्सन्ति ?

(क) २० (ख) १९ (ग) २२ (घ) १७

(२) नैषधे मल्लिनाथस्य टीकायाः नाम किम् ?

(क) चन्द्रिका (ख) जीवातु (ग) सर्वङ्कषा (घ) भामिनी

(३) नैषधीयचरितमहाकाव्यस्योपजीव्यं किमस्ति ?

(क) धर्मशास्त्रम् (ख) रामायणम् (ग) महापुराणम् (घ) महाभारतम्

(४) महाकाव्येऽस्मिन् द्वितीयसर्गे किं छन्दः प्रयुक्तमस्ति ?

(क) वियोगिनी (ख) वंशस्थः (ग) द्रुतविलम्बितम् (घ) भुजङ्गप्रयातम्

(५) नलदमयन्त्योः संयोगः केन पक्षिणा क्रियते ?

(क) बकेन (ख) शुकेन (ग) कपोतेन (घ) हंसेन

(६) वंशस्थछन्दसि कति वर्णाः भवन्ति ?

(क) एकादश (ख) चतुर्दश (ग) द्वादश (घ) पञ्चदश

(७) दमयन्त्याः स्वयंवरे देवेषु कः नासीत् ?

(क) इन्द्रः (ख) अग्निः (ग) अश्विनीकुमारः (घ) वरुणः

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) दमयन्त्याः स्वयंवरः कुत्र भवति ?

(२) 'खण्डनखण्डखाद्यम्' इत्यस्य प्रतिपाद्यविषयः कः ?

(३) नैषधीयचरिते महाकाव्ये कति श्लोकास्सन्ति ?

(४) नैषधीयचरितमहाकाव्ये प्रचुरतया कस्य छन्दसः प्रयोगः कृतः वर्तते ?

(५) नैषधीयचरितमहाकाव्यस्य कथानकं महाभारते कस्मिन् पर्वणि समागच्छति ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) नैषधस्य प्रथमसर्गस्य कथानकम् ।

(२) नैषधीयचरितस्य सारः ।

**४. टिप्पणी लेख्या ।**

(१) द्वितीयसर्गस्य कथा ।

(२) हंसस्य वर्णनम् ।

**५. अ विभागेन सह ब विभागं योजयत ।**

| **अ** | **ब** |
|---|---|
| (१) निपीय | (१) समर्थः |
| (२) चतुर्दश | (२) प्राणान् |
| (३) प्रभुः | (३) पीत्वा |
| (४) असून् | (४) कौमुद्याः |
| (५) चन्द्रिकायाः | (५) विद्याः |

**छात्रप्रवृत्तिः**

- गुर्जरभाषायां निर्मितं नलदमयन्तीचलचित्रं द्रष्टव्यम् ।

**शिक्षकप्रवृत्तिः**

- महाभारतस्य नलोपाख्यानं पठित्वा छात्रेभ्यः कथानकं कथयिष्यति ।

●

# १४ खण्डकाव्यम्

**प्रस्तावना**

खण्डकाव्यं महाकाव्यस्य एकादेशानुसारि अस्ति । अस्य काव्यभेदस्य इतिहासः कदा आरभते इति विचार्यते चेत् ऋग्वेदकाल एव खण्डकाव्यस्य बीजमिति स्पष्टं कथयितुं शक्यते । मनोहारिणि उषःसूक्ते, वीररसप्रधाने, विपाशाशुतुद्रीसूक्ते, सुदामाविजयसूक्ते च खण्डकाव्यस्य प्रथमं स्वरूपं प्राप्यते .

---

**अभ्रावेत पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।**

**जायेव पत्ये उशती सुवासा उषा सहस्त्रव निरिणीते आसः ॥**

(ऋग्.-उषःसूक्तम्.)

इयम् उषःसुन्दरी भ्रातृदीना भगिनी इव स्वकीयभागाय पितृस्थानीयं सूर्यम् उपतिष्ठति, कदाचित् पतिं च प्रेमपाशे बद्धुम् उत्सुका भवति, सुन्दरः अपि सुन्दरी इव सूर्यस्य समीपं गच्छति ।

अत्र एवंविधम् अन्यत्र च मन्त्रसमुदाये यद् आख्यानं जातं, तत् खण्डकाव्यस्य आदिमं रूपं मन्तुं शक्यते ।

अग्रवालमहोदयाः खण्डकाव्यस्य पञ्चप्रकारान् वर्णयन्ति ।

(१) ऋग्वेदकालिकं खण्डकाव्यम् - अत्र खण्डकाव्यानुकारैः सूक्तैर्ऋषयोऽव्याजम् आत्मभावान् व्यञ्जयामासुः यथा उषः सूक्तादिषु ।

(२) भक्तिसमयं खण्डकाव्यम् - यस्य भेदस्य निदर्शनम्, बौद्धग्रन्थेषु उपनिषत्सु च प्राप्यते ।

(३) ऐतिहासिकं खण्डकाव्यम् - अस्य भेदस्य उदाहरणं रामायणे भारते वा कृतं प्रकृतिवर्णनं बोध्यम् ।

(४) रूपकान्तर्गतं खण्डकाव्यम् - रूपकेषु यत्र तत्र पात्राणां वस्तुवर्णनपराणि प्रेमप्रकाशनपराणि वा पद्यानि उदाहरणतया स्वीकर्तुं शक्यन्ते ।

(५) उत्तरकालभवानां कवीनां शृङ्गारप्रधानं सङ्कीर्णं वा खण्डकाव्यम् । एषु पञ्चसु भेदेषु पंचमभेद एव सर्वोत्कर्षं गतः कालिदासामरुकभर्तृहरिजगन्नाथादिभिरस्य भेदस्य साहित्यं सृष्टम् । अन्ये भेदा बीजभावेन स्थिता अपि पोषकसाहित्याभावात्सुप्तकल्पा एव ।

इदमेव खण्डकाव्यम् अत्याधुनिकाः गीतिकाव्यम् इति नाम्ना उपयोगं कुर्वन्ति । अत्र गीतिकाव्यभेदे एव दूतकाव्यं, मुक्तककाव्यं वर्णनप्रधानकाव्यानि च आयान्ति । तेन खण्डकाव्यानाम् अयं प्रकारः मेघदूतम्, ऋतुसंहारम्, गीतगोविन्दम्, भर्तृहरेः शतकत्रयम्, अमरुकशतकम्, भल्लरशतकम्, भामिनीविलासम् इत्यादि-अन्यानि दूतकाव्यानि च सन्ति । अन्येषाम् आचार्याणां मतानुसारं लक्षणानि अवलोकयामः । आचार्यविश्वनाथेन स्वग्रन्थे साहित्यदर्पणे षष्ठ-परिच्छेदे उक्तं यत् -

**''खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च''**

महाकाव्यं काव्यं वा कतिपयलक्षणोपलक्षणयुक्तः यः पद्यप्रबन्धः अस्ति तदेव खण्डकाव्यम् उच्यते ।

सारभूताम् एकां कथां पात्रं वा आधारीकृत्य कृतं काव्यं खण्डकाव्यम् ''मेघदूतम्'' मुक्तकखण्डकाव्यम् अस्ति। आचार्य अभिनवगुप्तः कथयति यत् पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तकम् । (ध्वन्यालोकलोचनः ३ उद्योतः)

खण्डकाव्योदाहरणानि, विविधकवीनां ग्रन्थानां मध्ये प्रमुखानि ''मेघदूतम्'' इत्यादीनि वर्तन्ते ।

आधुनिककविवरैः अपि खण्डकाव्यविषये प्रतिपादितं वर्तते यत् प्रो. राधावल्लभत्रिपाठिमहोदयेनापि उक्तं-

**'जीवनस्यैकदेशनिरूपकं खण्डकाव्यम्' ।**

अर्थात् जीवनस्य एकभागस्य निरूपकं खण्डकाव्यम् उच्यते । तथैव प्रो. अभिराजराजेन्द्रमिश्रमहोदयानुसारं अपि

**कस्यचित्पुरुषार्थस्य वर्णनन्तु यदांशिकम् ।**

**जीवनस्थाथवा नेतुः खण्डकाव्यं तदुच्यते ॥**

अर्थात् कस्यापि पुरुषार्थस्य (धर्म, अर्थ, काम, मोक्ष) आंशिकवर्णनं वा नायकस्य जीवनस्य वृत्तान्तं खण्डकाव्यं प्रोच्यते ।

उदाहरणरूपेण विविधकवीनां ग्रन्थानां परिचयात्मकम् अध्ययनम् अत्र पश्यामः ।

**महाकविकालिदासस्य मेघदूतम्**

मेघदूते कविना विरहिणो लोकस्य मनःस्थितेः वर्णनं कृतं वर्तते । पूर्वमेघे बाह्या, उत्तरमेघे अन्तःप्रकृतिः चित्रिता। सन्देशप्रेषणाय प्रवृत्तिरियं पुराणेषु अपि प्राप्यते । नलचरिते हंसेन संवादप्रेषणे उपकृतम् । युधिष्ठिरेण कृष्णद्वारा संवादः प्रेषितः । रामेण हनुमता संवादः प्रापितः । तदत्र कालिदासेन रामायणमनुसृत्य मेघदूतं प्रणीतम् । कालिदासः स्वयमपि तथ्यमिदं गोपयितुं नैच्छत् । स्वकाव्यकौशल्येन इदं खण्डकाव्यं स्वीयां मौलिकतां न जहाति ।

विविधकविभिः मेघं दूतकरणे आपत्तिजन्यसंवादाः कृताः तथापि कविना - 'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु' इत्युक्त्वा सकलापि विषयापत्तिः दूरीकृता ।

कालिदासस्य मेघदूतं विलोक्य अन्यैः कविभिः स्वमार्गः प्रशस्तः कृतः भवभूतिरपि मालतीमाधवे-

**दैवात्पश्येर्जगति विचरन् मत्प्रियां मालतीं चेत् ।**

**आश्वास्यादौ तदनु कथयेर्माधवीयामवस्थाम् ॥**

एवमेव अनेके कवयः कालिदासमनुसृतवन्तः ।

काव्यशैल्या अलौकिकः मादकत्वान्वितः प्रायः श्लोकशतकान्वितः ग्रन्थः वर्तते, तेन 'माघे मेघे गतं वयः' इति जनाः भजन्ते । कविना ग्रन्थे सौन्दर्यसृष्टेः पराकाष्ठा प्रकाशिता यथा-

**''तन्वीश्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी''**

इति सर्वाणि विशेषणानि कवेः पाण्डित्यं जनयन्ति । एतावन्न अपितु भौगोलिकं, वैज्ञानिकं ज्ञानमपि अत्र प्रतिपादितं वर्तते ।

**ऋतुसंहारकाव्यम् :**

कालिदासीयमेवेदं काव्यम् । अत्र लघुकायाः षट्सर्गाः उद्धृताः । प्रायः आहत्य १५३ श्लोकाः संभवन्ति । तस्मिन् षडर्तुणां वर्णनम् आयाति । कविना प्रकृतेः सर्वावस्थासु परिवर्तितानि तानि चित्राण्यत्र व्यक्ताव्यक्तं प्रत्यक्षानुकृतिः कृता वर्तते ।

केचिदत्र मल्लिनाथस्य टीकामनालोक्य अस्य कालिदासस्य प्रणीतत्वं न स्वीचक्रुः । केचित्पुनरत्र ग्रीष्मं प्रथमं वर्ण्यमानं दृष्ट्वा किमपि वितृष्णत्वमिव प्रकाशयन्ति । उभयमपि न युक्तम् मल्लिनाथः सर्वानेव ग्रन्थान् वर्णयेदेषः कुत्रत्यः नियमः ? कुत्रचित् वर्षादौ वसन्तस्य प्रथमं वर्णनं पञ्चाङ्गादिषु श्रूयते, किन्तु काव्ये तु कवेः रुचिः प्राधान्यं भजते । अत एव प्रतिषेद्धुं न शक्नुमः । बहवः कालिदासा इत्युक्तिं मत्वा कस्य अयं ग्रन्थ इति स्वीकुर्वन्ति विद्वांसः । किन्तु महोदयः कीथः अस्य भाषा सरला सरसा इति मत्वा नान्यः भवितुमर्हति इति प्रत्युत्तरवान् ।

**जयदेवः ( गीतगोविन्दम् )**

जयदेवस्य द्वादशसर्गात्मकम् एकं खण्डकाव्यम् अस्ति । कविरयं मधुरकोमलकाव्यमर्मज्ञः लक्ष्मणसेननामकस्य बिहारप्रान्ते बङ्गदेशे राज्ञः सभापण्डित इति श्रूयते । लक्ष्मणसंवत्ख्रिष्टाब्दयोरन्तरं ११०९ मितं विद्यते । स एव जयदेवस्यापि भवेत् इत्यत्र न शङ्का, महाराष्ट्रप्रदेशीयकविभास्करभट्टबेरिकेरमहोदयेन 'शिशुपालवधम्' नामके ग्रन्थे गीतगोविन्दस्य पद्यानि स्वीकृतानि इति मिलति । गुर्जरप्रदेश्य शार्ङ्गदेवस्य शिलालेखे मङ्गलश्लोकरूपेण गीतगोविन्दस्य पद्यं प्राप्यते । शार्ङ्गदेवस्य समयः 1348 – 1931 मितं प्राप्यते ततः पूर्वोऽयं इति निश्चीयते ।

काव्यमिदं शुद्धगीति एवं शुद्धनाट्ययोरन्तरे वर्तते । सर्वेऽपि सर्गाः गीतमयाः सन्ति । सर्गाणां कथा परस्परं योजयितुं कतिचनश्लोकाः अपि सन्ति । केचन काव्यमिदं शृङ्गारादिरसान्वितमिति वदन्ति । किन्तु वस्तुतस्तु श्रीकृष्णस्य परमात्मतत्त्वं एवं गोपिकायाः जीवतत्त्वं अनयोः जीवपरमात्मनोः मेलनं वर्णितम् अस्ति ।

गीतगोविन्दस्य प्रभावो न केवलमुत्तरभारतीयसाहित्यजगति किन्तु गुर्जरमहाराष्ट्रतमिलादिदक्षिणप्रान्तेऽपि प्रकटमुपलक्ष्यते। चैतन्यमहाप्रभुः अस्य गीतस्य परमभक्तः आसीत्, गीतगोविन्दस्य नित्यगानार्थं चैतन्यमहाप्रभोः शिष्यः प्रतापरुद्रः भूमिदानं कृतवान् ।

**अमरुकः**

यथा साहित्यजगति अमरुककविता प्रसिद्धा तथैव कृतिरियं प्रसिद्धा वर्तते । अयं नवमशतकतः पूर्वे इति कथयितुं शक्यते । ध्वनिकाराः अस्मिन् एवं कथयन्ति यत् –

**मुक्तेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिनः ।**

अमरुकस्य कवेः मुक्तकनिः शृङ्गारादिरसेन प्रसिद्धानि, कविवामनेनापि ८00 ई. समुद्भूतेनास्य पद्यत्रयम् उदाहृतम्। अथास्य समयः अष्टमशताब्द्यां मन्यते ।

अनेन प्रणयव्यवहाराः शृङ्गाररसान्विताः कामिजनानां मनोभावा एव न अपितु परस्पराणाम् आकर्षणोत्पादनवर्णनं कृतम् । अनेन विदुषा गौरवम् लब्धम् । संस्करणभेदेन शतकस्य भेदोऽपि प्राप्यते ।

बहुभिः आचार्यैः अस्य व्याख्याऽपि कृता वर्तते, तत्र अर्जुनवर्मा, रविचन्द्रादयः सन्ति । वेमभूपालेन तु नायिकाभेदपरतया रचिता वर्तते । व्यञ्जनाशक्तेः यथा –

**असद्वृत्तौ नायं न च खलु गुणैरेव रहितः**

**प्रियो मुक्ताहारस्तव चरणमूले निपतितः ।**

**गृहाणेमं मुग्धे व्रजतु निजकण्ठप्रणयिता-**

**मुपायो नास्त्यन्यस्तव हृदयसन्तापशमने ॥**

पद्येऽस्मिन् वृत्तगुणाहारादिपदेषु श्लेषमहिमा वर्णितः अस्ति अन्येऽपि बहवो एवमेव श्लोकाः उट्टङ्किताः सन्ति ।

**गोवर्धनाचार्यः**

कविरयं मैथिलः पण्डितः । लक्ष्मणसेनस्य सभायाम् आसीत् । उक्तं च –

**गोवर्धनस्य शरणो जयदेव उमापतिः ।**
**कविराजश्च रत्नानि समितौ लक्ष्मणस्य तु ॥**

कवि जयदेवोऽपि एनं स्मरति स्म । शृङ्गारोत्तमरसप्रमेयरचनया गोवर्धनस्पर्धिनः न विस्मरन्ति । प्रायः द्वादशशताब्द्याः पूर्वं स्थितिरस्य मन्यते । 'आर्यासप्तशती' नाम्ना खण्डकाव्येन विद्वत्सु सुप्रसिद्धः । विदुषां सुप्रसिद्धः । अस्य कवेः उक्त्यैव ज्ञायते यदस्य शिष्यः उदयनः भ्राता च बलभद्रः आस्ताम्, यथा –

**उदयनबलभद्राभ्यां सप्तशती शिष्यसोदराभ्यां मे ।**
**द्यौरिव रविचन्द्राभ्यां प्रकाशिता निर्मलीकृत्य ।**

अस्य अन्यः ग्रन्थः 'गाथासप्तशती' अपि सुप्रसिद्धः, अनेन जीवनस्यान्यानि रहस्यानि न उद्घाटितानि । ग्रन्थे प्रायः शृङ्गारप्रेमकामकलाकलाप इव प्रस्तुतः एव नास्ति, किन्तु कुत्रचित् सौम्यं सात्त्विकं स्वरूपमपि दृग्गोचरं भवति। क्वचित् क्वचिदनेन लोकवृत्तस्यापि साधु समावेशः कृतः अस्ति ।

**पण्डितराजो जगन्नाथः**

पण्डितराजः जगन्नाथः तैलङ्गब्राह्मणः आसीत् । उक्तं च आसफविलासे – 'तेलङ्गकुलावतंसेन पण्डितजगन्नाथेन'। तस्य पिता पेसभट्टः अथवा पेरुभट्टः तथा माता लक्ष्मीः । पिता पेरुभट्टः न्यायवेदान्त-दर्शन-व्याकरणादिशास्त्रेषु विद्वान् आसीत् । सर्वविद्याविशारदस्य पितुः सकाशात् जगन्नाथः अध्ययनमकरोत्, पितुः गुरोः शेषवीरेश्वरस्य सकाशात् अपि तेन अध्ययनं कृतम्। एवं पण्डितराजः जगन्नाथः स्वयं सर्वेषु शास्त्रेषु पण्डितः आसीत्। विशेषरूपेण दर्शने तथा साहित्यशास्त्रे तस्य अधिकारो वर्तते स्म । सः तस्य विमलविद्यया 'शाहजहाँ' इति महाराजस्य राज्याश्रयं प्राप्तवान् तथा 'पण्डितराज' इति उपाधिं लब्धवान् । पण्डितराजः अध्ययनं कृत्वा जयपुरम् आगत्य पाठशालाम् अस्थापयत् । तत्र सः यवनानां ग्रन्थान् अधीत्य एकं काजीं पराजितवान् । पराजितः सः काजी देहलीं गतः शाहजहाँधिपस्य पुरतः जगन्नाथस्य प्रशंसां कृतवान्। प्रशंसां श्रुत्वा बादशाहः तं देहलीं निमन्त्रितवान् बादशाहकृपाभाजनः अयं जगन्नाथः यवनकन्यां प्रति आसक्तो भूत्वा पाणिग्रहणमकरोत् । अनन्तरं युवावस्थां सः सुखपूर्वकं बादशाहस्याश्रयत्वात्, यापितवान् किन्तु जरावस्थायां सः यवनयुवत्या सह काशीम् आगतः । काश्यां वसन्तः विद्वांसः ब्राह्मणाः 'यवनी – संसर्ग – दूषितोऽयम्' इति उक्त्वा जगन्नाथं जातिच्युतम् अकुर्वन् । तिरस्कृतः पण्डितराजः गङ्गातटे उपविश्य स्वकीयपद्यैः गङ्गास्तुतिं कृतवान् । प्रसन्ना गङ्गा एकेन पद्येन एकं सोपानम् आरुह्य द्विपञ्चाशत्तमे सोपाने उपविष्टं सपत्नीकं जगन्नाथं पवित्रीकृतवती ।

शाहजहाँधिपस्य शासनकालः ख्रिष्टाब्दः 1628 तः 1666 पर्यन्तं वर्तते, अतः पण्डितराजस्य स्थितिकालोऽपि एष एव स्यात् । पण्डितराजेन जगन्नाथेन रचिताः ग्रन्थाः द्वादश सन्ति, अत्र मतभेदः स्यात् ।

| | **ग्रन्थाः** | | **वर्ण्यविषयाः** |
|---|---|---|---|
| (1) | अमृतलहरी | – | अत्र यमुनायाः स्तुतिः कृता वर्तते । |
| (2) | आसफविलासः | – | नवाब – आसफखांमहोदयस्य वर्णनमत्र विद्यते । |
| (3) | करुणालहरी | – | भगवतः विष्णोः स्तुतिः अत्र कृता अस्ति । |
| (4) | जगदाभरणम् | – | शाहजहाँतनयस्य दाराशिकोहस्य वर्णनम् अत्र वर्तते । |

(5) पीयूषलहरी - अस्य ग्रन्थस्य अपरं नाम गङ्गालहरी अस्ति । अत्र गङ्गायाः स्तुतिः वर्तते ।

(6) प्राणाभरणम् - नेपालाधिपस्य प्राणनारायणस्य वर्णनम् अस्मिन् खण्डकाव्ये कृतमस्ति ।

(7) भामिनीविलासः - भामिन्याः कृते स्मरणात्मकानि पद्यानि अस्मिन् ग्रन्थे सन्ति ।

(8) यमुनावर्णनम् - एषः ग्रन्थः अप्राप्यः किन्तु रसगङ्गाधरे तस्योल्लेखः प्राप्यते ।

(9) लक्ष्मीलहरी - लक्ष्मीदेव्याः स्तुतिः जगन्नाथेनात्र कृता वर्तते ।

(10) मनोरमाकूचमर्दनम् - भट्टोजिदीक्षितद्वारा रचितस्य मनोरमानामकग्रन्थस्य खण्डनम् अस्मिन् ग्रन्थे कृतमस्ति ।

(11) चित्रमीमांसाखण्डनम् - साहित्यशास्त्रस्य अयं ग्रन्थः । अप्पयदीक्षितकृतः चित्रमीमांसा इति ग्रन्थः तस्य खण्डनमस्मिन् कृतम्

(12) रसगङ्गाधरः

पण्डितराजस्य इदं ग्रन्थरत्नम् अपूर्णम् एव उपलभ्यते । अनेन ग्रन्थेन पण्डितराजस्य कीर्तिः व्यापृताऽभवत् । रसगङ्गाधरः अलङ्कारशास्त्रस्य निबन्धराट् सन्नपि सुन्दरकवितानां सङ्ग्रहात्मकः काव्यग्रन्थः अपि वर्तते, अतः जगन्नाथः न केवलं पण्डितराजः अपि तु कविराजः ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) खण्डकाव्यस्य अपरं नाम किम् ?

(क) महाकाव्यम् (ख) गीतिकाव्यम् (ग) चम्पूकाव्यम् (घ) नाटकम्

(२) खण्डकाव्यस्य लक्षणं साहित्यदर्पणे कस्मिन् परिच्छेदे अस्ति ?

(क) प्रथमे (ख) चतुर्थे (ग) षष्ठे (घ) दशमे

(३) अधोऽङ्कितेषु किं खण्डकाव्यं नास्ति ?

(क) मेघदूतम् (ख) अमरूशतकम् (ग) गीतगोविन्दम् (घ) कुमारसम्भवम्

(४) ऋतुसंहारे कति श्लोकाः ?

(क) 153 (ख) 154 (ग) 155 (घ) 151

(५) 'गीतगोविन्द' ग्रन्थे कति सर्गाः ?

(क) त्रयोदश (ख) द्वादश (ग) एकादश (घ) पंचदश

(६) अमरुशतकस्य प्रधानरसः कः ?

(क) अद्भुतः (ख) वीरः (ग) शृङ्गारः (घ) करुणः

(७) गोवर्धनाचार्यस्य स्थितिः कदा मन्यते ?

(क) दशमशताब्द्याम् (ख) अष्टमशताब्द्याम् (ग) नवमशताब्द्याम् (घ) द्वादशशताब्द्याम्

(8) जगन्नाथस्य मातुः नाम किम् ?

(क) लक्ष्मी (ख) सरस्वती (ग) रुद्राणी (घ) कमला

(9) 'रसगङ्गाधरः' ग्रन्थः कस्य कवेः अस्ति ?

(क) भारवेः (ख) माघस्य (ग) कालिदासस्य (घ) जगन्नाथस्य

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) खण्डकाव्यस्य बीजं किम् ?

(२) विश्वनाथेन खण्डकाव्यस्य किं लक्षणं प्रोक्तम् ?

(३) युधिष्ठिरेण कस्य दूतस्य उपयोगः कृतः ?

(४) गीतगोविन्दस्य परमभक्तः कः आसीत् ?

(५) गोवर्धनाचार्यस्य खण्डकाव्यस्य नाम किम् ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) ऋग्वेदानुगान् पञ्चप्रकारान् स्पष्टं कुरुत ।

(२) आधुनिककवीनां खण्डकाव्यमतानि स्पष्टं कुरुत ।

(३) गीतगोविन्दस्य विविधमतानि स्पष्टं कुर्वन्तु ।

(४) जगन्नाथस्य जातिभ्रष्टं वर्णयन्तु ।

**४. अ विभाग ब विभागयोः योग्यसंयोजनं कुरुत ।**

| **अ** | **ब** |
|---|---|
| (१) मेघदूतम् | (१) जयदेवः |
| (२) गीतगोविन्दम् | (२) गोवर्धनाचार्यः |
| (३) अमरुकशतकम् | (३) कालिदासः |
| (४) आर्यासप्तशती | (४) अमरुकः |
| (५) अमृतलहरी | (५) जगन्नाथः |

**५. टिप्पणी लेख्या ।**

(१) गोवर्धनाचार्यः

(२) पण्डितराजजगन्नाथः

(३) जयदेवः

**छात्रप्रवृत्तिः**

- छात्राःविविध कवीनां जीवनपरिचयं कृतिं च जानन्तु ।

**शिक्षकप्रवृत्तिः**

- विविधखण्डकाव्यविषये बोधयन्तु ।

●

# १५ मेघदूतम्

**प्रस्तावना**

महाकवि-कालिदासविरचितं 'मेघदूतम्' एकं 'खण्डकाव्यम्' अस्ति । काव्यमिदं भागद्वये विभक्तं वर्तते । पूर्वमेघः उत्तरमेघश्च । तत्र पूर्वमेघदूते मार्गवर्णनमाध्यमेन शापग्रस्तः यक्षः एकवर्षपर्यन्तं निवासं कुर्वन् रामगिर्याश्रमतः अलकानगरीं यावत् मेघेन केन पथा गन्तव्यम्, इति सप्रकृतिचरित्रचित्रणपुरस्सरं काव्यकौशल्यजन्योत्कृष्टतां जनयति कविः । उत्तरमेघे अलकापुर्याः रमणीयतां प्रतिपाद्य सन्देशवर्णनम् उत्कृष्टरूपेण प्रतिपादितं वर्तते ।

अस्मिन्मेघदूते विद्यमानानां श्लोकानामध्ययनं ज्ञानप्रदं वर्तते । अत्र सङ्कलितश्लोकाः यथा .............

अत्र पूर्वमेघे मन्दाक्रान्ता छन्द एवं त्रिषष्टिः श्लोकाः सन्ति ।

---

( 1 ) **तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो -**
**रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ - ।**
**मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः**
**कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥**

**अन्वयः-** राजराजस्य, अनुचरः अन्तर्बाष्पः कौतुकाधानहेतोः तस्य, पुरः कथम् अपि स्थित्वा चिरं दध्यौ-मेघ-आलोके सुखिनः अपि चेतः अन्यथावृत्ति भवति, कण्ठाश्लेषप्रणयिनि जने दूरसंस्थे पुनः किम् ?

**व्याख्या-** राजराजस्य - यक्षराजकुबेरस्य, अनुचरः - सेवकः, अन्तर्बाष्पः - अवरुद्धाश्रुः, कौतुकाधानहेतोः - आश्चर्योत्पादनकारणं, तस्य - मेघस्य, पुरः - अग्रे, कथम् - केनापि प्रकारेण, स्थित्वा - स्थितिं कृत्वा, चिरम् - अधिकसमयपर्यन्तम्, दध्यौ- अचिन्तयत्, मेघालोके - मेघदर्शने सति, सुखिनः अपि - प्रियजनसुखस्यापि, चेतः - चित्तम्, अन्यथावृत्तिः - उत्कण्ठायुक्तम्, भवति-जायते, कण्ठाश्लेषप्रणयिनि - कण्ठालिङ्गाभिलाषिणि, जने - पुरुषे, दूरसंस्थे - दूरवर्तिनि, पुनः किम् - का कथा ?

**सरलार्थः-** यक्षराजकुबेरस्य सेवकः यक्षः अश्रूणि अवरुद्ध्य उत्कण्ठायुक्तो भूत्वा तस्य मेघस्य सम्मुखे महाप्रयत्नेन स्थित्वा बहुचिन्ताग्रस्तोऽपि मेघस्य दर्शनं करोति । तेन प्रियायुक्तस्य जनस्यापि मनः विकृतं यदि भवति तर्हि प्रियाविरहस्य पुरुषस्य का कथा ?

( 2 ) **धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः**
**सन्देशार्थाः क्वपटुकरणैः प्राणिभिः प्रापणीयाः ।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे**
**कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥**

**अन्वयः-** धूमज्योतिः सलिलमरुतां सन्निपातः मेघः क्व ?, पटुकरणैः प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व ? इति औत्सुक्यात् अपरिगणयन्, गुह्यकः तं ययाचे हि कामार्ता चेतनाचेतनेषु प्रकृतिकृपणाः ।

**व्याख्या-** धूमज्योतिः - धूमतेजः, सलिलमरुताम्, - जलवायूनाम्, सन्निपातः - समूहः, मेघः - वारिदः, क्व - कुत्र ?, पटुकरणैः - चञ्चलेन्द्रियैः, प्राणिभिः - चेतनैः, प्रापणीयाः - प्रापयितव्याः, सन्देशार्थाः - वाचिकार्थाः, क्व - कुत्र ? इति - इत्थम्, औत्सुक्यात् - उत्साहयुक्तत्वात्, अपरिगणयन् - अविचारयन्, गुह्यकः

– धनरक्षकः यक्षः, तम् – मेघम्, ययाचे – याचनां करोति स्म, हि – निश्चयेन, कामार्ताः – कामातुराः, चेतनाचेतनेषु – सजीवनिर्जीवेषु, प्रकृतिकृपणाः – स्वभावजन्यदीनाः (भवन्ति) ।

**सरलार्थः-** धूम्रतेजोजलवायुद्वारा सम्मिश्रितः मेघः कुत्र ? कुत्र च चञ्चलेन्द्रियः चेतनायुक्तः संदेशार्थं प्रापणीयः पुरुषः इत्थम् उचितानुचितम् अविचारयन् यक्षः जडं मेघं याचते, यतो हि कामातुराः पुरुषाः चेतनाचेतनेषु स्वभावदीनाः भवन्ति । निश्चयेन कामान्धाः उचितानुचितविवेकशून्या भवन्ति, अतः जडं मेघं प्रति यक्षस्य याच्ञा स्वाभाविकी वर्तते ।

(3) **जातं वंशे भुवनविदिते पुष्करावर्तकानां**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।**
**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं**
**याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ॥**

**अन्वयः-** त्वां भुवनविदिते पुष्करावर्तकानां वंशे जातं कामरूपं मघोनः प्रकृतिपुरूषं जानामि तेन विधिवशात् दूरबन्धुः अहं त्वयि अधित्वं गतः अधिगुणे याञ्चा मोघा अपि वरम् अधमे लब्धकामा अपि न ।

**व्याख्याः-** हे मेघ ! त्वाम् – भवन्तम् (मेघं), भुवनविदिते – जगत्प्रसिद्धे, पुष्करावर्तकानाम् – एतन्नाम मेघानां, वंशे – कुले, जातम् – उत्पन्नम्, कामरूपम् – इच्छाधीने इन्द्रियम्, मघोनः – इन्द्रस्य, प्रकृतिपुरुषं – मुख्यसहजपुरुषम्, जानामि – वेद्मि, तेन – तेन कारणेन, विधिवशात् – भाग्यवशात्, दूरबन्धुः – भार्या रहितः, अहम् – यक्षः, त्वयि – भवति, अधित्वम् – याचकरूपम्, गतः – प्राप्तः, अधिगुणे – जीवे अधिकगुणं विषये, याच्ञा – याचना, मोघा अपि – निष्फला अपि, वरम् – श्रेष्ठम् वा प्रियम्, अधमे – जीवे निर्गुणविषये, लब्धकामा – सफला, अपि न – प्रिया न इत्यर्थः ।

**सरलार्थः-** हे मेघ ! अहं त्वां लोकप्रसिद्धे पुष्करावर्तकादिप्रलयकालिनमेघकुले उत्पन्नं जाने, यतो हि स्वेच्छारूपधरस्य इन्द्रस्य प्रमुखपुरुषं जाने, अहं च भाग्यवशात् भार्याया दूरे त्वां याचकत्वेन प्राप्तः कारणं यत् अधिकगुणयुक्ते पुरुषे याचना निष्फला अपि वरम् । किन्तु निर्गुणपुरुषे कृता याचना सफला अपि वरं नास्ति ।

**विशेषः-** मेघानां विशेषनामानि –
आवर्तः, संवर्तः, पुष्करः, द्रोणः, कालः, नीलजः, वरुणः, वायुः, तमः ।

(ज्योतिष शिक्षा सचित्र भाग – 7)

(4) **तां चावश्यं दिवसगणनातत्परामेकपत्नी –**
**मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।**
**आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां**
**सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥**

**अन्वयः-** दिवसगणनातत्पराम् अव्यापन्नाम् एकपत्नीम् भ्रातृजायाम् ताम् अविहतगतिः अवश्यं द्रक्ष्यसि आशाबन्धः प्रणयि कुसुमसदृशं विप्रयोगे सद्यः पाति अङ्गनानां हृदयं प्रायशः रुणद्धि ।

**व्याख्याः-** हे मेघ ! च – अपि, (त्वम्) दिवसगणनातत्पराम्–अवशिष्टदिवसगणनासक्ताम्, अव्यापन्नाम् – अमृताम्, एकपत्नीम् – पतिव्रताम्, भ्रातृजायाम् – भ्रातृपत्नीम्, ताम् – पूर्वकथिताम्, अविहतगतिः – निरन्तरगतिः,

अवश्यम् – निश्चयेन, द्रक्ष्यसि – अवलोकयिष्यसि, आशाबन्धः – अधिकतृष्णया बन्धः, प्रणयि- प्रेमयुक्तम्, कुसुमसदृशम् – पुष्पसदृशम्, विप्रयोगे – विरहे, सद्यः पाति – शीघ्रविनाशशीलम्, अङ्गनानाम् – स्त्रीणां, हृदयं – जीवितम्, प्रायशः – मुख्यत्वेन, रुणद्धि – अवरुद्धं भवति ।

**सरलार्थः-** हे मेघ ! त्वमवशिष्टदिनानां गणनायां तत्परां ममागमने आशाबन्धां जीवनधारणशीलां ते भ्रातृजायाम् अवलोकयिष्यति या हि तव अविच्छिन्नां गतिं दृष्ट्वा आशारूपं बन्धनं सुकुमार-कुसुमम् इव प्रेमबन्धनयुक्तं जीवनं यापयति स्म । प्रायः स्त्रीणां जीवनम् एवमेव अनष्टवत् आशाबन्धं भवति ।

**विशेषः-** श्लोकेऽस्मिन् उत्तरार्धे सामान्येन विशेषस्य समर्थनादर्थान्तरन्यासालङ्कारः ।

(5) **त्वामासारप्रशमितवनोपल्लवं साधु मूर्ध्ना**
**वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।**
**नक्षुद्रोऽपि प्रथमसृकृतापेक्षया संश्रयाय**
**प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥**

**अन्वयः-** आम्रकूटः, सानुमान्, आसारप्रशमितवनोपल्लवम्, अध्वपरिश्रमपरिगतम्, त्वाम्, साधु, मूर्ध्ना वक्ष्यति । क्षुद्रः, अपि संश्रयाय, मित्रे, प्राप्ते, प्रथमसुकृतापेक्षया, विमुखः, न, भवति । यः, तथा, उच्चैः, किं, पुनः ?

**व्याख्या-** हे मेघ ! आम्रकूटः – तन्नामकः, सानुमान् – पर्वतः, आसारप्रशमितवनोपल्लवम् – मूसलाधारवृष्ट्या प्रशान्तं दावानलम्, अध्वपरिश्रमपरिगतम् – मार्गपरिश्रमयुक्तम्, त्वां – मेघम्, साधु – सम्यक्, मूर्ध्ना – शिरसा, वक्ष्यति – धारयिष्यति, क्षुद्रःअपि – दीनःअपि, संश्रयाय – आश्रयाय, मित्रे – सुहृदि, प्राप्ते – आगते (सति), प्रथमसुकृतापेक्षया – पूर्वोपकारसंदृष्ट्या, विमुखः – पराङ्मुखः, न भवति – न जायते । यः तथा – तेन प्रकारेण, उच्चैः – उन्नतः स, किं पुनः – किं भूयः विमुखो न भवतीति ?

**सरलार्थः-** हे मेघ ! त्वाम् आम्रकूटपर्वतः अनराधारवृष्ट्या कृतप्रशान्तदावानलं विलोक्य प्रसन्नः सन् तव मार्गश्रम-दूरीकरणाय स्वशिखरोपरि धारयिष्यति । कारणं यदा दीनोऽपि कृतमुपकारं न कदापि विस्मरति तदा उच्चस्थानां तु का कथा ।

(6) **तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिः**
**जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।**
**अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां**
**रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥**

**अन्वयः-** घन ! वान्तवृष्टिः, तिक्तैः, वनगजमदैः, वासितम्, जम्बूकुञ्जप्रतिहतरयं, तस्याः, तोयम्, आदाय, गच्छेः । अन्तःसारं, त्वां, अनिलः, तुलयितुं, न, शक्ष्यति, हि, रिक्तः, सर्वः, लघु, भवति, पूर्णता, गौरवाय ।

**व्याख्या-** हे घन ! – मेघ ! वान्तवृष्टिः – कृतवृष्टिः, तिक्तैः – सुगन्धिभिः, वनगजमदैः – अरण्यहस्तिदानजलैः, वासितं – सुरभितं, जम्बूकुञ्जप्रतिहतरयम् – जम्बुनिकुञ्जप्रतिबद्धवेगम्, तस्याः – रेवायाः, तोयम् – जलम्, त्वाम् – भवन्तं मेघम्, अनिलः – पवनः, तुलयितुम् – कम्पयितुम्, न शक्ष्यति – समर्थो न भविष्यति, हि – यतः, रिक्तः – शून्यः, सर्वः – सकलः, लघुः – लाघवयुक्तः, भवति – जायते, पूर्णता – समग्रता, गौरवाय – गुरुत्वाय भवति।

**सरलार्थः-** हे मेघ ! त्वं तत्र आम्रकुटपर्वतोपरि घर्षणानन्तरं सुगन्धिभिः अरण्यगजमदजलैः सुवासितं जम्बुकुञ्जप्रतिबद्धवेगं

नर्मदाजलं पीत्वा (गृहीत्वा) अग्रे गमनं कुरु । जलभारत्वात् वायुः त्वाम् आन्दोलयितुं समर्थो न भविष्यति कारणं रिक्तपात्रं सदैव भार-रहितं भवति किन्तु पूरितं पात्रं गौरवान्वितं भवति ।

(7) **वीचिक्षोभस्वनितविहगश्रेणिकाञ्चीगुणायाः**

**संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।**

**निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य,**

**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥**

**अन्वयः-** पथि, वीचिक्षोभस्वनितविहगश्रेणीकाञ्चीगुणायाः, स्खलितसुभगं संसर्पन्त्याः दर्शितावर्तनाभेः निर्विन्ध्यायाः, सन्निपत्य रसाभ्यन्तरः भव हि स्त्रीणां प्रियेषु विभ्रमः आद्यं प्रणयवचनम् ।

**व्याख्या-** हे मेघ ! पथि- मार्गे, वीचिक्षोभस्वनितविहगश्रेणीकाञ्चीगुणायाः - तरङ्गचलनमुखरपक्षिपङ्क्तिरशनआदाय (तस्याः), स्खलितसुभगम् - परिलुण्ठितमनोहरम्, संसर्पन्त्याः - प्रवहन्त्याः, दर्शितावर्तनाभेः -प्रकटिताम्भोभ्रमनाभेः, निर्विन्ध्यायाः - तन्नाम नद्याः, सन्निपत्य - प्राप्य, रसाभ्यन्तरः- गर्भजलः, भव - स्याः, हि - कारणं (निश्चयेन), स्त्रीणाम् - नारीणाम्, प्रणयवचनम् - प्रेमपूरितवाक्यम्, प्रियेषु-स्वजनेषु, आद्यम् - पूर्वम् विभ्रमः- विलासयुक्तो भवति ।

**सरलार्थः-** हे मेघ ! मार्गे जलतरङ्गवलनेन ध्वनिकुर्वाणा पक्षिणः पंक्तिरेव रसनादाम वर्तते । तथा पाषाणादिपरिलुण्ठितेन मनोहरं यथातथा निरन्तरं वहत्या नाभिरिव जलभ्रमं प्रदर्शयन्त्या कस्याश्चिन्नायिकाया इव तस्याः निर्विन्ध्यायाः नद्याः त्वं रसं च आस्वादय कारणं यत् नारीणां प्रियवाक्येषु विलासप्रदर्शनम् एव प्रथमं प्रार्थनावचनं भवति ।

(8) **तां कस्याश्चिद् भवनवलभौ सुप्तपारावतायां**

**नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।**

**दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं**

**मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥**

**अन्वयः-** चिरविलसनात् खिन्नविद्युत्कलत्रः भवान् सुप्तपारावतायाम् कस्याञ्चित् भवनवलभौ, तां रात्रिं नीत्वा सूर्ये दृष्टे पुनः अपि अध्वशेषं वाहयेत्, सुहृदाम् अभ्युपेतार्थकृत्याः न मन्दायन्ते, खलु ।

**व्याख्या-** चिरविलसनात् - दीर्घसमयस्फुरणात्, खिन्नविद्युत्कलत्रः - परिश्रमितः सौदामिनीभार्यः, भवान्-त्वं मेघः, सुप्तपारावतायाम् - निद्राधीनकपोतायाम्, कस्याञ्चित् - कुत्रचित्, भवनवलभौ - प्रसादाच्छादनभागे, ताम् - कथिताम्, रात्रिं-निशां, नीत्वा - यापयित्वा, सूर्ये - भास्करे, दृष्टे - अवलोकिते (सूर्ये उदिते) पुनः - अपि भूयःअपि, अध्वशेषं - अवशिष्टमार्गं, वाहयेत् - प्राप्नुयात् तथाहि, सुहृदाम् - मित्राणाम्, अभ्युपेतार्थकृत्याः - स्वीकृतप्रयोजनकार्याः, न, मन्दायन्ते - न मन्दा भवन्ति, खलु - निश्चयेन ।

**सरलार्थः-** हे मेघ! बहुकालपर्यन्तं स्फुरणं कृत्वा दामिनीरूपः पत्नीयुक्तः परिश्रान्ते सति कपोतसहितेन तत्रैव रजनीयापनं कुरु, उदिते सूर्ये पुनः अवशिष्टमार्गं पूर्णं कुरु । यतो हि सन्मित्राणां प्रयोजनमङ्गीकृत्य कार्याणि विलम्बेन पूर्णानि न क्रियन्ते ।

( 9 ) **तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं,**

**हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।**

**प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि**

**ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥**

**अन्वयः-** सखे ! प्राप्तवानीरशाखं, किञ्चित् करधृतम् इव मुक्तरोधोनितम्बं नीलं तस्याः सलिलवसनं हृत्वा, लम्बमानस्य, ते प्रस्थानं कथम् अपि भावि ज्ञातास्वादः कः विवृतजघनां विहातुं समर्थः ?

**व्याख्या-** हे सखे ! - हे मित्रम् ! प्राप्तवानीरशाखम् - आच्छादितवेतसतरुशाखाम्, किञ्चित् - ईषत्, करधृतमिव - हस्तावलम्बितम्, इव, मुक्तरोधोनितम्बम् - त्याजिततटकटिप्रदेशः, नीलम् - कृष्णवर्णम्, तस्याः - गम्भीरायाः, सलिलवसनम् - जलयुक्तवस्त्रम्, हृत्वा - दूरीकृत्य, लम्बमानस्य - दीर्घमानस्य क्षिपतः, ते - तव, प्रस्थानम् - प्रयाणं, कथमपि - केनापि प्रकारेण (कष्टेन), भावि - भविष्यति, यत ज्ञातास्वादो - अनुभूतरसः, कः - पुरुषः, विवृतजघनां - प्रदर्शितकटिपूर्वभागाम्, विहातुं - त्यक्तुं, समर्थः - शक्तः अर्थात् न कोऽपि इति ।

**सरलार्थः-** हे मित्र मेघ ! वेतसवृक्षशाखां हस्तेन गृहीत्वा त्यक्ततटकटि, कृष्णवर्णगभीरायाः जलरूपं वस्त्रं दूरीकृत्य जलपूरणेन कष्टयुक्तं ते गमनं भविष्यति कारणं रसस्वादं ज्ञात्वा कः पुरुषः उन्नतजघनां नारीं संत्यज्य दूरं गन्तुं शक्तो भवेत् ? अर्थात् न कोऽपि ।

( 10 ) **तं चेद्वायौ सरति सरलस्कन्दसङ्घट्टजन्मा**

**बाधेतोल्काक्षपितचमरी बालभारो दवाग्निः ।**

**अर्हस्येनं शमयितुमलं वारिधारासहस्त्रै -**

**रापन्नार्तिप्रशनमफलाः सम्पदो ह्युत्तमानाम् ॥**

**अन्वयः-** वायौ, सरति,सरलस्कन्धसंघट्टजन्मा उल्काक्षपितचमरीबालभारः दवाग्निः तं बाधेत, चेत् उनं वारिधारासहस्त्रैः अलं शमयितुम् अर्हसि हि उत्तमानां सम्पदः आपन्नार्तिप्रशमनफलाः ।

**व्याख्या-** हे मेघ ! वायौ - पवने, सरति - वहति (सति), सरलस्कन्धसंघट्टजन्मा - देवदारुवृक्षशाखासङ्घर्षणोत्पन्नः (अग्निः), उल्काक्षपितचमरीबालभारः - स्फुल्लिङ्गनिर्दग्धचमरीकेशसमूहः, दवाग्निः - वनजन्यः अग्निः, तम् - हिमालयम्, बाधेत चेत् - पीडयेत् तर्हि, एनम् - वनाग्निम्, वारिधारासहस्त्रैः - जलधारासहस्त्रैः, अलम् - सम्यक्, शमयितुम् - निर्वापयितुम्, अर्हसि - योग्योऽसि, हि-यतः, उत्तमानाम् - श्रेष्ठिनां (महताम्), सम्पदः-सम्पत्तयः, आपन्नार्तिप्रशमनफलाः - आपत्तिसमये कष्टनिवारण-कारणभूताः भवन्ति ।

**सरलार्थः-** हे मेघ ! अधिकपवनसञ्चरणेन देवदारुवृक्षाणां परस्परं घर्षणेन स्फुल्लिङ्गं भवेत् तेन हिमालये दवाग्निः उत्पन्नो भवेत् तन्निवारणार्थं (उपशमनार्थं) त्वया मूशलधारेण वर्षणं कर्तव्यं भविष्यति । महत्पुरुषाणां संपत्तिः आपत्तियुक्तजनानां कष्टनिवारणार्थम् एव भवति ।

# दूत विषयकं विशिष्टं ज्ञानम्

| | ग्रन्थनाम | - | कविः |
|---|---|---|---|
| (१) | इन्दुदूतम् | - | विनयविजयाग्निः |
| (२) | उद्धवदूतम् | - | माधवशर्मा |
| (३) | उद्धवसंदेशः | - | रूपगोस्वामी |
| (४) | कीरदूतम् | - | रामगोपाल |
| (५) | कोकिलसंदेशः | - | उदण्डः |
| (६) | कोकिलसंदेशः | - | नृसिंहः |
| (७) | कोकिलसंदेशः | - | वेंकटाचार्यः |
| (८) | चन्द्रदूतम् | - | कृष्णचन्द्रः |
| (९) | चन्द्रदूतम् | - | जम्बू |
| (१०) | चन्द्रदूतम् | - | विनयप्रभुः |
| (११) | चातकसंदेशः | - | अज्ञातः |
| (१२) | जैनमेघदूतम् | - | मेरुतुङ्गः |
| (१३) | तुलसीदूतम् | - | वैद्यनाथः |
| (१४) | नेमिदूतम् | - | विक्रमः |
| (१५) | पदाङ्कदूतम् | - | कृष्णसार्वभौमः |
| (१६) | पवनदूतम् | - | धोयी |
| (१७) | पवनदूतम् | - | सूरिवेदीचन्द्र |
| (१८) | पन्थदूतम् | - | भालानाथः |
| (१९) | पिकदूतम् | - | अज्ञातः |
| (२०) | पिकसंदेशः | - | दाधीचिः ब्रह्मदेवशर्मा |
| (२१) | भक्तिदूतम् | - | कालीप्रसादः |
| (२२) | भृङ्गसंदेशः | - | वासुदेवः |
| (२३) | भ्रमरदूतम् | - | रुद्रः |
| (२४) | मनोदूतम् | - | विष्णुदासः |
| (२५) | मनोदूतम् | - | तैलंगब्रजनाथः |
| (२६) | मनोदूतम् | - | शमारावः |
| (२७) | मयूरसंदेशः | - | रंगाचार्य |
| (२८) | मेघदूतम् | - | विक्रमः |
| (२९) | रथाङ्गदूतम् | - | अज्ञातः |
| (३०) | विप्रसंदेशः | - | लक्ष्मणसूरिः |
| (३१) | शीलदूतम् | - | सुन्दराग्नि चरित्र |
| (३२) | शुक्रदूतम् | - | यादवचन्द्रः |
| (३३) | शुक्रसन्देशः | - | लक्ष्मीदासः |
| (३४) | शुक्रसन्देशः | - | कारंग पल्ली |
| (३५) | शुक्रसन्देशः | - | रंगाचार्यः |
| (३६) | सिद्धदूतम् | - | अवधूतरामः |
| (३७) | सुगमसंदेशः | - | नारायणः |
| (३८) | हंसदूतम् | - | रूपगोस्वामी |
| (३९) | हंससन्देशः | - | वेंकटेशः |
| (४०) | हंससन्देशः | - | भट्टवामनः |
| (४१) | हंसदूतम् | - | रघुनाथदासः |
| (४२) | हंसदूतम् | - | कवीन्द्राचार्यसरस्वती |
| (४३) | हृदयदूतम् | - | भट्टहरिहरः |
| (४४) | वातदूतम् | - | कृष्णनाथः |
| (४५) | मित्रदूतम् | - | दिनेशप्रसादपाण्डेयः |
| (४६) | प्लवङ्गदूतम् | - | वामेश्वरपाठकः |
| (४७) | मयूखदूतम् | - | रामाशीषः |

## स्वाध्यायः

१. **प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) कुबेरस्य सेवकः कः ?

(क) यक्षः (ख) दक्षः (ग) देवः (घ) रावणः

(२) यक्षः कस्य समीपे याचनां करोति ?

(क) कुबेरस्य (ख) कालिदासस्य (ग) मेघस्य (घ) पत्न्याः

(३) यक्षस्य नगरी का ?

(क) उज्जयिनी (ख) अलका (ग) रेवा (घ) वैदर्भी

(४) यक्षः मेघं कुत्र वर्षार्थं प्रार्थयति ?

(क) अरावलम् (ख) आबूपर्वते (ग) रेवानद्याम् (घ) आम्रकूटे

(५) यक्षः कस्य दर्शनं करोति ?

(क) मेघस्य (ख) कालिदासस्य (ग) सूर्यस्य (घ) प्रियायाः

(६) कस्य वृक्षशाखायाः परस्परं घर्षणं भवति ?

(क) आम्रकुटस्य (ख) देवदारोः (ग) पिप्पलस्य (घ) अश्वत्थस्य

(७) 'विद्युत्' इत्यस्य को अर्थः ?

(क) सुहृद् (ख) दामिनी (ग) मेघः (घ) वर्षा

२. **अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) यक्षराजः कः वर्तते ?

(२) महतां सम्पत्तिः कथम् अस्ति ?

(३) पूर्णपात्रं कीदृशं भवति ?

(४) आम्रकूटपर्वते कीदृशं वर्षार्थं कथयति यक्षः ?

(५) दावाग्निः कुत्र उत्पन्नः ?

३. **अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) रेवानद्याः मार्गवर्णनं कुरुत ।

(२) यक्षः मेघं कीदृशं जलपानार्थं प्रार्थयति ?

(३) याचना कुत्र एवं केषां समीपे करणीया ?

(४) स्त्रीणां जीवनं कीदृशं भवति ?

४. **टिप्पणी लेख्या ।**

(१) रेवानदी ।

(२) मेघवर्णनम् ।

५. **सूक्तीनां स्पष्टीकरणं सप्रसङ्गं कुरुत ।**

(१) ''आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ।''

(२) ''स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ।''

**छात्रप्रवृत्तिः**

- छात्राः यथाग्रन्थं मेघस्य मार्गवर्णनं सचित्रं पश्येयुः ॥

**शिक्षकप्रवृत्तिः**

- अन्यखण्डकाव्यानां विषये ज्ञापयेत् ।

●

# १६ गद्यकाव्यम्

**प्रस्तावना**

संस्कृतसाहित्ये यथा पद्यकाव्यस्य महत्त्वं तथैव गद्यकाव्यस्यापि वर्तते । गद्यकाव्यस्य प्रचार-प्रसार: नाधुना अपितु वैदिककालादारभ्य वर्तते । संहितादिग्रन्थेषु गद्यस्य भूयसी मात्रा प्राप्यते । तदर्थम् अथर्ववेद: सुप्रसिद्ध इति ।

यद्यपि लेखकानां पद्यं प्रति अत्यादर: तत्र गद्यस्य स्वल्पतम: तथापि तथाविधं महत्त्वमेव भजते । पद्यमयस्य ग्रन्थस्य पाठका: सुखेन अभ्यस्यन्ति, मुखोद्‌गतमपि सहजं कुर्वन्ति । गानमात्रेण सुखम् अनुभवन्ति तथाऽपि गद्ये लालित्यता तथाविधा आयाति न पद्ये । पठनमात्रेण सहजबोध: अवगम्यते ।

---

गद्यस्य शैली एवं भाषणस्य शैली समानरूपतां भजते । उभयपक्षत: सरलकठिना: शब्दा: प्रयुज्यन्ते । वैदिककाले ऋग्वेदादिषु मन्त्राणां क्रम: तथाविध एव, यथा अघमर्षणमन्त्र:-

**ऋतं च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ।**

**ततो रात्र्यजायत तत: समुद्रोऽअर्णव: ॥**

**समुद्रादर्णवादधि संवत्सरोऽअजायत ।**

**अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥**

**सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् ।**

**दिवं च पृथिवीञ्चान्तरिक्षमथो स्व: ॥ (ऋग् - दशमण्डल, कृ. यजु. च)**

एवमेव ब्राह्मणग्रन्थेषु अपि गद्यं बाहुल्येन वर्तते । तत्र संहितापेक्षया सरलं वर्तते । तद्यथा

ऋच: स ऋचां लोकोऽथ यतेतदर्चिदीव्यते तन्महाव्रतं तानि सामानि स साम्नां लोकोऽथ य एष: एतस्मिन् मण्डले पुरुष: सोऽग्निस्तानि यजूंषि संयजुषां लोक: । (मंडलब्राह्मणे)

तातोऽपि सरलम् उपनिषदि गद्यस्य प्रयोग: सञ्जा: वर्तते । तत्र च कथा-उपकथा माध्यमेन यथा सहज-बोध: भवेत् तथा शब्दा: प्रयुक्ता: ।

एवमेव वैदिकगद्योद्धरणानां पर्यालोचनेन सुखम् अवगन्तुं शक्यते । संहिताया: व्याकरणयुक्त-भाषया ब्राह्मणानां भाषा लक्षणाशालिनी स्पष्टा च अस्ति । उपनिषदां तु व्याकरणसम्मता स्फुटतमा च वर्तते । एवं वैदिकगद्यै: प्रशस्तीकृते मार्गे लौकिकगद्यस्य आविर्भावो जात: । लौकिकगद्यस्य प्रथम-प्रयोगो निरुक्ते कृत: ।

एतत् कालपर्यन्तं गद्यं केवलं काव्यभाषारूपेण प्रयुक्तं नासीत्, किन्तु मात्रव्यवहारभाषया प्रयोग: अभवत् । अत: भाषायां चमत्कारं जनयितुं न प्रयत्नं करोति स्म । अयमेव क्रम: शास्त्रीयगद्येषु उपलभ्यते । तत्राऽपि न केनापि कविना प्रयत्न: कृत: । यथा महाभाष्ये -

ये पुन: कार्याभावनिर्वृतौ तावत्तेषां यत्न: क्रियते । तद्यथा घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वा आह-कुरु शब्दान् प्रयोक्ष्ये ।

उपर्युक्तगद्येन तात्कालिकी गद्यस्य (महाभाष्य-पस्पशाह्निके) विकसितपूर्णरूपता अवकोक्यते । इत: परं गद्यस्य प्रौढतार्किकता दृश्यते ।

एतावत् पर्यन्तं गद्यस्य य: विकासक्रम: अवलोकित: स: लौकिकगद्यविषय: मन्तुं शक्यते । साहित्यगद्यं तु सर्वप्रथमं शिलालेखेषु प्राप्यते । रुद्रदाम्न: शिलालेखे या गद्यस्य शैली दृश्यते सा नितान्तप्रौढा ओजोगुणसमन्विता दृश्यते ।

गद्य-साहित्ये शिलालेखेषु एव प्रथमतया कृतम् इति बोधः भवति । सुबन्धु-बाणभट्टादीनां गद्यं विलोक्य रुद्रदाम्नः शिलालेखः अविच्छिन्नः गद्यशैलीभूतो दृश्यते । विविधेषु उट्टङ्कितेषु स्तम्भादिषु साम्प्रतम् अपि गद्यात्मकशिलालेखः दृग्गोचरो भवति ।

इत्थं वैदिकसाहित्यतः प्रारभ्य शिलालेखकालपर्यन्तं उत्तरोत्तरं विकासरूपतां भजते ।

**संस्कृतगद्यस्य वैशिष्ट्यम्**

यत्र संस्कृतसाहित्यगद्यं विविधचमत्कारशैल्या लघुकायरूपेण स्वमाधुर्यं जनयति, तत्र तदेव गद्यं भाषान्तररूपेण विस्तृतव्यापारं प्रति दृग्गोचरं भवति । गद्यस्य लघुत्वं विविधसमासार्थत्वेन पूर्णत्वं यथा भवति तथा भाषान्तरेण न । अतः उक्तं गद्यं तु ''ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्'' दण्डिप्रतिपादितकारिकेयं संस्कृतभाषानिबद्धने सजीवनतां प्रेरयति । समासत्वं संस्कृतभाषायां प्रारम्भकालत एव दृश्यते । अतः स्पष्टम् एव गद्यं तु आरम्भत एव सजीवमेव।

यावत् कालं गद्यस्य चमत्कारः गीतश्रवणसंगीतमाधुर्येण प्रस्तूयते तावत् गद्यं तु स्वप्रौढिद्वारा प्रकटयति । इदमेव गद्यस्य वैरल्यम् । अन्यच्च पद्यानि स्वसंगीतमाधुर्येण किञ्चित् चमत्कारभावनया चमत्कारम् उत्पादयन्ति तत्र गद्यानि तु पदलालित्येन, सर्वेषाम् अंशानां चमत्कारे गद्यसाफल्यं चिन्तयन्तः गद्यनिबद्धेन कष्टम् अवलोक्य, रचनायां कष्टं वहन्तः पद्यरचनायां कवयः प्रवृत्ताः भवन्ति । तेनैव कारणेन कवयः ऊचुः ''गद्यं कवीनां निकषं वदन्ति'' ।

साम्प्रतं कतिचन मुख्यगद्यकाव्यानि स्वरूपतः रचयितृपरिचयप्रदानद्वारा प्रसिद्धानि सन्ति । तत्र संस्कृतसाहित्यिकगद्यं, शिलालेखः एव प्रथमं कारणम् । हरिषेणस्य शिलालेखे प्रयागप्रशस्तौ च गद्यस्य यत् रूपं प्राप्यते तदेव परवर्तिभिः कविभिः अनुकृतम् । सत्यं तदेव संस्कृतगौरवं वर्धयितुम् अनुभवामः ।

**लौकिकगद्यसाहित्यम्**

कात्यायनस्य अष्टाध्यायीसूत्रपाठस्य वार्तिके आख्यानाख्यायिकेतिहासपुराणेभ्यश्च इत्यत्र आख्यानम् एवम् आख्यायिका पृथक्रूपेण प्रतिपादिता वर्तते । महामुनिपतञ्जलिना आख्यानस्य विषये उदाहरणानि यवक्रीत, प्रियंगव एवं ययातिआख्यायिका विषये उदाहरणानि, वासवदत्ता, सुमनोत्तर एवं भैमरथ्याः निर्देशः कृतः । यथा **अधिकृत्य कृते ग्रन्थे बहुलं लुग्वक्तव्यः।**

वासवदत्ता सुमनोत्तरा न च भवति ॥ भैमरथी ।। (महाभाष्य 4-3-87) कारिकायाम् अपि उल्लेखः प्राप्यते। एवं च बृहत्कथा, पञ्चतन्त्रः तथा तन्त्राख्यायिका मध्ये कक्षा आख्यायिकयोः उल्लेखः प्राप्यते । अनेन स्पष्टं भवति यत् पद्यकाव्यात् पूर्वमेव गद्यकाव्यस्य लोकोक्त्याः पूर्वं भवेत् इति । शिलालेखेषु अपि ''पर्वतप्रतिस्पर्धि, मरुधन्वकल्पम् तथा पर्जन्य एव एकार्णवभूतावामिव पृथिव्यां कृतायां'' एवं प्रकारेण अर्थालङ्कारयुक्तवाक्यानां प्रयोगः गद्यकाव्यस्य उदाहरणरूपेण प्राप्यते । संस्कृतसाहित्ये आलंकारिकैः प्रधानरूपेण भेदद्वयं कृतं वर्तते ।

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् । (साहित्यदर्पणः) दृश्यरूपं श्रव्यरूपं भेदद्वयं साहित्यदर्पणे विश्वनाथेन प्रतिपादितं वर्तते । तत्र च

**श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा ।**

श्रवणमात्रं तत् पद्यगद्यमयं इति प्रकारद्वयं प्रतिपादितम् । पुनः गद्यकाव्यस्य द्वौ भेदौ स्तः । कथा आख्यायिका च । अमरकोषेऽपि 'आख्यायिकोपलब्धार्था प्रबन्धकल्पना कथा' । यस्य कथावस्तु एवं घटना सत्यरूपं भवति तत् आख्यायिका इति उच्यते एवं यस्य कथावस्तु कविकल्पितं भवति तत् कथा इति कथ्यते ।

अग्निपुराणेऽपि कन्याहरणं, संङ्ग्रामः, विप्रलम्भादिविपदां वर्णनं आयाति । दण्डिना काव्यादर्शे स्वपूर्ववर्ति-भामहादि-आचार्याणाम् आख्यायिका कथायाः भेदप्रदर्शने खण्डनं कृत्वा मौलिकभेदानां स्वीकारः न कृतः । उक्तं च -

जातिरेका संज्ञाद्वयाङ्किता । द्वयमपि घटकलशवत् पर्यायवाचिनौ इति मन्यते । अग्निपुराणे पञ्चभेदाः प्रतिपादिता यथा-

**आख्यायिका कथा खण्डकथा परिकथा तथा ।**

**कथालिकेति मन्यन्ते गद्यकाव्यं च पञ्चधा ॥**

(1) आख्यायिका (2) कथा (3) खण्डकथा (4) परिकथा (5) कथालिका इति । विविधाचार्याणां परिचर्यात्मक - अध्ययने, तेषां ग्रन्थमाध्यमेन विशिष्टबोधात् एव गद्यकाव्यस्य ज्ञानं जायते । यथा -

**सुबन्धुः**

गद्यकाव्ये गद्यं गौरवान्वितं कुर्वन् सुबन्धुरेव कविषु प्रथमः प्रतिपन्नमतिः अस्ति । सुबन्धुं विक्रमादित्यकालीनं मन्यन्ते किन्तु कतमो विक्रमादित्यः ? अस्मिन् प्रसंगे आलोचकाः मिहिरकुलनामकस्य हुणराजस्य पराजेता बालादित्यसखः यशोधर्मा एव अयं विक्रमादित्यः निर्णयन्ति ।

यशोधर्मणः समयः षष्ठशतकस्य मध्यभागः निर्णीयते । एतेन सुबन्धोः समयः षष्ठशतकस्य पूर्वभाग इति कथयितुं शक्यते ।

बाणभट्टः सुबन्धोः कथाम् इत्येवं स्मरति । सुबन्धुः स्वप्नवासवदत्तायां श्लेषद्वारा उद्योतकरं स्मरति । एभिः निदर्शनैः सुबन्धोः समयः षष्ठशतकं मन्यते ।

**वासवदत्ता**

वासवदत्तानामक एक एव ग्रन्थः सुबन्धुकृतित्वेन वर्तते । इयम् आख्यायिका कविकल्पिता वर्तते । उदयनवासवदत्तयोः प्रेमकथामाध्यमेन कविना ग्रन्थे प्रयासः कृतः वर्तते । हर्षचरिते बाणभट्टेन वासवदत्तायाः प्रशंसा कृता वर्तते । यथा-

**कवीनामगलद्दर्पो नूनं वासवदत्तया ।**

**शक्त्येव पाण्डुपुत्राणां नूनं वासवदत्तया ॥**

शब्दार्थालङ्काररससौष्ठवैः वासवदत्तायाः तुलनायां कोऽपि अन्यो गद्यग्रन्थो नास्ति इति अध्ययनेन ज्ञायते ।

उदाहरणेन कवेः गद्यसौष्ठवं यथा -

अभूदभूतपूर्वः सर्वोर्वीपतिचक्रचूडामणिश्रेणीशाणकोणकषणनिर्मलीकृतचरणनखमणिनृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः कृष्ण इव कृतवसुदेवतर्पणः, नारायण इव सौकर्यसमासादितधरणिमण्डलः, कंसारातिरिव जनितयशोदानन्दसमृद्धिः ।

इदं सत्यं यत् सुबन्धोः वाक्यविन्यासः क्लिष्टतां भजते इति । अस्य कृत्रिमता दृग्गोचरी भवति । वाचकेषु क्लिष्टतां जनयति अतः गद्यं कवीनां निकषं वदन्ति तथापि अस्य कल्पना समीचीना, शब्दचयन-शक्ति प्रौढा, अलंकारसज्जा सम्यक् तेनैव कविः सकलसहृदयतुल्य इति निर्बाधं वक्तुं शक्यते ।

इदमपि सत्यं यत् बाणस्य रमणीयार्थप्रतिपादनसमये रमणीयशब्दसृष्टिः प्रसादः, काव्यस्य अपेक्षिता गुणाश्च सुबन्धौ न सन्ति । दण्डिनः पदलालित्यादिकं न विद्यते तथापि अयं विद्वज्जनहृदयहारिश्लेषादिविविधालंकाररसज्ञः पण्डितानां, पाठकानां हृदयानि आक्रष्टुम् अलमिति ।

**महाकविः बाणभट्टः**

महाकविः बाणभट्टः संस्कृतवाङ्मये गद्यकाव्यस्य मान्यः आचार्यः अस्ति । संस्कृतसाहित्ये यथा कालिदासादिवत् अस्यापि जीवनवृत्तं अज्ञानान्धकारतुल्यं वर्तते । बाणस्य जीवनं मध्यमणिद्वारदीपन्यायवत् पूर्ववर्ति–परावर्तिकवीनां समयनिरूपणं प्रकाशितं करोति । आत्मकथाचर्चायां नायं मौनः किन्तु मुखर एव, स्वयमेव हर्षचरिते, कादम्बर्यां च उच्छ्वासे तथा मङ्गलाचरणे स्वपरिचयः प्रदत्तः वर्तते । तत्र तेषां कौशलं प्रतिभाति ।

हर्षचरिते स्ववंशावली अपि प्रतिपादिता । तत्र सरस्वत्याः पुत्रः सारस्वतः तस्मिन् वंशे बाणः इति बोधः भवति।

वत्सदेशोत्पन्नस्य बाणस्य वंशपरम्परायां पूर्वम् अनेके श्रोत्रिय–ब्राह्मणाः संभूताः तस्मिन्नेव कुले कालक्रमे कलियुगे वात्सायनकुले श्रुतिशास्त्रसम्पन्नः धुरन्धरः विद्वान् कुबेरनामकः उत्पन्नः । कादम्बर्यां बाणेन लिखितं तस्य गृहे पठत्सु छात्रेषु कश्चन क्षतिं करोति चेत् पिञ्जरे विद्यमानः शुकोऽपि तं वारयति स्म । एवमेव बाणस्य वंशः व्युत्पन्नमतिमान् आसीत् ।

बाणस्य पितुर्नाम चित्रभानुः एवं मातुः नाम राजदेवी इति प्राप्यते ।

वंशावली यथा –




बाल्यकाले एव मातुः छत्रम् अपगतम् । पित्रा एव पालितः पोषितश्च । कृतोपवीते मित्रवर्गेण सह इतस्ततः भ्रमणं विहाय गृहचिन्तायां दत्तचित्तो जातः । तत्र तेन अनेकप्रसिद्धस्थानानाम् अवलोकनं कृतम् । राजकीयं वातावरणं दृष्टम् । अनेकेषु गुरुकुलेषु गत्वा पण्डितैः सह सङ्गतिः कृता, ज्ञानप्राप्तिः च कृता, सङ्गोष्ठी कृता, संसारस्य यथार्थस्वरूपस्य दर्शनं कृतम्, एवं देशविदेशे भ्रमणं कृत्वा सम्यक् संसारमनुभूय स्वगृहं प्रतिनिवृत्तः ।

ततः सम्राट्कन्नौजसभातः निमन्त्रणं प्राप्य तत्र गत्वा शोभावृद्धिम् कृतवान् ।

जीवनचरित्रविषये अयं हर्षवर्धनस्य सभापण्डितत्वात् ई. 600 तः 648 ई. पर्यन्तं प्रायः मन्यते । प्रमाणमेतद्

अन्तरङ्ग-बहिरङ्गे प्रमाणम्, बाणस्य उत्तरवर्तिकवीनां तत्र भोज: 1025 ई., धनञ्जय: १००० ई. आनन्दवर्धनाचार्य: ८५० ई. इति भिन्नभिन्नमतानि प्राप्तानि भवन्ति ।

बाणभट्टस्य कृतिद्वय हर्षचरितम् कादम्बरी चेति । केचन उत्तरकादम्बर्या: रचयितारं बाणस्य पुत्रं भूषणभट्टं मन्यन्ते ।

**दण्डी**

संस्कृतसाहित्ये प्राचीनसहृदयवचनै: दण्डिन: महती प्रतिष्ठा वर्तते । उक्तं च -

**जाते जगति वाल्मीकि: कविरित्यभिधाऽभवत् ।**

**कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥**

दण्डिन: गद्यसाहित्ये स्वकीयं स्थानं सुरक्षितं वर्तते, अत: 'दण्डिन: पदलालित्यम्' उक्तिरियं तस्य प्रसिद्धप्रमाणम्।

दण्डिन: समयनिरूपणे भिन्नभिन्नमतानि प्राप्तानि भवन्ति ।

(1) दण्डिविषये दशमशताब्द्यां उत्पन्न अभिनवगुप्त: स्वग्रन्थे लोचने लिखति 'यथाह दण्डी-गद्यपद्यमयी चम्पू:' (तृतीयोद्योते सप्तमीकारिका)

(2) प्रतीहारेन्दुराज: उद्भटरचितस्य काव्यालङ्कारसारसंग्रहस्य लघुवृत्तौ दशमशताब्द्याम् एव दण्डिविषये ''अत एव दण्डिना 'लिम्पतीव' इत्यादि'' लिखति ।

(3) कन्नडभाषायां कविराजमार्गनामक एकग्रन्थ: स: काव्यादर्शमाधारीकृत्य प्रणीत: तस्य रचनाकाल: 815 त: 875 ख्रीष्टाब्दमध्यवर्ती मन्यते ।

(4) सिंहलभाषायां 'सियासलकारा' इति नामक: स्वभाषया रचितग्रन्थ: तस्य रचनाकाल: 846 त: 866 ख्रीष्टाब्दे वर्तते। तस्मिन् काव्यादर्शस्य प्रभाव एव न अपितु नामोल्लेखनम् अपि दृश्यते ।

(5) वामनस्यापि दण्डी पूर्ववर्ती वर्तते, तत्र काव्यालङ्कारसूत्रे दण्डिप्रकाशित: मार्ग एव वामनेन रीतिरुक्ता, अत: वामनस्य समय: 779 त: 813 ख्रीष्टाब्दे मन्यते ।

एभि: प्रमाणै: दण्डिन: समय: अष्टमशतकं मन्तव्यं भवति । वासवदत्ताग्रन्थे 'छन्दोविचितिरिव कुसुमविचित्रा' 'छन्दोविचितिरिव मालिनीसनाथो' एतानि सदृशानि वाक्यानि दण्डिन: ग्रन्थेऽपि प्राप्यन्ते तेन सुबन्धुपूर्ववर्ती दण्डी । अत: दण्डिन: समय: षष्ठं शतकमिति मन्तव्यं भवति ।

उपर्युक्तां संभावनामवलोक्य पाश्चात्या: विद्वांस: मेक्समूलर, कुबेर,-मैक्डोनल,-याकोबी-प्रभृतय: षष्ठशतकम् एव दण्डिन: समयं मन्यन्ते । माघबाणयो: तुलनया दण्डी परवर्ती इति कुत्रचित् प्राप्यते ।

अवन्तिसुन्दरीकथायां दण्डी भारविवंशज: इत्युक्तम् । भारवे: पितामह: गुर्जरप्रान्ते वसति स्म । तत: ते दक्षिणदेशस्थितमचलपुरमागता: यद् 'एल्लीचपुर' नाम्ना साम्प्रतं प्रसिद्धम् । नारायणस्वामिन: पुत्र: दामोदरभारवि: तेषु अन्यतमस्य पुत्र: वीरदत्त: तत: दण्डी इति स्वीकुर्वन्ति ।

दण्डिन: मातु: नाम गौरी । भारवे: समय: 634 ख्रिष्टाब्द: मन्यते । तदनुगतं दण्डी सप्तमशतके जात: इति स्वीकर्तुं शक्यते ।

कुत्रचित् दण्डी काश्मीरदेशवासी इति विद्वांसः प्रवदन्ति तन्न युक्तं सा आलोचनाऽपि निरर्थका अस्ति ।

कौशिकगोत्रोत्पन्न दण्डी स्वप्रपितामहस्य भारवेराश्रयदाता काञ्चीनगरे नृपाश्रये वसति स्म ।

दण्डिनः वास्तविकं नाम किम् इति स्पष्टं नास्ति, किन्तु यथा भवभूतेः, माघस्य मूलनामविषये द्विधा वर्तते तथैव अस्याऽपि दशकुमारचरिते मंगलाचरणे 'ब्रह्माण्डच्छत्रदण्ड' इत्यत्र 'दण्ड' शब्दः बहुविधप्रयोगेण 'दण्डी' इति नाम्ना विख्यातो जातः स्यात् ।

दण्डिनः काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा इति ग्रन्थत्रयं प्राप्यते । छन्दोविचितिग्रन्थविषये विवादः वर्तते ।

बाणभट्टानन्तरं केचन लेखकाः गद्यकाव्यलेखने प्रयत्नम् अकुर्वन् किन्तु तेषु न सर्वेऽपि सफलतां प्राप्तवन्तः । तत्र कारणमिदमेव गद्यसाहित्यं न तथा सहजेन प्रणयनकरम् । दण्डी सफलतां प्राप्तवान् तत्र तस्य चातुर्यं तथा परिवर्तनशैली कारणभूता अस्ति ।

बाणसमकालीनाः कवयः सफलाः तत्र बाणस्यैवानुकरणं कारणभूतम् ।

**धनपालः**

कविधनपालः धाराधिपतिराज्ञः आश्रये स्थित्वा एकां प्रणयकथां लिखितवान् । तिलकमञ्जरी नामके ग्रन्थे समरकेतुतिलकमञ्जर्योः प्रणयकथा वर्णिता वर्तते । धनपालस्य जन्म दशमशतकं मन्यते मतमिदं स्वीकृतमस्ति बहुविद्वद्भिः। अनेन धनपालेन 972तमे ख्रीष्टाब्दे 'पैथलच्छि' नामा प्राकृतकोषः 'ऋषभपञ्चाशिका' नाम जैनतीर्थङ्करस्य ऋषभस्य प्राकृतस्तोत्र-ग्रन्थश्च रचितः ।

एवमेव बहवः कवयः गद्यकाव्यानि रचितवन्तः सन्ति । यथा -

| | **नाम** | **ग्रंथः** | **समयः** |
|---|---|---|---|
| (1) | वादीभसिंह ओड्यदेवः | जीवनधरचरितम् | धर्मपालपरवर्ती । |
| (2) | अगस्त्यः | कृष्णचरितम् | चतुर्दशशतकम् । |
| (3) | अम्बिकादत्तव्यासः | शिवराजविजयः | एकोनविंशशतकम् । |
| (4) | बदरीनाथ झा | गुणेश्वरचरितम् | विंशशतकम् । |
| (5) | नारायण ख्रिस्ते | विद्वच्चरितपञ्चकम् | विंशशतकम् । |

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) गद्यकाव्यस्य प्राचुर्यं कस्मिन् वेदे अस्ति ?

(क) ऋग्वेदे (ख) यजुर्वेदे (ग) सामवेदे (घ) अथर्ववेदे

(२) गद्यस्य सहजबोधः केन अवगम्यते ?

(क) वेदेन (ख) कथोपकथया (ग) पुराणेन (घ) काव्येन

(३) लौकिकगद्यस्य प्रथमप्रयोगः कुत्र कृतः ?

(क) साहित्ये (ख) व्याकरणे (ग) निरुक्ते (घ) ज्यौतिषे

(४) गद्यसाहित्यं सर्वप्रथमं कुत्र प्राप्यते ?

(क) शिलालेखे (ख) ताम्रपत्रे (ग) भोजपत्रे (घ) लिपिलेखे

(५) लौकिकगद्यसाहित्यस्य आदिग्रन्थः कस्य ?

(क) विश्वनाथस्य (ख) पतञ्जलेः (ग) दण्डिनः (घ) सुबन्धोः

(६) गद्यकाव्यस्य कति भेदाः ?

(क) एकम् (ख) द्वे (ग) त्रीणि (घ) पञ्च

(७) बाणः कस्मिन् देशे उत्पन्नः अस्ति ?

(क) मिथिला (ख) वत्सः (ग) हूणः (घ) कन्नौजः

(८) दण्डिनः किं प्रसिद्धम् ?

(क) अर्थगौरवम् (ख) उपमा (ग) पदलालित्यम् (घ) सर्वम्

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) गद्यकाव्यं कतिविधं किञ्च तत् ?

(२) गद्यभाषायाः शैली कीदृशी ?

(३) बदरीनाथझामहोदयस्य समय कः ?

(४) धनपालस्य प्राकृतस्तोत्रस्य नाम किम् ?

(५) भारवेः समयः कः मन्यते ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) वैदिकदृष्ट्या गद्यस्य महत्त्वं स्वभाषया स्पष्टयत ।

(२) संस्कृतसाहित्ये गद्यस्य वैशिष्ट्यं लिखत ।

(३) आख्यायिकाकथयोः स्वरूपं प्रतिपादयत ।

**४. टिप्पणी लेख्या ।**

(१) दण्डी

(२) धनपालः

(३) बाणभट्टः

**५.	'अ' विभागं 'ब' विभागेन सह संयोजयत ।**

| अ | ब |
|---|---|
| (१) धनपालः | (१) दशकुमारचरितम् |
| (२) बाणभट्टः | (२) शिवराजविजयम् |
| (३) दण्डी | (३) वासवदत्ता |
| (४) सुबन्धुः | (४) कादम्बरी |
| (५) अम्बिकादत्तव्यासः | (५) तिलकमञ्जरी |

**छात्रप्रवृत्तिः**

- छात्राः दृश्यश्राव्यमाध्यमेन काव्यस्वरूपं तत्भेदान् जानीयुः ।

**शिक्षकप्रवृत्तिः**

- आधुनिकसाधनानि उपयुज्य गद्यपद्यानां स्पष्टीकरणं कुर्यात् ।

# १७ शिवराजविजयः

**प्रस्तावना**

अयं शिवराजविजयः एकः ऐतिहासिकः उपन्यासः अस्ति । अस्य कथावस्तु विभागत्रये विभक्तमस्ति । प्रतिविरामं चत्वारो निश्वासाः सन्ति । प्रधाननायकः स्वयं शिवराजः विद्यते । अस्य ग्रन्थस्य प्रधानरसः वीररसः, अन्ये रसा अङ्गत्वेन यथावसरं व्यक्ताः सन्ति ।

शिवराजविजये परम्परागतशैलीम् आश्रित्य रसयोजना प्रकृतिवर्णनं, मानवीयसौन्दर्यवर्णनम्, अलङ्काराणाम् उपयोगः अन्यानि च काव्यतत्त्वानि अन्तः समाविष्टानि सन्ति । प्राचीनऽर्वाचीनशैलीमध्ये उभयोः समावेशं कृत्वा चरित्रचित्रणं, कथोपकथनं, कथानकम् इत्यादीनि प्रयुक्तानि, अतः साक्षात् प्राचीनार्वाचीनशैल्योः सङ्गमस्थलम् । कविः चरित्रचित्रणे सर्वथा सफलः ।

कवेः प्रतिवर्णवाक्यप्रयोगे बाणभट्टस्य प्रभावः स्पष्टरूपेण दृश्यते । कवेः भाषा प्राञ्जला,प्रसादगुणोपेता, प्रवाहमयी च दृश्यते । क्वचित् वाक्येषु दीर्घता एवं क्वचिच्च लघुता अपि दृश्यते ।

महाराजशिवराजे नायकस्य सर्वे गुणाः सन्ति । स धीरोदात्तो नायकः । स वीरो, नम्रो, दयावान् मर्यादायाः स्वतन्त्रतायाः च रक्षकः । तमेव आधारीकृत्य अस्य उपन्यासस्य कथावस्तु विस्तृतम् । कुत्रचित् कल्पनायाः विस्तारः मिश्रणं च उपलब्धं भवति ।

कथानके शब्दाः परस्परं संवादाः सहजाः, स्वाभाविकाः, सरलाः प्रकरणानुकूलाः सन्ति तथा पात्राणां विविधमनोवृत्तीनां परिचायकाश्च सन्ति ।

प्रकृतिचित्रणे तु अम्बिकादत्तः द्वितीयो बाण एव । तेन स्वशब्दकलाकलापैः प्रकृतेः विविधरूपाणां चित्राणि व्यक्तीकृतानि । प्रकृतेः सौन्दर्यम् आलम्बनत्वेन, उद्दीपनत्वेन च वर्णितम् । ग्रन्थे अलङ्कारप्रयोगस्तु चमत्कारजनकः अस्ति। शब्दार्थालङ्काराणां प्रयोग उचितस्थाने अवसरे कृतः वर्तते ।

---

**कविपरिचयः**

पण्डिताम्बिकादत्तव्यासस्य जन्म तस्य मातुलगृहे जयपुरनगरस्य सितबट्टो विभागे अभवत् । चैत्रशुक्ले अष्टमीदिने संवत् 1915 मध्ये तस्य जन्म अभवत् । चैत्रनवरात्रत्वात् पित्रा दुर्गादत्तेन पुत्रस्य नाम अम्बिकादत्त इति स्थापितम्, किन्तु पितृव्यः देवीदत्तः तस्य जन्म सूर्यास्तसमये जातं तदर्थं नवमीतिथिं मत्वा रामनवमी आयाति इति हेतोः 'रामचन्द्र' नामाभिधानं कृतवान् । तथापि अग्रे गत्वा तेन अम्बिकादत्त इति नाम्ना ख्यातिः प्राप्ता ।

व्यासस्य पूर्वजाः जयपुरनगस्य समीपे मानपुरे वसन्ति स्म । पराशरगोत्रीयाः तथापि 'मीडा' ब्राह्मणत्वेन प्रसिद्धाः जाताः । ज्योतिषविद्यायां प्रकाण्डपण्डितस्य ईश्वररामस्य पुत्रः कृष्णरामस्य तथा प्रतिष्ठा आसीत्, तेन प्रभावितः ठाकुर बलेनसिंहेन (मानसिंहस्य पुत्र दुर्जनसिंह द्वारा प्रस्थापित राजधान्या वंशधरः) पाराशरीयगोत्रीय मीडाकुलानिजधूलाग्रामे अवासयत् । कृष्णरामस्य पुत्रः हरिरामोऽपि स्वपूर्वजानुगामी ज्योतिषविद्यायां पारंगतः जातः । हरिरामस्य चत्वारः पुत्रा आसन्, तेषु राजारामोऽपि ज्योतिषविद्यायां अव्याहतगतिमान् आसीत् । तीर्थाटनेऽपि कुशलः । तीर्थाटने ते काशीं प्राप्ताः तत्रैव विविधविषयेषु अभ्यासः कृतः, तदनन्तरं पुनः धूलानगरीं नायाताः । केचन विद्वांसः राजारामं अम्बिकादत्तस्य पिता कथयन्ति किन्तु तन्नास्ति सत्यं, ते पितामहाः आसन् ।

कविना प्रारम्भिकशिक्षा स्वगृहे एव प्राप्ता । बाल्यकालादेव कवित्वं स्फुटितम् । यत्र तत्र गत्वा समस्यापूर्तिं कृत्वा सर्वान् आकर्षयत् । बहवः शङ्कया अकथयन्, रचनेयं पितुर्दुर्गादत्तस्य वर्तते । किन्तु कवेरन्योक्तिं श्रुत्वा शान्ता अभवन्।

**कमलिनि ! मलिनीकरोषि चेतः किमिति बकैरवहेलितानभिज्ञैः ।**

**परिणतमकरन्दमार्मिकास्ते जगति भवन्तु चिरायुषो मिलिन्दाः ॥**

कवेः रुचिः संस्कृतेन सह आङ्गलभाषायां, हिन्दीभाषायामपि आसीत् कविना पण्डितताराचरणभट्टाचार्यस्य समीपे साहित्यदर्पणः सिद्धान्तलक्षणम्, राममिश्रसमीपे संस्कृतसाहित्यम्, वामनाचार्यसमीपे सांख्यं, कैलाशचंद्रसकाशात् गणितम् अधीतम् । बनारसमहाविद्यालये आङ्गलपठनाय डॉ. विथोसकाशं गतवान् ।

त्रयोदशवर्षे परिणयसूत्रे बन्धनं जातम् । सम्पूर्णपरिवारस्य भरणपोषणवहनं स्वशिरसि आगतम् । कथावार्तायां कौशल्यं प्राप्तं, तेन जनाः व्यासोपाधिना संबोधयन्ति स्म । ततः तैः अम्बिकादत्त व्यासः इति उपाधिः प्राप्तः ।

संवत् 1927 चैत्रशुक्लैकादश्यां पितुः एवं संवत् 1931 (वर्षे) मातुः देहावसानं जातम् । अग्रजस्य गणेशदत्तस्य अम्बिकादत्ते अनुजे गौरीशंकरे च भ्रातृस्नेहः नासीत्, पितृवियोगत्वात् अनुजस्य पुत्रस्य च पालनं स्वशिरसि आगतम् । संवत् 1927 तमे वर्षे सर्वकारसंस्कृतमहाविद्यालयद्वारा आयोजितपरीक्षायां प्रथमत्वेन साहित्याचार्य-उपाधिं प्राप्तवान्, तत्र तैः चतुर्विशंति निमेषमात्रसमये पद्यशतं रचितम्, तेन विद्वद्भिः ''घटिकाशतकम्'' इत्युपाधिना सम्मानितः । विविधवृत्तपत्रेषु तेषां प्रशंसा जाता । भारतेन्दु महोदयैः संवत 1941 'पीयूष-प्रवाह' नाम्ना परिवर्तितम् । मधुवनीमध्ये संस्कृतमहाविद्यालये आचार्यपदं प्राप्तम् । कालाभ्यन्तरे अनुजगौरीशंकरस्य अष्टादशतमे वर्षे स्वर्गवासः जातः । अनेनाघातेन कविः भग्नहृदयो जातः । तस्योपरि कुठाराघातः तदा जातः यदा तेषां शुभचिंतकः भारतेन्दुः 6 फरवरी ई.स. 1645 मध्ये दिवङ्गतः । तेन अत्यधिकाघातेन स्वात्मानम् एकाकी अमन्यत । स्वजीनवस्य अन्तिमक्षणेषु विविधस्थानेषु अध्यापनं कुर्वन् संवत् 1956 मार्गशीर्षमासे कृष्णपक्षे त्रयोदश्यां 42 (द्विचत्वारिंशत्) तमे वर्षे साहित्यसंसारं शून्यं कृत्वा नववर्षीयं पुत्रं राधाकुमारं एकां पुत्रीं विलपन्तीं निःसहायं कृत्वा स्वधाम प्राप्तवान् । सरस्वतीपत्रिकानुगतं समयः 19 नवम्बर 1900 ई.स. मन्यते ।

**कविकृतयः**

कविना स्वजीवनं यावत् चतुःषष्टी कृतयः रचिताः वर्तन्ते तेषु संस्कृतम् एवं हिन्दीभाषा प्रयुक्ता वर्तते ।

संस्कृते यथा -

(1) सहस्रानररामायणम् (2) सांख्यशास्त्रसुधा (3) पतञ्जलिप्रतिबिम्बम् (4) दुःखद्रुमकुठार (5) अवतार मीमांसाकारिका (6) प्राकृतविचित्रशब्दार्थकोषः (7) गुप्ताशुद्धिप्रदर्शनम् (8) संस्कृत-अभ्यास-पुस्तकम् (9) कुसुमम्। नाटकानि अपि लिखितानि सन्ति तानि यथा (1) सामवतम् (2) धर्माधर्मकलकलम् (3) मित्रालापः । हिन्द्यामपि प्रायः सप्तग्रन्थाः रचिताः । एतेषु सर्वेषु कवेः अमरग्रन्थः शिवराजविजयः वर्तते, तत् गद्यकाव्यम् अस्ति । ग्रन्थोऽयं पुरस्कृतः प्रौढः प्रकर्षः एवं कवेः कवित्वं जनयति ।

यथा -

**चित्तं व्याप्नोति य क्षिप्रं शुष्केन्धनमिवानलः ।**

**स प्रसादः समस्तेषु रसेषु रचनासु च ॥**

प्रसादगुणसम्पन्नं एवं वैदर्भीरीतिप्रमाणितरचना कवेः दृश्यते यथा -

**माधुर्यव्यंजकैर्वर्णैः रचना ललितात्मिका ।**

**अवृत्तिरल्पवृत्तिर्वा वैदर्भीरीतिरिष्यते ॥**

कवेः कृतिं पठित्वैव सहृदयानां राष्ट्रीयचेतना जागर्ति । ऐतिहासिकं तथ्यं कल्पनाप्रसूतकथा उपन्यासे मणिकांचन संयोगम् उत्पादयति । शिवराजे पितृपक्षे (इतिहासः) मणिवत् श्वसुरपक्षे (कवित्वकल्पना) काञ्चनवत्, पृथक्पृथक् भूत्वाऽपि न बाधकः अपितु साधको भवति ।

भागलपुरे निवसता कविना संवत् 1945 'शिवराजविजयः' उपन्यासस्य लेखनकार्यं प्रारब्धं, तत् संवत 1948 पूर्णं जातम् । उपन्यासस्य प्रकाशव्यवस्था नासीत् अतः एवमेव स्थापितम्, तेषाम् अवसानानन्तरं काकरौलीनरेशद्वारा मुद्रितं कृतम् । प्रथमं संस्करणं संवत् 1958 सन् 1901 ख्रिष्टाब्दे प्रकटितम् ।

**कथानकम्**

दक्षिणे यवनानाम् आधिपत्यम् अत्याचारं च दृष्ट्वा शिवराजस्य मनः खिन्नं जातम्, तन्न सोढुं शक्तः, अतः स्वराष्ट्ररक्षणाय कृतप्रतिज्ञः ''कार्यं वा साधयेयम् देहं वा पातयेयम्'' मनसा, वाचा, कर्मणा स्वधर्माग्रही संजातः एवं च ''सतीनां सतां त्रैवर्णिकस्य, आर्यकुलस्य, धर्मस्य, भारतवर्षस्य च आशा-संतान-वितानस्य आश्रयः'' स्वतंत्रतार्थं संघर्षः आरब्धः . तत्र मित्रवर्गैः, श्रद्धालुभिः, सैनिकै : विश्वस्तवर्यैः सहयोगः दत्तः तेन सर्वत्र विजयपताकां दृष्ट्वा बीजापुरराज्ञा अफजलखान प्रेषितः । शिवाजी तमपि स्वबुद्धिचातुर्येणं निपातितवान् । ततः शाइस्तखाँ दिवंगतः, भूषणकवेः मेलनम्, सूर्यनगरी उपरि विजयस्य जयसिंहेन सह संघर्षः इत्यादिवर्णनं वर्तते । हिन्दुषु एकताभावः परस्परवैमनस्यं औरंगजेबस्य कूटनीतिः, पराजयस्य एतानि कारणानि दृग्गोचराणि भवन्ति । डॉ भगवानदासस्य एवं डॉ. कपिलदेवस्य च शिवराजविजयोपरि समीक्षा वर्तते।

ग्रन्थारम्भे अरूण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिन............ एवं प्रभातवर्णनं ग्रन्थस्य शोभावृद्धिं करोति। कुत्रचित् ''चरित्रगीतिर्नवराष्ट्रचेतनाप्रसूतिः'' वाक्यै शौर्यं राष्ट्रभावनां च जनयति । कुत्रचित् कविना रोमाञ्चजनकं गद्यं विलिख्य ग्रन्थः प्रबुद्धः कृतः तथा घटना लिखिता अनेन हृदयं द्रवीभूतं भवति यथा -

''क्वचिद् दारा अपह्रियन्ते, क्वचिद् धनानि लुण्ठ्यन्ते,क्वचिदार्त्तनादाः, क्वचिद् रुधिरधारा, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः, सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्यन्ते, स्मृतयः समृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तः सन्ताप्यन्ते ।'' इत्थं वर्णनं स्वग्रन्थे कृतं वर्तते ।

ग्रन्थोऽयं न राजनैतिकः अपि तु सामाजिक, धार्मिक-दृष्ट्याऽपि बोधदायकः वर्तते ।

नाटकानामपि अंशाः परस्परसंवादेन रुचिकराः दृश्यन्ते

**ग्रन्थकथानकम्**

स्वामिभक्तः द्वौवारिकः अतिथिरूपेण आगतः संन्यासीवेशधारी गौरसिंहः अनयोः मध्ये संवादः अभवत् तदनन्तरं संन्यासी द्वारपालस्य परीक्षां करोति । तस्य स्वामिभक्तिं दृष्ट्वा प्रसन्नः संन्यासी स्वपरिचयं गौरसिंहरूपेण ददाति, ततः द्वारपाल अन्तःपुरं गत्वा शिववीराय निवेदयति तदा शिवाजी तं शीघ्रं प्रवेष्टुम् आदेशं यच्छति तदनन्तरं द्वयोः मध्ये यः संवादः भवति तस्य संगृहीताः अंशाः अत्र प्रस्तुताः सन्ति यथा -

**गद्यारम्भः**

तमवलोक्यैव इत इतो गौरसिंह ! उपविश उपविश । चिराय दृष्टोऽसि अपि कुशलं कलयसि (मन्यसे) ? अपि कुशलिनस्तव सहवासिनः ? अप्यङ्गीकृत-महाव्रतं निर्वहथ यूयम् ? अपि कश्चिन्नूतनो वृत्तान्तः ? इति कुसुमानीव वर्षता पीयूष- प्रवाहेणेव सिञ्चता मृदुना वचनेन जातेन तत्र भवता शिववीरेण आद्रियमाणः (भावपूर्वकं) आपृच्छ्यमानश्च त्रिः प्रणम्य अन्तरङ्ग-मण्डली-जुष्ट(सेवित) कटे समुपविश्य करौ सम्पुटीकृत्य ''भगवन् ! अखिलं कुशलं, प्रभूणाम् अनुग्रहेण अस्माकम् अखिलानाम् अङ्गीकृते महाव्रते च मा स्म पदं धात् (भवेत्) कश्चनान्तराय इत्येव सदा प्रार्थ्यते भगवान् भूतनाथः। नूतनः प्रत्नश्च (पुरातनश्च) को नामाद्यतनसमये वक्तव्यश्च वृत्तान्तः - ऋते दुराचारात् स्वच्छन्दानाम् उच्छृङ्खलानाम् उच्छिन्नसच्छीलानां म्लेच्छहतकानाम्'' इति कथयामास ?। ततश्च तेषामेवमभूदालापः शिववीरः अथ कथ्यतां को वृत्तान्तः ? का च व्यवस्था अस्मन्महाव्रताश्रमपरम्परायाः ?

गौरसिंहः- भगवन् सर्वं सुसिद्धम्, प्रतिगव्यूति (कोंस) अन्तरालम् (मध्ये) अङ्गीकृत-सनातनधर्म-रक्षा-महाव्रतानां (नियमानां) धारित-मुनि-वेषाणां वीरवराणामाश्रमाः सन्ति । प्रत्याश्रमं च वलीकेषु (गृहाच्छादनपटल प्रान्तभागः) गोपयित्वा स्थापिताः परश्शताः खड्गाः, पटलेषु तिरोभाविताः शक्तयः (शस्त्रविशेषाः), कुशपुञ्जान्तः स्थापिता भुशुण्डयश्च समुल्लसन्ति। उञ्छस्य, (भूमौ पतितकणानामेकैकशो ग्रहणम्) शिलस्य, (क्षेत्रादौ स्वामित्यक्तानां कणानां ग्रहणम्) समिदाहरणस्य, इङ्गदी पर्य्यन्वेषणस्य, भूर्जपत्र-परिमार्गणस्य, कुसुमावचयनस्य, तीर्थाटनस्य, सत्सङ्गस्य च व्याजेन केचन जटिलाः, परे मुण्डिनः, इतरे काषायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणश्च बहवो बटवश्चराः सञ्चरन्ति । विजयपुरात् उड्डीय अत्र आगच्छन्त्या मक्षिकाया अप्यन्तः स्थितं वयं विद्मः किं नाम एषां यवनहतकानाम् ?

शिववीरः- साधु साधु कथं न स्यादेवम् ? भारतवर्षीया यूयम्, तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतं वर्षम्, भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः तमेते जाल्माः (अविवेकिनः) समूलमुच्छिन्दन्ति, अस्ति च ''प्राणा यान्तु,न च धर्मः'' इत्यार्याणां दृढः सिद्धान्तः । महान्तो हि धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा, निशीथेष्वपि, वर्षास्वपि ग्रीष्म-घर्मेष्वपि, महारण्येष्वपि कन्दरिकन्दरेष्वपि व्यालवृन्देष्वपि (सर्पसमूहेषु) सिंह-संघेष्वपि, वारण-वारेष्वपि (हस्ति) चन्द्रहास - चमत्कारेष्वपि च निर्भया विचरन्ति । तद् धन्याः स्थ यूयं वस्तुतः आर्यवंशीयाः वस्तुतस्तु भारतवर्षीयाः ।

अथ कथ्यतां कोऽपि विशेषोऽवगतो वा अपजलखानस्य विषये ?

गौरसिंहः- ''अवगतः तत्पत्रमेव दर्शयामि'' - इति व्याहृत्य उष्णीष-सन्धौ (शिरोवेष्टनि) स्थापितं कन्यापहारक-यवन-युवक-मृत-शरीर-वस्त्रान्तः प्राप्तं पत्रं बहिश्चकार ।

सर्वे च विजयपुराधीशमुद्रामवलोक्य ''किमेतत् ? कुत एतत् ? कथमेतत् ? कस्मादेतत् ? इति जिज्ञासमानाः सोत्कण्ठाः वितस्थिरे (स्थिताः) ।

गौरसिंहस्तु शिववीरस्यापि तत्प्राप्तिचरितशुश्रुषाम् (श्रोतुमिच्छाम्) अवगत्य संक्षिप्य सर्वं वृत्तान्तमवोचत् । ततस्तु दर्श्यताम्, प्रसार्यताम्, पठ्यताम्, कथ्यताम्, किमिदम् ? इति पृच्छति शिववीरे गौरसिंहो व्याजहार (उवाच) ।

भगवन् ! सर्पाकारैरक्षरैः पारस्य (पारसी) भाषायां लिखितं पत्रमेतदस्ति । एतस्य सारांशोऽयमस्ति - विजयपुराधीशः स्वप्रेषितमपजलखानं सेनापतिं सम्बोध्य लिखति यत् - वीरवर ! महाराष्ट्रराजेन सह योद्धुं प्रस्थितोऽसीति मा स्म भूत् कश्चनान्तरायस्तव विजये । शिवं युद्धे जेष्यसि (विजयिष्यसि) चेत्, पद्भ्यां सिंहं जीतवानसीति मंस्ये, किन्तु सिंहहननापेक्षया जीवतः सिंहस्य वशीकार एवाधिकं प्रशस्यः । तद् यदि छलेन जीवन्तं शिवमानयेः, तद् वीरपुङ्गवोपाधि - दानसहकारेण तव महतीं पदवृद्धिं कुर्य्याम् गोपीनाथपण्डितोऽपि मया तव निकटे प्रस्थापितोऽस्ति, स मम तात्पर्यं विशदीकृत्य तव निकटे कथयिष्यति । प्रयोजनवशेन शिवमपि साक्षात्करिष्यति इति ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) शिवराजविजयः कीदृश उपन्यास अस्ति ?

(क) सामाजिकः (ख) ऐतिहासिकः (ग) राजकीयः (घ) बौद्धिकः

(२) ग्रन्थे प्रधानरसः कः वर्तते ?

(क) शान्तः (ख) रौद्रः (ग) भयानकः (घ) वीरः

(३) शिवराजः कीदृशः नायकः ?

(क) धीरोदात्तः (ख) धीरललितः (ग) धीरोद्धतः (घ) धीरप्रशान्तः

(४) अम्बिकादत्तस्य जन्म कस्मिन् संवत्वर्षे अभवत् ?

(क) 1917 (ख) 1915 (ग) 1918 (घ) 1916

(५) कविना गणितं कस्य समीपे अधीतम् ?

(क) रमेशचन्द्रस्य (ख) सुरेशचन्द्रस्य (ग) कैलाशचन्द्रस्य (घ) गुणेशचन्द्रस्य

(६) कवेः कति कृतयः सन्ति ?

(क) पंचषष्टी (ख) सप्तषष्टी (ग) चतु:षष्टी (घ) षष्टी

(७) कविना जगत् शून्यं कदा कृतम् ?

(क) 42 वर्षे (ख) 45 वर्षे (ग) 44 वर्षे (घ) 50 वर्षे

(८) पत्रं कस्यां भाषायाम् आसीत् ?

(क) हिन्दी (ख) गुर्जर (ग) पारसी (घ) उर्दु

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) ग्रन्थस्य कथावस्तु कति विरामैः विभक्तमस्ति ?

(२) कवेः भाषा कीदृशी दृश्यते ?

(३) कवेः अनुजभ्रातुः नाम किम् ?

(४) संन्यासीवेशधारी कः अस्ति ?

(५) शिवराजविजयोपरि कस्य समीक्षा प्राप्यते ?

**३. विस्तारपूर्वकम् उत्तरं लिखत ।**

(१) शिवराजविजये किं किं समाविष्टमस्ति ?

(२) भारतवर्षीयाणां कृते शिववीरः किं कथयति ?

(३) गौरसिंहः अफजलखानविषये शिववीरं किं कथयति ?

(४) दक्षिणे यवनानाम् आधिपत्यवर्णनं यथाग्रन्थं लिखत ?

**४. टिप्पणी लेख्या ।**

(१) गौरसिंहः

(२) द्वारपालः

(३) शिववीरः

**५. अधोलिखितस्य गद्यांशस्य अर्थं मातृभाषायां लिखत ?**

क्वचिद् दारा अपह्रियन्ते, क्वचिद् धनानि लुण्ठ्यन्ते, क्वचिदार्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः सम्प्रति तुम्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्यन्ते, स्मृतयः समृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते सत्यः पात्यन्ते, सन्तः सन्ताप्यन्ते ।

**छात्रप्रवृत्तिः**

- अन्यवीरमहापुरुषाणां इतिहासंजानीयुः ।

**शिक्षकप्रवृत्तिः**

- शिवराजविषये अन्यग्रन्थस्य अभ्यासः कर्तव्यः ।

| १८ | पञ्चतन्त्रम् |
|---|---|

**प्रस्तावना**

संस्कृतसाहित्ये पञ्चतन्त्रं हितोपदेशश्चेति प्राणिकथापरकौ द्वौ सुप्रसिद्धौ ग्रन्थौ वर्तेते । सामान्यजीवम् उद्दिश्य सहजतया प्रदत्तः जीवनोपयोगी बोधः बालादारभ्य वृद्धं यावत् सर्वान् आकर्षति । सर्वेभ्यः खलु पञ्चतन्त्रस्य वार्ताश्रवणं भृशं रोचते। रसानुभूतिकारणेन वार्तासु गुम्फितः बोधः मनागपि भाररूपो न भवति । अतस्तु विश्वसाहित्ये अयं पञ्चतन्त्राख्यः ग्रन्थः अद्भूतः अद्वितीयश्च मन्यते । ग्रन्थरत्नमिदं प्राणिकथानां समग्रां लाक्षणिकतां बिभर्ति । अत्र रसप्रदाः वार्ताः, उत्तमं हास्यम्, व्यंग्यः, उपदेशः, श्रेष्ठपात्रालेखनम्, सरसं प्रसङ्गनिरूपणम्, विशिष्टा शैली इत्येतैः गुणैः ग्रन्थोऽयं सर्वेभ्यः विशिष्यते। मध्यमाकक्षायाः छात्राणां ज्ञान वृद्ध्यर्थम् अद्य वयं सन्दर्भेऽस्मिन् पठिष्यामः ।

पञ्चतन्त्रस्य रचना पञ्चानां तन्त्राणां समाहार इत्यनेन मित्रभेदः, मित्रसंप्राप्तिः, काकोलूकीयम्, लब्धप्रणाशम्, अपरीक्षितकारकमिति पञ्चविभागैः कृतास्ति । ''गद्यं कवीनां निकषं वदन्ति'' गद्यं नाम कवीनाम् एका परीक्षा पुनश्चात्र बालमानसं लक्षीकृत्य रचितं गद्यमतीव महत्त्वं भजते । 'ज्ञानेन सह क्रीडा' इति सिद्धान्तमवलम्ब्य एव पञ्चतन्त्रस्य साफल्यमस्ति।

पञ्चतन्त्रस्य रचनायाः मुख्योद्देश्यं दर्शयन् यथोक्तम् ''कथाच्छलेन बालानां नीतिस्तदिह कथ्यते'' परिणामतः फलस्वरूपेण षण्मासाभ्यन्तरे प्रतिज्ञया साकम् आह्वानं स्वीकृत्य प्राणिनः पक्षिणश्च पात्रत्वेन दर्शयित्वा असौ महाशयः पण्डित विष्णुशर्मा अल्पीयसा काले न बालराजकुमारान् सरलसरसभाषायां नीतिशास्त्रे निपुणान् चकार ।

कविवरोऽयं पं. विष्णुशर्मा कथामुखेन सर्वमपि लोकव्यवहारम्, सदाचारपद्धतिम्, नीतिपाटवञ्च, अतीव हृदय-ग्राहिण्या भाषया उपदिदेश । जीवने सततं बोधप्रदानि नेत्रोद्घाटकानि रुचिराणि पद्यानि वाचकानां चेतोहारिणः कस्य वा विदुषः चेतो न चमत्करोतीति ?

पञ्चतन्त्रे समुपवर्णिताः विषयाः सुकुमारधियां बालानामपि सौकर्येण बोधनाय एव प्रोक्तास्सन्ति । कथापात्रत्वेन बहुधा पशुपक्षिणः निमित्तीकृताः सन्ति । ते च मनुष्यवाण्या वदन्ति व्यवहरन्ति च मिथः मनुष्यवदेव । तस्मात् पञ्चतन्त्रस्य अद्वितीयत्त्वं सिद्ध्यति ।

---

**पञ्चतन्त्रस्य प्रणेता**

पञ्चतन्त्रस्यास्य कर्तुः विषये किमपि 'इदमित्थमिव' बलवत्प्रमाणभूतं विवरणं नोपलभ्यते । परं तथापि तथ्ययुतं यथाकथञ्चित् तथ्यान्वेषणाय आविष्करणाय च प्रयतिष्यामहे । संस्कृतसाहित्ये कश्चिदपि कविः स्वजीवनविषये किमपि प्रतिपादने मौनं भजते । यतो हि कवेः परिचयप्राप्तिः अतिकष्टसाध्या भवति किन्तु पञ्चतन्त्रस्यास्य प्रणेतुः विषये पञ्चतन्त्रस्य प्रारम्भे एवं प्रदत्ते कथाभागे ग्रन्थरचनायाः तात्पर्यं दर्शितमस्ति ।

एतदनुसारं महिलारोप्यनाम नगरे अमरशक्ति इत्यभिधस्य भूपस्य त्रिभ्यः मूर्खपुत्रेभ्यः राजनीतिशास्त्रस्य ज्ञानप्रदानाय पण्डित विष्णुशर्मा नामा ब्राह्मणः षण्मासाभ्यन्तरे एव शास्त्रपारंगतान् कर्तुम् आह्वानं स्वीचकार । एतदर्थमसौ विष्णुशर्मा पञ्चतन्त्रस्य रचनां चक्रे । किन्तु सन्दर्भेऽस्मिन् सर्वेषां विदुषां मतैक्यं नास्ति । कथमिति चेत् विष्णुशर्मा स्वकृतौ ग्रन्थकर्तारमेकं पात्रत्वेन दर्शयति तन्न खलु युक्तियुक्तं भाति । नायं विष्णुशर्मा कश्चन अन्यः अपितु राजनीतिकुशलः, प्रसिद्धः चाणक्य एवास्ति । यस्य मूलं नाम विष्णुगुप्तासीत् ।

किन्तु अत्रापि विदुषां परस्परं वैमत्यं दरीदृश्यते । कारणं पञ्चतन्त्रस्य शैली अर्थशास्त्रस्य च शैली इत्यनयोः साम्यं न प्रतिभाति ।

यत्किमपि भवतु परमिदं तु निश्चितमस्ति यत् पञ्चतन्त्रस्य कर्ता विष्णुशर्मा नामा ब्राह्मण: सकलशास्त्रनिष्णात: विशेषेण नीतिशास्त्रपारङ्गत: महान् विद्वानासीत् इत्यत्र तु न मनागपि शंकावलेश: । अपरञ्च –

पञ्चतन्त्रकथारम्भमुखेन बुध्यते यथा–

1. **मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।**

**चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्य: ॥**

2. **सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम्**

**तन्त्रै: पञ्चभिरेतच्चप्रकार सुमनोहरं शास्त्रम् ॥**

असौ पण्डितराज: विष्णुशर्मा कुत्रत्य: ? कश्चास्य समय: ? कदा कुत्र च प्रबन्धमिमं रचयामास ? इत्येतत्सर्वं निश्चेतुं न शक्यते । तथापि गवेषणया पाश्चात्यविदुषा 'हटन' महाभागेन पञ्चतन्त्रस्य रचना काश्मीरे क्रैस्तपूर्वे द्वितीयशतके सम्पन्नेति निर्धारितम् । यत: पहलवीभाषायाम् अस्यानुवाद: क्रैस्त 570 इत्यस्मात् पूर्वमेव सम्भाव्यते । तत: कतिपयवर्ष पूर्वमेवास्यरचना सम्भवेत् इति अनुमातुं न दुष्करम् । किन्तु प्रसिद्ध: विद्वान् 'कीथ' अत्र सम्मतो न भवति । तन्मतानुसारं तु ई.स. पूर्वे 200 पूर्वे ग्रन्थस्यास्य निर्माणकाल: गण्यते ।

अथ पञ्चतन्त्रेदं भारतवर्षे कुत्र निबद्धमिति वक्तुं न शक्यते किन्तु कथामुखे निर्दिष्टं महिलारोप्यं नाम नगरं दक्षिणभारते समागतमस्ति इति मत्वा केचन विद्वास: पञ्चतन्त्रस्य रचना दक्षिणे जाता स्यादिति मन्यन्ते ।

**पञ्चतन्त्रस्य वार्ता**

अस्ति कस्मिंश्चित् विवक्तप्रदेशे मठायतनम् । तत्र देवशर्मा नाम परिव्राजक: प्रतिवसति स्म । तस्य समीपे अनेक साधुमहात्मपुरुषै: उपहाररूपेण प्रदत्तानेकवस्तूनां विक्रयणेन महद्धनं गच्छता कालेन बहुसञ्चितमभवत् । ततो आरभ्यायं संन्यासी कस्यचिदपि न विश्वसिति स्म । नक्तं दिवं स्वसमीपत: धनमन्यत्र नामुञ्चत । अथवा साधु इदमुच्यते –

**( 1 ) अर्थानामर्जने दु:खमर्जितानां च रक्षणे ।**

**आये दु:खं व्यये दु:खं धिगर्था: कष्टसंश्रया: ॥**

अर्थात् अर्थार्जने दु:खम् अर्जितस्य च रक्षणेऽपि दु:खम् । धनागमे व्यये च दु:खम् अत: एतादृशं कष्टकरं धनं धिक् । अथ कदाचित् दिवसेषु गच्छत्सु सत्सु परवित्तोपहर्ता, धूर्त: आषाढभूतिनामा तत्धनं दृष्टवा व्यचिन्तयत् कथमहं तद् धनं प्राप्नुयामिति । दृढप्रस्तरै: सम्भूतां मठस्य भित्तिं भेत्तुं तु न शक्यते । द्वारमपि बहूच्चत्वात् प्रवेष्टुं न पार्यते । तदेनं कुहकवचनै: विश्वास्य शिष्यो भवामि येनायं मयि विश्वसेदिति । उक्तञ्च –

**( 2 ) निस्पृहो नाधिकारी स्यान्नाकामी मण्डन: प्रिय: ।**

**नाविदग्ध: प्रियं ब्रूयात्स्फुटवक्ता न वञ्चक: ॥**

निस्पृह: य: अस्ति स धनस्याधिकारी न भवति । अकामी शृगांरप्रियो न भवति । मूर्खश्च कदापि प्रियं न ब्रूयात्। स्पष्टक्ता वञ्चको न भवति इति निश्चित्य असौ आषाढभूति: तस्यान्तिकम् उपगम्य ॐ नम: शिवाय इत्युक्त्वा साष्टाङ्गं प्रणिपत्य च सप्रश्रयमुवाच – भगवन् । असार: खलु संसारोऽयम्, गिरिनदीवेगोपमं यौवनम्, तृणाग्निसमं जीवितम् शरदर्तो: मेघच्छायासदृशा: भोगा:, स्वप्नसदृश: मित्रपुत्रकलत्रभृत्यवर्गसम्बन्ध: । एवं मया सम्यक् परिज्ञातम् । तत्किं कुर्वत: मम संसारसमुद्रोत्तरणं भविष्यतीति तच्छ्रुत्वा देवशर्मा सादरमाह – वत्स ! धन्योऽसि त्वं यत्प्रथमे वयस्येवं विरक्तिभाव: ।

प्रथमे वयसि युवावस्थायां य: शान्त: स एव शान्त इति मे मति : धातुषु क्षीयमाणेषु अर्थात् वृद्धावस्थायां क: शान्त: न जायते ? यच्च त्वं मां संसारसागरोत्तरणोपायं पृच्छसि तच्छ्रुयताम् –

**( 3 ) शूद्रो वा यदि वान्योऽपि चाण्डालोऽपि जटाधरः ।**

**दीक्षितः शिवमन्त्रेण स भस्माङ्गी शिवो भवेत् ॥**

शुद्रः, चाण्डालः, किं वा कश्चिदपि पुमान् अन्यो वा जटाधरः शिवमन्त्रेण दीक्षितः भस्माङ्गरागेण विभूषितोऽस्ति चेत् स तु साक्षात् शिवस्वरूपो भवति । तथा च यदि कश्चिदपि मनुष्य ॐ नमः शिवायेति षडक्षरमन्त्रं जपित्वा एकमपि पुष्पं शिवाय अर्पयति चेत् तस्य संसारावागमनं न जायते । तस्य पुनर्जन्म न जायते इति ।

तच्छ्रुत्वा आषाढभूतिः तस्य संन्यासिनः देवशर्मणः पादौ गृहीत्वा सविनयमिदमाह – भगवन्, तर्हि शिवमन्त्रमुपदिश्य दीक्षां दत्त्वा भवता मयि अनुग्रहः क्रियतामिति । देवशर्मा ब्रूते – वत्स ! अनुग्रहं तु ते करिष्यामि परन्तु रात्रौ त्वया मठमध्ये न प्रवेष्टव्यम् यत्कारणं निःसङ्गता यतीनां प्रशस्यते तव च ममापि च । तत्त्वया व्रतग्रहणानन्तरं मठद्वारे तृणकुटीरके शयितव्यम् इति । आषाढभूतिः आह – भगवन्, भवदादेशः प्रमाणम् । कारणं परलोकसाधने इदमावश्यकमस्ति ।

अथ कृतशयनसमयं देवशर्मानुग्रहं कृत्वा शास्त्रोक्तविधिना तं शिष्यतामनयत् । सोऽपि हस्तपादावमर्दनादिपरिचर्यया तं परितोषमनयत् । पुनस्तथापि मुनिः धनमन्यत्र नामुञ्चत । अथैवं गच्छति काले आषाढभूतिश्चिन्तयामास – अहो न कथंचिदेष मे विश्वासमागच्छति । तत्किं दिवापि शस्त्रेण मारयामि । किं वा विषं प्रयच्छामि । किं वा पशुधर्मेण व्यापादयामि इति । एवं चिन्तयतस्तस्य देवशर्मणः शिष्यपुत्रः कश्चिद् ग्रामादामन्त्रणार्थं समायातः । प्राह च – भगवन्, यज्ञोपवीतसंस्काराय मम गृहमागम्यताम् इति । तच्छ्रुत्वा देवशर्मा आषाढभूतिना सह प्रसन्नमनाः प्रस्थितः । अथैवं तस्य गच्छतोऽग्रे काचिन्नदी समायाता । तां दृष्ट्वा धनम् अधः कन्थामध्ये सुगुप्तं निधाय स्नात्वा देवार्चनं विधाय तदनन्तरमाषाढभूतिमिदमाह – भो आषाढभूते ! यावदहं पुरीषोत्सर्गं कृत्वा समागच्छामि तावदेषा कन्था सावधानतया रक्षणीया इत्युक्त्वा गतः । आषाढभूतिरपि तस्मिन् अदर्शनीभूते धनमादाय पलायितः ।

देवशर्मा किञ्चित् कालानन्तरमायातः परं शिष्यम् आषाढभूतिं नापश्यत् । ततश्चौत्सुक्येन यावत्कन्थामालोकयति तावत् धनं न पश्यति । ततश्च हा हा ! लुण्ठितोऽस्मि इति जल्पन् पृथिव्यां मूर्च्छया न्यपतत् । अनन्तरं चेतनां लब्ध्वा पुनरपि उत्थाय रोदितुमारब्धः । – भो आषाढभूते ! क्व मां वञ्चयित्वा गतोऽसि तद् देहि मे प्रतिवचनम् । इत्थं बहु विलप्य तस्य पादचिन्हमन्वेषयन् शनैः शनैः प्रस्थितः ।

अथैवं गच्छन् सायंतनकाले कञ्चित् ग्राममाससाद । तस्मात् ग्रामात् कश्चित्कौलिकः, तन्तुवायः पत्न्या सह मद्यपानाय समीपवर्तिनि ग्रामे प्रस्थितः । देवशर्मा तं विलोक्य उवाच– भो ! भद्र ! वयं सूर्यास्तकाले अतिथिरूपेण तवान्तिकं प्राप्ताः । न कमप्यत्र ग्रामे जानीमः । तद् गृह्यतामतिथिधर्मः उक्तञ्च –

**( 5 ) सम्प्राप्तो योऽतिथिः सायं सूर्योढे गृहमेधिनाम् ।**

**पूजया तस्य देवत्त्वं प्रयान्ति गृहमेधिनः ॥**

कौलिकोऽपि तच्छ्रुत्वा भार्यामाह – –प्रिये । गच्छ त्वम् अतिथिमादाय गृहं प्रति पादशौचभोजनशयनादिभिः सत्कृत्य त्वं तत्रैव तिष्ठ । अहं तव कृते प्रभूतं मद्यमानेष्यामि । एवमुक्त्वा प्रस्थितः । साऽपि परपुरुषगामिनी तद्भार्या मुदितवदना देवदत्तं मनसि ध्यायन्ती गृहं प्रतस्थे । अथवा साधु चेदमुच्यते ।

**( 6 ) दुर्दिवसे घनतिमिरे दुःसञ्चारासु नगरवीथीषु ।**

**पत्युर्विदेशगमने परमसुखं जघनचपलायाः ॥**

अर्थात् मेघाच्छादितदिने घनतिमिरे, अतिसंकीर्णनगरवीथीषु, पत्युर्विदेशगमने सति परपुरुषगामिन्यः योषितः भृशं मोदन्ते । अथ कौलिकभार्या गृहं गत्वा देवशर्मणे आस्तरणं भग्नां च खट्वां दत्वा उक्तवती – भो भगवन् । यावदहं स्वसखीं ग्रामादभ्यागतां सम्भाव्य द्रुतमागच्छामि तावत्त्वया मद्गृहे ससावधानं विश्रामः कार्य इति ।

ततश्च अतिथिभूतं देवशर्माणम् एवमुक्त्वा देवदत्तं मेलनाय निर्गता । तदा तस्याः पतिः पीतमद्यः सम्मुखमागतः। तां सज्जीभूतां दृष्ट्वा क्रोधाविष्टेन तेन सा रज्ज्वा स्तंभेन सह कोणे बद्धा । ततश्च सः निद्राधीनोऽभूत् । अत्रान्तरे पुंश्चल्याः सखी तत्रागता । तत्स्थाने स्वयं बद्ध्वा ताम् अमोचयत् । मध्यरात्रौ चर्चाप्रसङ्गे क्रुद्धः पतिः तस्याः नासिकां चिच्छेद । पुनश्च प्रसुप्तः । मध्यरात्रौ सा पुश्चली देवदत्तसकाशात् समागत्य स्वसखीं मुमोच । प्रातःकाले स्वसतीत्वप्रभावेन मम नासिका पूर्ववदभवदिति अभाषत । स्वदोषाच्छादनाय नापितभार्याऽपि स्वभर्तारं दोषिनं चकार । अतः तत्पत्युः मृत्युदण्डोऽभवत् ।

अथ तं राजसैनिकाः मृत्युदण्डार्थं नयन्तः आसन् तदा अस्याः घटनायाः प्रत्यक्षदर्शी परिव्राजकः देवशर्मा तत्रागत्य सर्वान् सत्यवृत्तान्तेन अवगतान् कुरुते । निर्दोषं नापितं च मुमोच । एवं स्त्रीणां कौटिल्यं, दुःशीलत्वं च ज्ञात्वा काञ्चनकामिनीनां मोहं त्यक्त्वा सः संन्यासी देवशर्मा पुनः स्वमठायतनं जगाम ।

अनेन वृत्तान्तेनायं बोधः प्राप्यते सुखमिच्छता पुरुषेण धनलोलुपत्वेन न भाव्यं तथा च दुष्टस्त्रीणाञ्च विश्वासो नैव कर्तव्यः इति ।

**॥ पञ्चतन्त्रस्य केचन श्लोकाः ॥**

**( 1 )** **न सा विद्या न तद्दानं न तच्छिल्पं न सा कला ।**

**न तत्स्थैर्यं हि धनिनां याचकैर्यन्न गीयते ॥**

**अन्वयः-** न, सा, विद्या, न, तत्, दानं, न, तत्, शिल्पं, न, सा, कला, न धनिनां, तत् स्थैर्यं, न, हि यत्, याचकैः, न, गीयते ।

**व्याख्या-** न सा विद्या - पूर्वोक्ता सा व्याकरणादिविद्या, शास्त्रं वा । न - नहि । तत् - पूर्वोक्तम् । दान - सत्पात्रे धनाद्यर्पणम् । न - नहि । तच्छिल्पं - शिल्पकला न- नहि । सा - पूर्ववर्णिता । कला - नामविशिष्टो गुणः । न धनिनां - नहि वित्तवताम् । स्थैर्यं - स्थायित्वम्, स्थितिः । याचकैः - भिक्षुकैः। न गीयते - न कीर्त्यते ।

**सरलार्थः-** अस्मिन् भूतले एतादृशी न काचित् विद्या न चैतादृशं दानं न तच्छिल्पं न तत् शौर्यं, शूरत्वं, स्थैर्यं वा यद्वर्णनं याचकगणैः धनिनां प्रशंसाकरणे न कृतं स्यादिति ।

**( 2 )** **यस्मिञ्जीवति जीवन्ति बहवः सोऽत्र जीवतु ।**

**वयांसि किं न कुर्वन्ति चञ्च्वा स्वोदरपूरणम् ॥**

**अन्वयः-** यस्मिन्, जीवति, बहवः जीवन्ति, सः अत्र जीवतु, वयांसि, चञ्च्वा, सोदरपूरणं किं न कुर्वन्ति ।

**व्याख्या-** यस्मिन् - यस्मिन् पुरुषे । जीवति - जीविते सति । बहवः - अनेके । जीवन्ति - जीवनं यापयन्ति । सः - पुण्यवान् नरः। अत्र - अस्मिन् स्थाने । जीवतु - जीवनं यापयतु । वयांसि - पक्षिणः, चञ्च्वा - मुखेन । सोदरपूरणम् - उदरपूर्तिम् । किं न कुर्वन्ति - किं वा न कुर्वते इति ।

**सरलार्थः-** पक्षी अपि स्वचञ्च्वा स्वोदरपूरणं करोत्येव । तज्जीवनस्य किं महत्त्वम् ? किं तेन जीवितेन इत्यर्थः । अस्मिन् जगति तेन जनेन दीर्घायुषा भवितव्यं यस्य जीवितेन अनेकेषां जीवनं चलतीति ।

**( 3 )** **सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति त्रयो जनाः ।**

**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।**

**अन्वयः-** शूरः, कृतविद्यः, यः सेवितुम् जानाति (एते) त्रयः, जनाः, सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति ।

**व्याख्या-** शूरः - वीरः । कृतविद्यः - पठितशास्त्रः । यः - पुमान् । सेवितुं - सेवां कर्तुम् । जानाति - वेत्ति । एतादृशाः जनाः - सुवर्णपुष्पितां - हेमपुष्पान्विताम् । पृथ्वीं - धराम् । विचिन्वन्ति - अधिकुर्वन्ति।

**सरलार्थः-** अस्मिन् युगे कः सफलो भवतीति वर्णयन्नाह शूरः, वीरः, कृतविद्यः, विद्वान् वा यश्च सेवां कर्तुं जानाति तादृशः चतुरः एते त्रय एव सुवर्णपुष्पैः पुष्पिताम् इमां पृथ्वीं स्वाधीनां कर्तुं शक्नुवन्तीति ।

**(4) यस्य यस्य हि यो भावस्तेन तेन समाचरन् ।**

**अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥**

**अन्वयः-** यस्य, यस्य, यः, भावः तेन, तेन, समाचरन्, मेधावी, अनुप्रविश्य, क्षिप्रम्, आत्मवशं नयेत् ।

**व्याख्या-** मेधावी - मतिमान् । भावः - स्वभावः । तेन - तेन तेन स्वभावेन । समाचरन् - वर्तयन् । अनुप्रविश्य - तस्य हृदि प्रविश्य स्वानुकूलं विधाय । क्षिप्रं - सत्वरम् । वशं नयेत् - प्रापयेदिति ।

**सरलार्थः-** यस्या व्यक्तेः यादृक् स्वभावो भवति तेन सह तथा प्रकारेण, तदनुकूलाचरणेन सः वशी भवति । अतः विद्वान् पुमान् स्वस्वामिनः अनुकूलाचरणेन सत्वरं तं वशमानयेदिति ।

**(5) अश्वः शास्त्रं शस्त्रं वीणा वाणी नरश्च नारी च ।**

**पुरुषविशेषप्राप्ताः भवन्त्ययोग्याश्च योग्याश्च ॥**

**अन्वयः-** अश्वः, शास्त्रं, शस्त्रं, वीणा, वाणी, नरः, नारी, च पुरुषविशेषप्राप्ताः, योग्याः अयोग्याः च भवन्ति ।

**व्याख्या-** अश्वः - घोटकः । शस्त्रं - आयुधम् । शास्त्रम् - वेदव्याकरणादिशास्त्रम् । वीणा - वाद्यम् । वाणी - वाक् । नरः - पुमान् । च - तथा । नारी - योषित् । पुरुषविशेष - जनविशेषम् । प्राप्ताः - सम्प्राप्ताः । एव योग्याः अयोग्याश्च भवन्ति ।

**सरलार्थः-** अश्वः, शस्त्रं, शास्त्रं, वीणा, वाणी, नरनार्यौ च इत्येते सर्वे पुरुषविशेषाश्रयेण हि योग्याः अयोग्याश्च भवन्ति । यदि योग्यपुरुषस्य तत्संगो भवेत् चेत् कुशलाः अयोग्यानाञ्च संसर्गे अयोग्या एव भविष्यन्तीति ।

**(6) षडक्षरेण मन्त्रेण पुष्पमेकमपि स्वयम् ।**

**लिङ्गस्य मूर्ध्नि यो दद्यान्न स भूयोऽभिजायते ॥**

**अन्वयः-** यः, षडक्षरेण मन्त्रेण, लिंगस्य, मूर्ध्नि, स्वयम्, एकम्, अपि, पुष्पं, दद्यात्, सः, भूयः, न, अभिजायते इति ।

**व्याख्या-** यः - कोऽपिभक्तः पुमान् वा । षडक्षरेण - ॐ नमः शिवायेति षडक्षरद्वारा । मन्त्रेण - वेदवाक्येन। लिंगस्य - शिवलिंगस्य । मूर्ध्नि - शिरसि । एकमपि पुष्पं - सुमनमेकम् । स्वयं - स्वात्मना । दद्यात् - अर्पयेदिति । सः - पूर्वोक्तः, भक्तः । भूयः - पुनः नाभिजायते - जन्मग्रहणं न कुरुते ।

**सरलार्थः-** कश्चिदपि जनः शिवभक्तो वा ॐ नमः शिवायेति षडक्षरमन्त्रमुच्चार्य एकेनापि पुष्पेण शिवलिंगं समर्चयति चेत् संसारावागमनात् स मुक्तो भवति । तस्य पुनर्जन्म न जायते इत्यर्थः ।

**(7) तृणानि भूमिरूदकं वाक्चतुर्थी च सूनृता ।**

**सतामेतानि हर्म्येषु नोच्छिद्यन्ते कदाचन ॥**

**अन्वयः-** तृणानि, भूमिः, उदकम्, चतुर्थी सूनृता वाक् एतानि सतां हर्म्येषु कदाचन न उच्छिद्यन्ते इति ।

**व्याख्या-** तृणानि - तृणासनम् । भूमिः - धरा । उदकम् - जलम् । सुनृतावाक् - सत्यावाणी। सतां - सज्जनानाम्। हर्म्येषु - गृहेषु । नोच्छिद्यन्ते - उच्छिन्नतां न गच्छन्ति ।

**सरलार्थः-** आस्तरणार्थमासनं विश्रामार्थं भूमिः पातुं, हस्तपादौ वा प्रक्षालयितुं जलं, सुनृता मधुरा वाक्, एतानि चत्वारि वस्तूनि सज्जनानां गृहात् कदापि नोच्छिद्यन्ते । एतैः चतुर्भिः सतां गृहे अतिथिसत्कारः भवत्येवेत्यर्थः ।

( 8 ) **आदित्यचन्द्रावनिलोऽनलश्च**

**द्यौर्भूमिरापो हृदयं यमश्च ।**

**अहश्च रात्रिश्च उभे च सन्ध्ये**

**धर्मश्च जानाति नरस्य वृत्तम् ।**

**अन्वयः-** आदित्यः, चन्द्रः, अनिलः, अनलः,द्यौः, भूमिः, आपः, हृदयं, यमः, अहः, रात्रिः, उभे, सन्ध्ये, धर्मः च, नरस्य, वृत्तम्, जानाति ।

**व्याख्या-** आदित्यः - सूर्यः । चन्द्रः - विधुः । अनिलः - पवनः । अनलः - अग्निः । द्यौः - गगनम् । भूमिः - अवनिः । आपः - जलम् । हृदयं - चेतः । यमः - अन्तकः । च - तथा । अहः - दिवसः । रात्रिः - निशा । च - तथा । उभे - द्वे । सन्ध्ये - प्रातःसायमिति । च - एवञ्च । धर्मः - वेदप्रतिपादितः धर्मः, धारयतीति - धर्मो वा । नस्य - मनुष्यस्य । वृत्तम् - चरित्रम् । जानाति - अवगच्छतीति ।

**सरलार्थः-** सूर्यः चन्द्रः, पवनः, अनलः, अन्तरिक्षम्, भूमिः- जलम्, हृदयम्, यमः, अहोरात्रम्, उभे च सन्ध्ये तथा धर्मः इत्येते सर्वे मनुष्यस्य कर्मणां साक्षिणो वर्तन्ते । मानवस्य योग्यायोग्यं कर्म जानन्तीत्यर्थः ।

( 9 ) **उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः**

**दैवेन देयमिति कापुरुषा वदन्ति ।**

**दैवं निहत्य कुरु पौरुषमात्मशक्त्या**

**यत्ने कृते यदि न सिद्धयति कोऽत्र दोषः ॥**

**अन्वयः-** लक्ष्मीः अत्र, सततम्, उद्योगिनं समेति, दैवेन, हि, दैवम्, इति, कापुरुषाः, वदन्ति, दैवं, निहत्य, आत्मशक्त्या पौरुषं कुरु यत्ने कृते सति यदि न सिद्धयति कः अत्र दोषः अस्ति ।

**व्याख्या-** लक्ष्मीः - कमला । अत्र - अस्मिन् स्थाने । सततं - नितराम् । उद्योगिनं - उद्यमशीलम् । समेति - उपैति । दैवेन - भाग्येन । हि - खलु । दैवं - पूर्वजन्मकृतं कर्मेति । इति - इत्थम् । कापुरुषाः - कातराः । वदन्ति - गदन्ति । यदि - यद्यपि । यत्ने कृते सति - पुरुषार्थे विहितेऽपि । न - नहि । सिद्धयति - सिद्धं भवति । कोऽत्रदोषः - कस्य वा अत्र दोषः ।

**सरलार्थः-** उद्योगशीलं पुरुषसिंहं वीरपुरुषं हि लक्ष्मीः प्राप्नोति । भाग्ये स्यात् चेदेव मिलिष्यतीति कापुरुषाः वदन्ति । अतः मानवः भाग्यस्याधारं त्यक्त्वा आत्मशक्त्यनुसारं पुरुषार्थं कुर्यात् । पुरुषार्थे कृते सत्यपि साफल्यं न लभ्यते चेत् सः पुमान् अकर्मण्यःन उच्चते । (मनुष्यः दैवाधारे मा तिष्ठन् उद्योगं कुर्वीत इत्यर्थः)

( 10 ) **उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।**

**अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥**

**अन्वयः-** यः उपकारिषु, साधु, तस्य, साधुत्वे, कः, गुणः, यः अपकारिषु साधुः सद्भिः स, साधुः उच्यते ।

**व्याख्या-** यः - यः कोऽपि । उपकारिषु - सत्कारिषु । साधुः - सज्जनः । तस्य- एतस्य । साधुत्वे - सज्जनत्वे। कः गुणः - किं वैशिष्ट्यम् । अपकारिषु - दुष्टेषु । यः - कश्चित् । साधुः - सज्जनः । सद्भिः- साधुपुरुषैः । सः- मनुष्यः । साधुः - सदाचारवान् । उच्यते - अभिधीयते ।

**सरलार्थः-** उपकारिणं जनं प्रति यः साधुः भवति तस्य साधुत्वे न किमपि वैशिष्ट्यम् अपितु यः अपकारिणं प्रति साधुः भवति तं सज्जनाः साधु इत्याहुः ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) पञ्चतन्त्रस्य वार्ताश्रवणं केभ्यः रोचते ?

(क) सर्वेभ्यः (ख) बालेभ्यः (ग) छात्रेभ्यः (घ) भक्तेभ्यः

(२) कवीनां निकषं किं वदन्ति ?

(क) पद्यम् (ख) गद्यम् (ग) काव्यम् (घ) मुक्तकम्

(३) विष्णुशर्मा कुत्र राजकुमारान् निपुणान् चकार ?

(क) धर्मशास्त्रे (ख) व्याकरणशास्त्रे (ग) नीतिशास्त्रे (घ) शिल्पशास्त्रे

(४) स्वजीवनविषये कः मौनं भजते ?

(क) राजा (ख) गुरुः (ग) छात्रः (घ) कविः

(५) अमरशक्तेः कियन्तः पुत्राः आसन् ?

(क) त्रयः (ख) चत्वारः (ग) पञ्च (घ) सप्त

(६) 'हटन' पञ्चतन्त्रस्य रचनां कुत्र मनुते ?

(क) उज्जयिन्याम् (ख) काश्याम् (ग) काश्मीरे (घ) हिमालये

(७) लक्ष्मीः कम् उपैति ?

(क) अनुद्योगिनम् (ख) उद्योगिनम् (ग) गृहोद्योगिनम् (घ) यन्त्रोद्योगिनम्

(८) नरस्य वृत्तं कः जानाति ?

(क) राजा (ख) ऋषिः (ग) धर्मः (घ) नीतिः

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) षडक्षरः मन्त्रः कः ?

(२) सुवर्णपुष्पितां पृथ्वीं कति जनाः विचिन्वन्ति ?

(३) साक्षात् शिवः कः ?

(४) वयांसि केन उदरं पूरयन्ति ?

(५) चतुर्भिः वस्तुभिः कुत्रातिथिः सत्क्रियते ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) संस्कृतसाहित्ये पञ्चतन्त्रस्य महत्त्वम्

(२) विष्णुशर्मा कथं पञ्चतन्त्रं रचयामास ?

(३) 'आषाढभूतिः' धनमवाप्तुं किं व्यचारयत् ।

(४) कस्य पुनर्जन्म कथं न जायते ?

(५) नरस्य वृत्तं के के जानन्ति ?

**४. प्रदत्तश्लोकानां पूर्तिः विधेया ।**

(१) सुवर्णपुष्पितां ................. ।

(२) आदित्यचन्द्र ............... ।

(३) उद्योगिनं पुरुष .................. ।

**५. अ विभागं ब विभागेन सह संयोजत ।**

| अ | ब |
|---|---|
| (१) विष्णुशर्मा | (१) राजनीतिकुशलः |
| (२) देवशर्मा | (२) सम्मतो न भवति |
| (३) चाणक्यः | (३) आह्वानं स्वीकृतवान् |
| (४) आषाढभूतिः | (४) देहि मे प्रतिवचनम् |
| (५) कीथः | (५) धनमादाय पलायितः |

**छात्रप्रवृत्तिः**

- छात्राः जीवनोपयोगि नीतिसाहित्यं पठन्तु ।

**शिक्षकप्रवृत्तिः**

- पञ्चतन्त्रोपयोगितां छात्रेभ्यः कथयतु ।

●

# १९ महाकविः भर्तृहरिः

**प्रस्तावना**

संस्कृतसाहित्ये इदं दुःखास्पदमस्ति यत् कश्चिदपि कविः साहित्यसर्जको वा स्वस्य ग्रन्थे स्वस्मिन् विषये यथा जन्मस्थलम्, मातापितरौ, कार्यकालः, अध्ययन-अध्यापनं इत्येतेषु सन्दर्भेषु किञ्चिदपि नैव प्रतिपादयतीति । एतादृश्यां स्थित्यां लोककथाऽऽधारेण किंवा अनुमानेन, दन्तकथामाश्रित्य च आत्मसंतोषः मन्तव्यो भवति ।

---

**महाकविः भर्तृहरिः**

महाकवेः राजर्षेः भर्तृहरेः विषयेऽपि एतादृशी एव काचित् स्थितिः वर्तते । परं तथापि बलवत्प्रमाणयुतं विवरणं प्राप्तं भवेत् तथा प्रयतिष्यामहे । असौ कविः विक्रमादित्यस्य ज्येष्ठो भ्राता आसीत् । येन खलु चतुश्चत्वारिंशदुत्तरषट्शततमे (644) क्रैस्ताब्दे कहरुरमहारणे हूणाः पराजिताः तदा तु अस्य स्थितिकालोऽपि क्वचित् षट्शताब्द्या उत्तरचरणे एव निर्धारयितुं पार्यते । लोककथानुसारं महतः हठयोगिनः मत्स्येन्द्रनाथस्य एवञ्च गोरखनाथस्य कार्यकाले भर्तृहरिः अजायत इत्यपि केचन वदन्तीति ।

ये तु केचन भर्तृहरिं बौद्धमतावलम्बिनं मन्यन्ते । परं न तत्युक्तियुक्तं यतो हि अस्य रचनासु क्वचिदपि तादृशबौद्ध-धर्मपरकं पद्यमेकमपि न दृग्गोचरी भवति । येन तस्य बौद्धमतावलम्बित्वं न सिद्ध्यति । अपितु तस्य भारतीयपरम्परानुग्रही-तानि नैकानि मतानि उपलभ्यन्ते । कविवरस्यास्य मातुः नाम सुशीला पितुश्चाभिधानं वीरसेन इत्यासीत् । तत्पत्न्याः नाम पद्माक्षीति मन्यते परं पिंगला इत्यनेन उपनाम्ना सा ख्यातिमभजत् । लोकवार्तायामपि पिंगलायाः नाम बलवत्तरं सर्वत्र श्रूयते । भर्तृहरिरपि लोकगीतेषु ''राजाभरथरीति'' नाम्ना लोकैः अज्ञायत । कविवरोऽयम् उज्जयिन्यां राज्यमकरोत् । तज्जन्म अपि उज्जयिन्यां विक्रमादित्येन साकं सम्बन्धत्वात् अनुमीयते ।

भर्तृहरेः कृतित्वेन त्रीणि शतकानि नीतिशतकम्, वैराग्यशतकम्, शृङ्गारशतकमिति शतकत्रयम् अत्यन्तमुत्कृष्टम्, काव्य कलालङ्कृतम्, प्रसादादिगुणगुम्फितम्, सन्मार्गदर्शकं बोधप्रदञ्चास्ति । पिंगलायाः प्रेमविश्वासघातात् खिन्नो भूत्वा राज्यं संसारं त्यक्त्वा गृहात् निर्गतः तदैव कविश्रेष्ठेन अनेन नीतिवैराग्यशतके विरचिते स्यातामिति केचन विद्वांसः आमनन्ति। व्याकरणशास्त्रे वाक्यपदीयग्रन्थस्यापि कर्तृत्वेन मनीषिभिः तन्नामैव सादरं गृह्यते । अन्यच्च द्वाविंशतिसर्गोपेतं भट्टिकाव्यमपि अस्यैव रचनास्तीति केचन अङ्गीकुर्वन्ति परं विदुषां मतैक्यं सन्दर्भेऽस्मिन् नास्ति ।

**नीतिशतके** - नीति-रीति-सदाचरणं-धैर्यं, शौर्यं-साहसौदार्यं - परोपकाराद्यनेकसदुपदेशपुरःसरानि पद्यानि सुललित-मधुरभाषया समलङ्कृतानि देदीप्यन्ते ।

**वैराग्यशतके** - भोगविलासादीन्द्रियसुखानां नश्वरताप्रदर्शकानि सामान्यरूपेण छलछद्मगर्भितस्यास्य जगतः क्षणभङ्गुरस्य स्वरूपप्रतिपादकानि विविधच्छन्दोबद्धानि पद्यानि लसन्ति ।

भर्तृहरेः शैली तु प्रासादिकी, सरसा - सरला - परिष्कृता भाषा प्रायः वैदर्भीमेवायं लिखितवान् । भर्तृहरेः रचनासु वर्ण्यविषयाणां रोचिष्णुता, छन्दसां वैविध्यम्, सूक्तीनाम् अनुपमं सौन्दर्यम्, हृदयस्पर्शिणी च वाणी एव एतस्य लोकप्रियत्वे हेतुः ।

नीतिशतकस्य सूक्तयः हृदयङ्गमत्वात् बहुधा सर्वत्र आभणितिरूपेण प्रचलिताः सन्ति तद्यथा -

सत्सङ्गतिःकथय किन्न करोति पुंसाम्, प्रारब्धमुत्तमजना न परित्यजन्ति, मूर्खस्य नास्त्यौषधम्, शीलं परं भूषणम्, सर्वे गुणाः काञ्चनमाश्रयन्ति, न्यायात्पथः प्रविचलन्ति पदं न धीराः, मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्, न निश्चितार्थाद्विरमन्ति धीराः इत्याद्याः सूक्तयः अद्यापि विबुधजनकण्ठाभरणभूताः श्रूयन्ते ।

शृङ्गरशतकेऽपि कविना शृंगारकलायां सुन्दर्यः किं किं न आचरन्ति इति अतीव चारुतया मधुरपद्यैः वर्णितम्, तद्यथा-

1. **कुङ्कमपङ्ककलङ्कितदेहा गौरपयोधरकम्पितहारा ।**
**नूपुरहंसरणत्पदपद्मा कं न वशं कुरुते भुवि रामा ॥**

2. **मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदा हरन्तु ।**
**सेव्या नितम्बाः किमु भूधराणामुतस्मर स्मेर विलासिनीनाम् ॥**

3. **मत्तेभकुम्भदलने भुवि सन्ति शूराः**
**केचित्प्रचण्डमृगराजवधेऽपि दक्षाः ।**
**किन्तु ब्रवीमि बलिनां पुरतः प्रसह्य**
**कन्दर्पदर्पदलने विरलाः मनुष्याः ॥**

किञ्च वैराग्यसन्दर्भेऽपि –

**न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये**
**स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।**
**नारी पीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितम्**
**मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥**

4. **यत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो**
**निस्तीर्णः सरितां पतिः नृपतयो यत्नेन सन्तोषिताः ।**
**मन्त्राराधनतत्परेण मनसा नीताः स्मशाने निशाः**
**प्राप्तः काणवराटकोऽपि न मया तृष्णेऽधुना मुञ्च माम् ॥**

वैराग्यशतकं तु कविरस्यास्य तृतीया रचनास्ति । यं कमपि विषयं गृहीत्वा असौ उट्टङ्कयति तत्सर्वं चित्राङ्कितमिव जायते । संसारस्य विषमतां दर्शयन् वर्णयति यथा –

**क्वचिद्वीणावाद्यं क्वचिदपि च हाहेति रूदितम्**
**क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः ।**
**क्वचिद्रामा रम्याः क्वचिदपि गलत्कुण्ठवपुषो**
**न जाने संसारः किममृतमयः किं च विषमयः ॥**

काव्यप्रतिभायाः दार्शनिकतया सह यादृशः अनन्यः प्रसङ्गः अत्र दृश्यते न तादृशः क्वचिदन्यत्र साहित्ये लभ्यते। वैराग्यशतकस्य सूक्तयोऽपि नितरां चेतोहराः, दृश्यताम् तावत् ।

1. पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ।
2. तृष्णा न जीर्णा वयमेव जीर्णाः ।
3. मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ।
4. सन्दीप्ते भुवने तु कूपखननं प्रत्युद्यमः कीदृशः ।

भर्तृहरेः शतकत्रयमपि गुणरीत्यलङ्काराणाञ्च वैविध्ययुक्तं, सरसत्वं च कथावस्तु पाठकानां काव्यरसिकानां वा चेतो हरते । अत्र शतकत्रयेषु श्लोकसंख्यायां कुत्रचित् प्रक्षिप्तरूपेण वर्धिताः अतिरिक्तश्लोका अपि दृष्टिपथमायान्ति । येन वास्तिवकतया मूलपाठनिर्धारणं खलु कष्टसाध्यं जातमस्ति । राजर्षेः भर्तृहरेः सर्वाः अपि कृतयः स्वस्वस्थाने अद्वितीयाः सरसाः सरलाः पाठकचित्ताकर्षकाश्च सन्ति । न तत्र मनागपि शंकावलेशः । यथा एतस्य वाक्यपदीयस्य काण्डत्रयं वैयाकरणानां कृते परमादर्शभूतमस्ति तथैव त्रीणि शतकान्यपि काव्यजगति राराजन्ते ।

नीतिशतकं खलु मुक्तकशैल्यां निबद्धमस्ति । कविना अत्र कुत्रचित् बोधोऽपि दत्तोऽस्ति कुत्रचिच्च दृष्टान्तद्वारा चित्रमुद्भाषितमस्ति । मूर्खाणाम् अवहेलना, दुर्जननिन्दा, सज्जनप्रशंसा, विद्याप्रशस्तिः भाग्यस्य भवितव्यता, कर्मणः प्राबल्यम्, मैत्र्याः महत्त्वम्, सद्गुणानां गौरवम्, धनप्रशंसा इत्येते विषयाः अद्यापि वास्तविकतायाः प्रतीतिकराः सन्ति ।

भर्तृहरेः जीवनविषयेऽपि बहव्यः दन्तकथाः कर्णोपकर्णद्वारा श्रवणपथमागच्छन्ति । तदनुसारं कविवरोऽयं मालवाप्रदेशे क्षत्रियवर्णे च जन्मालभत । तज्जन्म राजकुले जातम् । कस्यचित् गन्धर्वसेनस्य द्वे स्त्रियौ अवर्तताम् । एकस्याः भर्तृहरिः

अपरायाश्च विक्रमादित्यः जातः । धारानरेशस्य स्वस्य न कश्चिदपि पुत्रः अतः सः विक्रमादित्येन सह भर्तृहरिमपि स्वगृहे संस्थाप्य नैकगुरुभिः धर्मशास्त्रम्, नीतिशास्त्रम्, धर्नुविद्यां सङ्गीतादिविषयान् पाठयामास । सः स्वदौहित्राय विक्रमादित्याय स्वराज्यं दातुं व्यचारयत् परं ज्येष्ठभ्रातरि विद्यमाने सति इमं प्रस्तावं नाङ्गीकृतवान् अपितु भर्तृहरिं भूपं विभाव्य स्वयं च मन्त्री सन् तस्मै राज्यशासनाय साहाय्यं चकार ।

ततो दिनेषु गच्छत्सु सत्सु मालवराजधानी धारानगरी परिवर्त्य उज्जयिनी अभवत् । राजसत्तामासाद्य भर्तृहरिः तथा विषयासक्तः जातः यदहर्निशमन्तःपुरे न्यवसत् । विक्रमादित्यस्य बोधपूर्वकं वारणेनापि नामन्यत । विशेषानुरोधेन रुष्टः प्रियतमायाः कथनेन विक्रमादित्यं मन्त्रिपदात् अपाकृत्य राज्याच्च निष्कासितवान् । अन्ते च तस्मिन् गते सति भृशं दुःखमवाप ।

अनन्तरं तदपि श्रूयते यदेतस्मै भर्तृहरये कश्चित् ब्राह्मणः मुदितः सन् दिव्यमेकममरफलं ददौ । फलमिदं राजा स्वयं न भुक्त्वा प्राणेभ्योऽपि अधिकप्रियायै स्वपत्न्यै दत्तवान् । सा अपि स्वस्य कस्मैचित् प्रेमिणे दत्तवती । सोऽपि तत्फलं स्वप्रियतमायै अयच्छत् । साऽपि उत्तमं फलमिदं स्वयं न खादन्ती नृपतये भर्तृहरये दत्तवती । पुनश्च फलमिदं लब्ध्वा साश्चर्यं रहस्यं ज्ञात्वा भृशं दुःखितो भवन् विलपन् इत्थमाह –

**यां चिन्तयामि सततं मयि सा विरक्ता**
**साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।**
**अस्मत्कृते च परितुष्यति काचिदन्या**
**धिक् तां च तं च मदनं च इमां च मां च ॥**

प्रसङ्गेनानेन विरक्तो भूत्वा राज्यं संसारं च त्यक्त्वा परिव्राजकोऽभूत् ।

तद्विषये अन्यदपि श्रूयते – अथैकदा अयं राजा भर्तृहरिः मृगयायै अरण्यं गतः तत्र चायमवालोकयत् यदेकः व्याधः स्वबाणेन मृगं जघान । स्वयं च सर्पदंशेन कालकवलीभूतः । अनन्तरं मृगी ज्ञात्वेदं स्वदेहं पपात प्राणान् च तत्याज । व्याधस्य पत्न्यपि चितायां पतित्वा मृत्युं गता । सर्वमिदं दृश्यं दृष्ट्वा राजा परमम् आश्चर्यमवाप । वनात् परावर्त्य राजभवनमुपागत्य हृदयविदारकां घटनामिमां प्रियायै पिंगलायै शुश्राव । तत्प्रियापि सन्दर्भेऽस्मिन् महत्त्वमधिकं ददती उक्तवती पतिव्रतायाः कृते अग्निचितायाः आवश्यकता न भवति सा तु स्वस्वामिनि मृते सति असून् त्यजत्येव ।

पिंगलायाः कथने राजा विश्वासं नाकरोत् अतः सः परीक्षितुं मतिमकरोत् । कियत् काले गते सति राजाऽसौ पुनःमृगयायै वनं ययौ । तत्र च स्ववस्त्राणि रक्तरञ्जितानि कृत्वा अनुचरैः पिंगलां प्रति प्रेषितवान् । रुधिराक्तानि वसनानि यच्छन्तः सेवकाः सिंहेन साकं युध्यन् राजा निधनमुपगतेति ऊचुः । हृदयभेदकं वृत्तान्तं श्रुत्वा वस्त्राणि भूमौ निधाय शिरसा प्रणिपत्य च प्राणान् अत्यजत् । अनन्तरं पिंगलायाः मृत्योः समाचारं ज्ञात्वा सरोषं दुःखमापन्नः राजभवनं त्यक्त्वा गोरखनाथसकाशात् योगदीक्षां लब्ध्वा योगसाधनां कुर्वन् देहं त्यक्त्वा भगवति लीनोऽभूत् ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) भर्तृहरिः कस्य ज्येष्ठो भ्राता आसीत् ?

(क) चन्द्रगुप्तस्य (ख) विक्रमादित्यस्य (ग) चाणक्यस्य (घ) भोजस्य

(२) कहरूरमहारणे हूणाः कदा पराजिताः ?

(क) 644 (ख) 677 (ग) 690 (घ) 618

(३) केचन भर्तृहरिं किं मतावलम्बिनं मन्यन्ते ?

(क) जैन (ख) सिक्ख (ग) बौद्ध (घ) हिन्दु

(४) भर्तृहरिः कुत्र राज्यमकरोत् ?

(क) काश्मीरे (ख) मथुरायाम् (ग) द्वारकायाम् (घ) उज्जयिन्याम्

(५) वाक्यपदीयः कस्य शास्त्रस्य ग्रन्थोऽस्ति ?

(क) व्याकरण (ख) साहित्य (ग) न्याय (घ) धर्म

(६) भर्तृहरेः जन्म कस्मिन् कुले जातम् ?

(क) धर्मकुले (ख) राजकुले (ग) ऋषिकुले (घ) देवकुले

(७) मुदितः ब्राह्मणः कस्मै फलं ददौ ?

(क) विक्रमाय (ख) चन्द्रगुप्ताय (ग) भर्तृहरये (घ) मुनये

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) कविवरोऽयं कस्मिन् वर्णे जन्मालभत ?

(२) सर्पदंशेन कः कालकवलीभूतः ?

(३) 'पिंगला' कस्य पत्न्यासीत् ?

(४) भर्तृहरिः कस्य सकाशात् दीक्षां लेभे ?

(५) जगतः क्षणभङ्गुरत्वं कुत्र वर्णितम् ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) संस्कृतसाहित्ये दुःखास्पदं किम् ? कथञ्च ?

(२) नीतिशतकस्य सूक्तीनां निरूपणं कुरुत ।

(३) पिंगला स्वप्राणान् कथमत्यजत् ?

(४) दिव्यममरफलं पुनः राजसमीपं कथमागतम् ?

**४. टिप्पणी लेख्या ।**

(१) भर्तृहरिः

(२) नीतिशतकम्

(३) वैराग्यशतकम्

**५. अ विभागं ब विभागेन सह संयोजयत ।**

| अ | ब |
|---|---|
| (१) व्याकरणशास्त्रम् | (१) प्रचलिताः सन्ति |
| (२) नीतिशतकस्य सूक्तयः | (२) सरसा-सरला |
| (३) भर्तृहरेः शैली | (३) वाक्यपदीयः |
| (४) मुदितः ब्राह्मणः | (४) वयमेव जीर्णाः |
| (५) तृष्णा न जीर्णा | (५) अमरफलं ददौ |

**छात्रप्रवृत्तिः**

- शतकत्रयस्य सारं जानीयुः ।

**शिक्षकप्रवृत्तिः**

- सूक्तिविश्लेषणं कुर्यात् ।

●

# २० नीतिशतकम्

**प्रस्तावना**

राजर्षिः भर्तृहरिः नीतिशतकं नाम ग्रन्थरत्नमद्वितीयं बोधप्रदं विरच्य समाजाय उत्तमम् उपहारं ददौ । अत्र नीतिप्रधानाः शताधिकं श्लोकाः दरीदृश्यन्ते । तथा च प्रत्येकस्मिन् पद्ये नैतिकताया उल्लेखः दृश्यते । यस्मिन् योगिराजेन भर्तृहरिणा लौकिकव्यवहारज्ञानस्य स्वाभाविकशब्देषु सूक्ष्मविवेचनं कृत्वा उत्तमोत्तमोपदेशः दत्तोऽस्ति ।

हृदयग्राहिवर्णनम् अत्र कृतमस्ति कविवर्येणानेन । कमपि एकं विषयमादाय किं वा एकमेव कथावस्तु लक्षीकृत्य शतकमिदं न प्रोक्तम् अपितु अस्माकं दैनन्दिनजीवने उपकारकाः विविधाः विषयाः निबद्धाः सन्ति । कविवरोऽयं भर्तृहरिः नीतिशतकस्य पद्येषु विद्यायाः प्रशंसा, चाटुकारितायाः स्वभावः विवेकहीनस्य पुरुषस्य पतनम्, सत्सङ्गतिः, शीलम्, सदाचारादीन् नैकविषयान् प्रभावोत्पादकान् वर्णयामास । तदतिरिक्तमपि नीतिः-रीतिः सदाचरणम्-धैर्यम्-शौर्यं - साहसौदार्यम् परोपकाराद्यनेकसदुपदेशपुरःसरानि पद्यानि सुललितमधुरभाषया समलंकृतानि नीतिशतके कविना निबद्धानि सन्ति ।

इत्थं नीतिशतके उपदिष्टा नीतिः अनुभवजन्योपदेशस्य वास्तविकमुदाहरणं मानवमात्रस्य श्रेयसे अत्युपयुक्तमस्ति । संस्कृतसाहित्ये यानि पद्यानि उपदेशात्मकसाहित्यरूपेण दृष्टिपथमायान्ति तत्र नीतिशतकस्य नाम महत्त्वपूर्णं गण्यते । विविधवृत्तैः निबद्धं गुणरीत्यलंकाराणाञ्च वैविध्यं पाठकान् प्रत्याकर्षणं जनयति । भर्तृहरेः काव्यकलापि अनुपमास्ति, शैल्याः रोचकता, भावानाम् औदार्यम्, शब्दविन्यासः, उक्तिवैचित्र्यादिभिः नीतिशतकं नूनं संस्कृतवाङ्मये राराजते ।

एतादृशस्य ग्रन्थस्यास्य कांश्चन श्लोकान् पाठेऽस्मिन् पठिष्यामः ।

---

(1) **बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।**
**अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥**

**अन्वयः-** बोद्धारः मत्सरग्रस्ताः प्रभवः स्मयदूषिताः अन्ये च अबोधोपहताः (सन्ति तस्मात्) सुभाषितम् अङ्गे जीर्णम्।

**व्याख्या-** बोद्धारः - विद्वांसः । मत्सरग्रस्ताः - असूयया । ग्रस्ताः - समाक्रान्ताः । प्रभवः - नृपाः । स्मयदूषिताः - गर्वेण दूषिताः । अन्ये च - उक्तोभयव्यतिरिक्ताः जनाः । अबोधोपहताः - अबोधेन अज्ञानेनोपहताः । अतः सुभाषितं - साधुभाषणम् । अङ्गे - वक्तुरन्तरङ्गे । जीर्णम् - अन्तर्हितम् जातमित्यर्थः ।

**सरलार्थः-** विद्वांसः मत्सरग्रस्ताः सन्ति एवञ्च नृपाः गर्वेण मत्ताः सम्भूताः सन्ति, अन्ये साधारणाः जनाः अज्ञानेनोपहताः वर्तन्ते । अतः सुभाषितं वक्तुः कलेवरे एव जीर्णं जातमिति ।

(2) **शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरं**
**महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।**
**अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा**
**विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥**

**अन्वयः-** इयं गङ्गा स्वर्गात् शार्वं शिरः पशुपतिशिरस्तः क्षितिधरम् उत्तुङ्गात् महीध्रात् अवनिम् अपि च अवनेः जलधिम् (एवम्) अधः अधः स्तोकं पदम् उपगता । अथवा विवेकभ्रष्टानां विनिपातः शतमुखः भवति ।

**व्याख्या-** इयं गङ्गा - भागीरथी । पूर्वं स्वर्गात् - तन्नाम लोकात् । शार्वम् - शर्वस्येदं शार्वम्- शिवसम्बन्धि । शिरः - मस्तकम् । उपगता - ततश्च पशुपतिशिरस्तः - शङ्करमस्तकात् । क्षितिधरं - हिमालयं नाम उपगता । उत्तुङ्गात् - अत्युच्चात् । महीध्रात् - हिमालयपर्वतात् । अवनिम् - पृथिवीम् उपगता । अपि च अवनेः - पृथिवीतः । जलधिं - समुद्रम् उपगता । एवं क्रमेण अधोऽधः - नीचैः नीचैः । स्तोकम् - अल्पम् । पदं - स्थानम् । उपगता - प्राप्ता । अथवा - युक्तमेव, पक्षान्तरे वा विवेकभ्रष्टानां - सद्विचारच्युतानां जनानाम् । विनिपातः - अवनतिः । शतमुखः - बहुप्रकारः, अनेकद्वारः । भवति - जायते ।

**सरलार्थः-** यथा इयं गङ्गा उच्चतमात् स्वर्गात् अधः पतिता क्रमेण शङ्करमस्तकं शङ्करमस्तकात् हिमालयं हिमालयात् च पृथिवीं पतन्ती समुद्रं समागता तथैव विवेकशून्यानां पुरुषाणां पतनम् इत्थमेव भवति । अतः मानवेन विवेकशीलेन भवितव्यम् अन्यथा तस्य बहुप्रकारेण पतनं भवेदित्यर्थः ।

**( 3 )** **येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।**
**ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥**

**अन्वयः-** येषां विद्या न, तपो न, दानं न, ज्ञानं न, शीलं न गुणो न, धर्मो न (अस्ति) ते मर्त्यलोके भुवि भारभूताः (सन्तः) मनुष्यरूपेण मृगाः चरन्ति ।

**व्याख्या-** येषां - मानवानाम् । विद्या - व्याकरणसाहित्यादिज्ञानम् । न - नैव अस्ति । तपः - कायक्लेशकरं चान्द्रायणादिकं व्रतम् । न - नास्ति । दानं - सत्पात्रे धनाद्यर्पणम् । न - नास्ति । ज्ञानं - सदसद्वि-वेकः । न - नास्ति । शीलं - सदाचरणम् । न - नास्ति । गुणः - दयादाक्षिण्यादिधर्मः न नास्ति। धर्मः - वेदप्रतिपादितकर्तव्यविशेषः । न - नास्ति । ते - मनुष्याः । मर्त्यलोके - मृत्युलोके । भुवि - पृथिव्याम् । भारभूताः - भारस्वरूपाः । मनुष्यरूपेण - नराकारेण । मृगाः - हरिणाः । चरन्ति - विचरन्ति ।

**सरलार्थः-** येषां समीपे विद्या, तपः, ज्ञानम्, दानम्, चारित्र्यम्, किंवा सद्गुणः, धर्मश्च नास्ति ते मृत्युलोकेऽस्मिन् भाररूपाः सन्तः मनुष्यरूपेण पशव एवावगन्तव्याः । ते खलु स्वकीयभारेण पृथिव्यै केवलं कष्टमेव ददते । तेषां जीवनं मर्त्यलोके व्यर्थमेवास्तीति तात्पर्यम्।

**( 4 )** **हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा-**
**ऽप्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।**
**कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं**
**येषां तान्प्रतिमानमुज्झतनृपाः कस्तैः सह स्पर्धते ॥**

**अन्वयः-** यत् (विद्याख्यं धनम्) हर्तुः गोचरं न याति, सर्वदा किमपि शं पुष्णाति, अर्थिभ्यः अनिशं प्रतिपाद्यमानम् अपि परां वृद्धिं प्राप्नोति, कल्पान्तेषु अपि निधनं न प्रयाति, तत् विद्याख्यम् अन्तर्धनं येषां (समीपे वर्तते) तान् प्रति हे नृपाः । मानम् उज्झत, तैः सह कः स्पर्धेत ।

**व्याख्या-** यत् - विद्याख्यं धनम् । हर्तुः - अपहरणकर्तुः । गोचरं न याति - दृष्टिगतं न भवति । तथा सर्वदा - सर्वस्मिन् काले । शं - कल्याणम् । पुष्णाति - वर्धयति । अर्थिभ्यः - विद्यार्थिभ्यः ग्राहकेभ्यः। अनिशम् - निरन्तरम् । प्रतिपाद्यमानमपि - व्याख्यायमानमपि । पराम्- महतीम् । वृद्धिम् - उन्नतिम्। प्राप्नोति - लभते । कल्पान्तेष्वपि - प्रलयकालेष्वपि । निधनम् - नाशम् । न प्रयाति - न नश्यति। तत् - प्रसिद्धम् । विद्याख्यम् - विद्यानामकम् । अन्तर्धनम् - आन्तरिकं गुप्तं धनम् । येषां - विदुषाम्। समीपे - पार्श्वे वर्तते । तान् प्रति - तेषां विदुषां विषये । हे नृपाः - हे भूपाः। मानम्-गर्वम् । उज्झत - त्यजत । तैः - विद्वद्भिः । सह - साकम् । कः - कः पुमान् । स्पर्धेत - स्पर्धां कुर्यात्। अतस्ते गौरवदानेन बहुमाननीयाः ।

**सरलार्थः-** विद्याधनं खलु सर्वतो विलक्षणं वर्तते । तत् हर्तुः दृष्टिपथं नायाति, सर्वदा कल्याणं वर्धयति, वाचकेन सततं व्याख्यायमानमपि महतीं वृद्धिं याति, प्रलयकालेष्वपि न नश्यति तत् विद्यानामकं धनं येषां विदुषां पार्श्वे वर्तते । तान् प्रति हे राजानः ! गर्वं त्यजत, तैः सह कः स्पर्धां कुर्यात् । अत एतेन धनेन धनवन्तः विद्वांसः नृपैः सर्वदा संरक्षणीयाः, प्रोत्साहनीयाः धनमानादिना नूनं सन्तोष्टव्याः न कदापि अवमन्तव्याः इति।

**( 5 )** **केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला**
**न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।**
**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥**

**अन्वयः-** न केयूराणि न चन्द्रोज्ज्वला हाराः न स्नानं न विलेपनं, न कुसुमं, न अलङ्कृताः मूर्धजाः, पुरुषं विभूषयन्ति, या संस्कृता धार्यते सा एका वाणी पुरुषं समलङ्करोति अखिलभूषणानि क्षीयन्ते । वाग्भूषणं सततं भूषणं (भवति) ।

**व्याख्या-** केयूराणि – बाहुभूषणानि । अङ्गानि न भूषयन्ति – नालंकुर्वन्ति । चन्द्रोज्ज्वलाः – चन्द्रवद्धवलाः प्रकाशमानाः । हाराः – स्त्रजः । स्नानम् – अवगाहनम् । विलेपनम् – चन्दनादिविलिम्प्यमानं द्रव्यम् । न कुसुमम् – पुष्पं नु । अलङ्कृताः– प्रसाधिताः । मूर्धजाः – केशाः । वा पुरुषम् – मनुष्यम् । न भूषयन्ति – नालर्वन्ति । या संस्कृता – व्याकरणादिपरिशुद्धा । धार्यते – मुखे स्थाप्यते । सा एका – केवला । वाणी – वाक्, पुरुषं समलङ्करोति । अखिलभूषणानि – सकलालङ्काराः । क्षीयन्ते – कालक्रमेण नश्यन्ति । किन्तु वाग्भूषणम् – वागलङ्कारः । सततम् – निरन्तरम् । भूषणम् – अलङ्कारो भवति ।

**सरलार्थः-** बाहुभूषणानि चन्द्रसदृशाः धवलाः हाराः, स्नानम् लेपमानद्रव्याणि, कुसुमम्, प्रसाधिताः केशाः वा पुरुषं न भूषयन्ति । यद्यपि केयूरादिकं भूषणं शरीरशोभां वधर्यत्येव परं तथापि तेन सर्वेषां पुंसां स्थिरं, शाश्वतं सौन्दर्यं न भवति । किन्तु व्याकरणादिना परिष्कृता विशुद्धा वाणी एव सार्वकालिकं सौन्दर्यं जनयति । अतः सा वाणी एव सम्पादनीया ।

**( 6 )** **दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने**
**प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् ।**
**शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥**

**अन्वयः-** स्वजने दाक्षिण्यं, परिजने दया, दुर्जने सदा शाठ्यम्, साधुजने प्रीतिः, नृपजने नयः, विद्वज्जने आर्जवम्, शत्रुजने शौर्यम्, गुरुजने क्षमा, कान्ताजने धृष्टता, (उचिता) एवं कलासु ये पुरुषाः निपुणाः (सन्ति) तेषु एव लोकस्थितिः (अस्ति)

**व्याख्या-** स्वजने – बन्धुजने । दाक्षिण्यम् – औदार्यम् । परिजने – सेवकवर्गे । दया – कृपा । दुर्जने – दुष्टे जने । शाठ्यं – वञ्चकत्वम् । साधुजने – सज्जने । प्रीतिः – प्रेम । नृपजने – भूपजने । नयः – नीतिः । विद्वज्जने – पण्डितेषु । आर्जवं – सरलता । शत्रुजने – वैरिषु शौर्यम् । गुरुजने – पूज्येषु। क्षमा – सहनशीलता । कान्ताजने – स्त्रीषु । धृष्टता – प्रगल्भता । एवमनेन रूपेण, ये पुरुषाः – ये जनाः । कलासु – उक्तविद्यासु । निपुणाः – कुशलाः सन्ति । तेषु – पुरुषेष्वेव । लोकस्थितिः – संसारस्य स्थितिः वर्तते ।

**सरलार्थः-** स्वपुत्रकलत्रादिसम्बन्धिजनान् प्रति सौजन्यम्, औदार्यम्, सेवकान् प्रति दया, दुर्जनैः सह दुष्टता, सज्जनेषु प्रेम, राजपुरुषेषु नीतिः, विद्वज्जनं प्रति विनम्रता, शत्रुभिः सह शौर्यम्, गुरुजनैः साकं क्षमा, नारीजने धूर्तता, इत्येव प्रकारकासु कलासु ये लोकाः कुशलाः सन्ति तेषामाधारेण एव लोकव्यवहारः अवस्थितोऽस्ति ।

**( 7 )** **जातिर्यातु रसातलं गुणगणैस्तत्राप्यधो गम्यतां**
**शीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना ।**
**शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं**
**येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥**

**अन्वयेः-** जातिः रसातलं यातु गुणगणैः तत्र अपि अधः गम्यताम्, शीलं शैलतटात् पततु, अभिजनः वह्निना सन्दह्यताम्, वैरिणि शौर्ये आशु व्रजं निपततु अर्थः न केवलम् अस्तु एकेन येन विना इमे समस्ता गुणाः तृणलवप्रायाः (भवन्ति) ।

**व्याख्या-** जातिः – ब्राह्मणक्षत्रियादिः । रसातलं – अधोलोकं पातालम् । यातु – गच्छतु । गुणगणैः – धैर्योदार्यगाम्भीर्यादीनाम् । गणाः – समूहाः गुणगणाः तैः गुणगणैः । तत्रापि – ततोऽपि, रसातलादपि । अधः – पाताललोके । गम्यताम् – प्रयाणं क्रियताम्। शीलं – चारित्र्यम् । शैलतटात् – पर्वतप्रान्तभागात्

। पततु – भ्रश्यतु । अभिजनः – कुलम् । वह्निना – पावकेन । सन्दह्यताम् – भस्मीक्रियताम् । वैरिणि – शत्रौ। शौर्ये – पराक्रमे । आशु – सत्वरम् । व्रजम् – कुलिशम् । पततु – निपततु । अर्थः – धनम् । नः – अस्माकम् । केवलं – वित्तमेव । अस्तु – वर्तताम् । एकेन – अद्वितीयेन । येन– धनेन । विना – अन्तरेण । इमे – पूर्वोक्ताः जात्यादयः । समस्ताः – सकलाः गुणाः – तृणलवप्रायाः तृणस्य लेशेन सदृशाः तुच्छाः, जातिकुलशीलाभिमानादयः तृणवन्निःसाराः भवन्ति ।

**सरलार्थः-** जातिः रसातलं गच्छतु, धैर्यौदार्यगाम्भीर्यादीनां सद्गुणानां समूहः ततोऽपि अधो गम्यतां, चारित्र्यं पर्वत–प्रान्तभागात् निपतेत्, अभिजनः अग्निना दह्यतां शत्रुस्वरूपशौर्ये आशु वज्रपातो भवेत् चेदपि किंवा सर्वमिदं नष्टं भवेत् परं केवलं धनमेव वर्ततां येन विना प्रायः सर्वे गुणाः जातकुलशीलाभिमानादयः तृणवन्निःसाराः जायन्ते । वित्तस्यैवास्ति प्राधान्यं सर्वत्र इत्यर्थः ।

**( ८ )** **दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात् सुतो लालनात्**
**विप्रोऽनध्ययनात् कुलं कुतनयाच्छीलं खलोपासनात् ।**
**ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया–**
**न्मैत्री चाप्रणयात् समृद्धिरनयात् त्यागप्रमादाद्धनम् ॥**

**अन्वयः-** नृपतिः दौर्मन्त्र्यात्, यतिः सङ्गात्, सुतः लालनात्, विप्रः अनध्ययनात्, कुलं कुतनयात्, शीलं खलोपासनात्, ह्रीः मद्यात्, कृषिः अनवेक्षणात्, स्नेहः प्रवासाश्रयात्, मैत्री अप्रणयात् समृद्धिः अनयात्, धनं प्रमादात् त्यागाच्च विनश्यति ।

**व्याख्या-** नृपतिः – राजा । दौर्मन्त्र्यात् – दुष्टः – यथोचितमप्रयुक्तः मन्त्रः – कार्यसिद्धिविषयको गुप्तविचारः यस्य स दुर्मन्त्रः तस्य भावो दौमन्त्र्यं, तस्मात् दौर्मन्त्र्यात् – दुर्मन्त्रसेवनात् । यतिः – शमदमादिसम्पन्नो जितेन्द्रियः पुरुषः यतिः सङ्गात् – लोकसम्पर्कात् । सुतः – आत्मजः । लालनात् – स्नेहाधिक्यपूर्वकं पालनात्, विप्रः – ब्राह्मणः । अनध्ययनात् – वेदशास्त्राध्ययनरूपस्वाध्यायाभावात् । कुलम् – वंशः । कुतनयात् – कुपुत्रात्। शीलम् – सदाचारः । खलोपासनात् – दुष्टजनसहवासात् । ह्रीः– लज्जा। मद्यात् – मद्यपानात् । कृषिः अनवेक्षणात् – पुनःपुनः पर्यवेक्षणाभावात् । स्नेहः – प्रेम । प्रवासाश्रयात् – परदेशवासात् । मैत्री – मित्रता । अप्रणयात् – स्नेहाभावात् । समृद्धिः – धनधान्यसुखादिवृद्धिः । अनयात् – नीतिविरुद्धाचरणात्। धनं – वित्तं च, त्यागात् प्रमादाच्च – त्यागे – दाने प्रमादः – अवधानराहित्यं तस्मात्, विनश्यति – विनाशं, दुरवस्थां वा गच्छतीति ।

**सरलार्थः-** (अस्मिन् श्लोके कस्य नाशः कस्मात् भवतीति प्रतिपादितमस्ति) नृपतिना सर्वदा सन्मन्त्रप्रयोगः कर्तव्यः, यतिना लोकसंसर्गः परिहरणीयः, पुत्रस्यानुचितं लालनं न कर्तव्यम्, विप्रेण स्वाध्यायोऽध्येतव्यः, सुपुत्रेण वंशोन्नतिः कर्तव्या, सदाचारिभिः दुर्जनसंसर्गस्त्याज्यः विनयार्थिभिः मद्यं न पेयम्, कृषेः पुनः पुनः अवेक्षणं कार्यम्, स्नेहार्थिभिः चिरं परदेशं न स्थातव्यम्, मित्रताभिरक्षणाय स्नेहः संवर्धनीयः, समृद्ध्यर्थं नीतिः अनुसरणीया तथा धनं रक्षितुकामैः सत्पात्रेभ्यो वितरणेऽवधानं च सततं कर्तव्यम्। मानवेन सदा सर्वत्र सावधानेन भवितव्यमिति तात्पर्यम् ।

**( ९ )** **सत्याऽनृता च परुषा प्रियवादिनी च**
**हिंस्त्रा दयालुरपि चार्थपरा वदान्या ।**
**नित्यव्यया प्रचुरनित्यधनागमा च**
**वाराङ्गनेव नृपनीतिरनेकरूपा ॥**

**अन्वयः-** सत्या अनृता च परुषा प्रियवादिनी च हिंस्त्रा दयालुः अपि च अर्थपरा वदान्या नित्यव्यया प्रचुरनित्यधनागमा च एवं नृपनीतिः वाराङ्गना इव अनेकरूपा (अस्ति)

**व्याख्या-** सत्या – यथार्थभाषिणी । अनृता – असत्यवादिनी च । परुषा – कठोरभाषिणी । प्रियवादिनी– मधुरभाषिणी च । हिंस्त्रा – घातका । दयालुः – कृपावती । अपि च – अन्यच्च । अर्थपरा – धनपरायणा ।

वदान्या - दानशौण्डा च । नित्यव्यया - नित्यं - सर्वदा व्यया - कार्येषु विनियोगा । प्रचुरनित्यधनागमा च - प्रचुरः बहु, नित्यम् - सर्वदा, धनागमः - अर्थप्राप्तिः यस्या - यस्यां वा च - एवम् । नृपनीतिः - राजनीतिः । वाराङ्गना इव - वेश्या इव । अनेकरूपा - बहुप्रकारका न तु एकान्तिकी।

**सरलार्थः-** यथा लोके वेश्या कदाचित् सत्यं कदाचिच्चासत्यं ब्रवीति, प्रसङ्गानुसारं क्वचित् कठोरं कुत्रचिच्च मधुरं वा वचनं ब्रूते, निर्दयतां दयालुतां लोभम्, औदार्यं च अवलम्बते तथा यथासमयं धनवितरणमर्जनं वा कुरुते, तथैव नृपनीतिरपि आवश्यकतानुसारं सत्यमसत्यं च भावं प्रकटयन्ती अर्थार्जने कठिनतां मधुरतां वा दर्शयति, दण्डेन प्रजारक्षणेन च क्रूरताम् औदार्यं च दर्शयन्ती धनव्ययं संग्रहं च कर्तुमुपदिशतीति ।

( 10 ) **यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं**
**तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ।**
**तद्धीरो भववित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः**
**कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यंजलम् ॥**

**अन्वयः-** धात्रा निजभालपट्टलिखितं स्तोकं महद् वा धनम् अस्ति, तत् (मानवः) मरुस्थले अपि नितरां प्राप्नोति ततः अधिकं मेरौ न (अपि न प्राप्नोति) । तत् (हे मनुष्य) धीरः भव, वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः । पश्य, घटः कूपे पयोनिधौ अपि तुल्यं जलं ग्रह्णाति ।

**व्याख्या-** धात्रा - ब्रह्मणा । निजभालपट्टलिखितं - निजम् - स्वीयं यद् भालपट्टम् - ललाटपट्टं तस्मिन् लिखितम् - अङ्कितम् । स्तोकम् - अल्पम् । महत् - बहु अधिकं वा यद् धनम् - वित्तम् अस्ति, तत् - तावन्मात्रं धनम् मनुष्यः - मरुस्थलेऽपि - निर्जले उषरदेशेऽपि । नितराम् - निश्चितम् । प्राप्नोति - लभते । ततः - ब्रह्मलिखितात् । अधिकम् - अतिशयितम् । मेरौ - सुवर्णपर्वते अपि न प्राप्नोति । तत् - तस्मात् कारणात् । हे मनुष्य । धीरः - गम्भीरः स्थिरचित्तः । भव - जायस्व । वित्तवत्सु - धनिषु । कृपणां - दीनाम् । वृत्तिम् - वर्तनं, व्यापारम् । वृथा - व्यर्थम् । मा कृथाः - न कुरु । पश्य -विलोकय । घटः - कलशः । कूपे - प्रहौ । पयोनिधावपि - समुद्रेऽपि । तुल्यम् - समानम् । जलम् - उदकम् । गृह्णाति - आदत्ते ।

**सरलार्थः-** यथा कलशेन कूपे समुद्रे वा समानमेव जलं गृह्यते । तथैव सर्वोऽपि जनः स्वस्य भाग्यानुसारमेव सर्वत्र सर्वदा सर्वासु अवस्थासु अपि धनं प्राप्नोति नाधिकं न वा न्यूनम्, अतः अनेन दृष्टान्तेन मानवेन समाहितमनसा भवितव्यं न तु कार्पण्येन इति तात्पर्यम् । तस्मात् मदान्धानां धनिकानां पुरतो व्यर्थं दैन्यं न प्रदर्शनीयम् ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) के मत्सरग्रस्ताः सन्ति ?

(क) नेतारः (ख) अभिनेतारः (ग) बोद्धारः (घ) धर्तारः

(२) भुवि भारभूताः मृगाः केन रूपेण चरन्ति ?

(क) मनुष्यरूपेण (ख) दानवरूपेण (ग) पशुरूपेण (घ) भूतरुपेण

(३) किमाख्यं धनं हर्तुर्याति न गोचरम् ?

(क) द्रव्याख्यम् (ख) विद्याख्यम् (ग) लक्ष्म्याख्यम् (घ) रामाख्यम्

(४) संस्कृता वाण्येका कं समलङ्करोति ?

(क) देवम् (ख) दानवम् (ग) पुस्तकम् (घ) पुरुषम्

(५) मानवेन दाक्षिण्यं कुत्राचरणीयम् ?

(क) स्वजने (ख) परजने (ग) अन्यजने (घ) गुरुजने

(६) विप्रः कस्मात् कारणात् विनश्यति ?

(क) अनध्ययनात् (ख) अध्ययनात् (ग) अवकाशात् (घ) भयत्वात्

(७) त्यागप्रमादात् किं नश्यति ?

(क) दानम् (ख) ज्ञानम् (ग) विद्या (घ) धनम्

(८) केन भालपट्टे धनं लिखितम् ?

(क) धात्रा (ख) राज्ञा (ग) भ्रात्रा (घ) कर्त्रा

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) केषां विनिपातः शतमुखः भवति ?

(२) येषां विद्या-तपो-दानादिकं नास्ति ते कुत्र भारभूताः ?

(३) अलङ्कृताः मूर्धजाः कं न भूषयन्ति ?

(४) 'शतकत्रयं' केन रचितम् ?

(५) दौर्मन्त्र्यात् कः विनश्यति ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) के कथं भुविभारभूता : ?

(२) मानवजीवने भाग्यस्य किं महत्त्वम् ?

(३) भर्तृहरिः कस्य नाशं कस्मात् वर्णयति ?

(4) कथं वाग्भूषणं भूषणम् ?

**४. श्लोकपूर्तिं कुरुत ।**

(१) केयूराणि न .................... वाग्भूषणं भूषणम् ।

(२) दौर्मन्त्र्यान्नृपति .................. प्रमादाद्धनम् ।

**५. अ विभागं ब विभागने सह संयोजयत ।**

| अ | ब |
|---|---|
| (१) मनुष्यरूपेण | (१) जीर्णमङ्गे सुभाषितम् |
| (२) अबोधोपहताश्चान्ये | (२) मृगाश्चरन्ति । |
| (३) पयोनिधावपि घटः | (३) वाग्भूषणं भूषणम् । |
| (४) क्षीयन्ते खलु भूषणानि सततं | (४) नृपनीतिरनेकरूपा । |
| (५) वाराङ्गनेव | (५) गृह्णाति तुल्यं जलम् । |

**छात्रप्रवृत्तिः**

- नीतिशतकश्लोकान् कण्ठस्थंकुर्युः ।

**शिक्षकप्रवृत्तिः**

- शिक्षकः शतकत्रयस्य सारमात्रं बोधयेत् ।

●

# २१ हितोपदेशः

**प्रस्तावना**

संस्कृतसाहित्ये नीतिकथासन्दर्भे पञ्चतन्त्रात् अतिरिक्तः अन्यतमः ग्रन्थः नास्ति । नीतिकथासाहित्ये पञ्चतन्त्राख्यः वार्तासङ्ग्रहात्मकः अनुपमः अत्युत्तमः ग्रन्थः विद्यते । एतस्मादेव पञ्चतन्त्रात् अनेके ग्रन्थाः प्रकटीभूताः सन्ति । अयं ग्रन्थः खलु श्रीनारायणपण्डितेन प्रणीतोऽस्ति । पण्डितवर्योऽयं नारायणः बङ्गाधिपतेः महाराजधवलचन्द्रसेनात् लब्धप्रतिष्ठः राज-पण्डित आसीत् । यथा-

**श्रीमान् धवलचन्द्रोऽसौ जीयान्माङ्गलिको रिपून् ।**

**येनायं संग्रहो यत्नाल्लेखयित्वा प्रसारितः ॥**

हितोपदेशस्य रचना प्रायः पञ्चतन्त्रमाश्रित्यैव सम्पन्ना यथा - पञ्चतन्त्रात् तथाऽन्यस्माद् ग्रन्थादाकृष्य लिख्यते । अस्मिन ग्रन्थे (4) चत्वारः परिच्छेदाः, (43) त्रिचत्वारिंशत्कथाः निबद्धाः सन्ति । ग्रन्थरत्नमिदं मित्रलाभ - सुहृद्भेद - विग्रह - सन्धिभेदात् चतुर्भिः प्रकरणैः अलङ्कृतमस्ति । यथा -

**मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च ।**

**हितोपदेशनामायं चतुर्धा सुविभाजितः ॥**

---

लघु-लघु बालकाः कथां वार्तां शृण्वन्तः बोधेन सह मोदमपि लभन्ते । हितोपदेशः सरलः सरसश्च बोधकथासंग्रहोऽस्ति। हितोपदेशे काश्चन कथाः अन्यस्मात् ग्रन्थात् सङ्गृहीताः सन्ति । काश्चन कथाः वेतालपञ्चविंशतिकातः उद्धृताः विद्यन्ते । नीतिप्रधानाः कथाः कामन्दकीयं नीतिशास्त्रमाश्रित्य निबद्धाः दृश्यन्ते । आधुनिके कराले कलिकालेऽपि हितोपदेशस्य कथाः, सूक्तयः मानवानां कृते पदे पदे पथदर्शिकाः नेत्रोत्घाटकाश्च वर्तन्ते इत्यत्र न शङ्कावलेशः । ग्रन्थकर्ता स्वयमेव ग्रन्थस्यास्य प्रयोजनं प्रतिपादयति -

**श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।**

**वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥**

अत्रास्मिन् ग्रन्थे निबद्धासु कथासु आहत्य चतस्रः (४) मुख्यकथाः एकोनचत्वारिंशत् (३९) उपकथाः सप्तशताधिकषड्विंशतिपरिमिताः (७२६) श्लोकाः प्रोक्ताः सन्ति । पशु-पक्षिणां माध्यमेन कथिताः कथाः गूढरहस्यपूर्णाः सन्ति । साधुजीवनजीवनाय अलमेताः कथाः । पुनश्च हितोपदेशस्य भाषा-शैली सरला, सरसा पाठकचेतोहरा च विद्यते। विविधछन्दोभिः निबद्धानि पद्यानि अतिसरलानि, आकर्षकाणि, उपदेशपूर्णानि च वर्तन्ते । प्रथमा-मध्यमाकक्षयोः कृते सम्यक्तया सरलसंस्कृतं ज्ञातुम् इदमुपकृतमस्ति ।

**हितोपदेशस्य कथापरिचयः**

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् । तत्र च सर्वस्वामिगुणोपेतः सुदर्शनो नाम राजा आसीत् । सः केनापि उक्तं श्लोकद्वयं श्रुतवान् ।

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।**

**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥**

**यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।**

**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥**

इति श्रुत्वा राजा सुदर्शनः शास्त्राध्ययनशून्यानां नित्यं कुमार्गगामिनाम् अनधिगतशास्त्राणां पुत्राणां साम्प्रतं नीति-शास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः ।

अत्रान्तरे नीतिशास्त्रकुशलः विष्णुशर्मा नाम पण्डितः उक्तवान् हे देव ! महाकुलोत्पन्नाः एते राजकुमाराः अतोऽहं षण्मासाभ्यन्तरे एव भवत्पुत्रान् नीतिशास्त्रज्ञान् करिष्यामीति । तच्छ्रुत्वा राजा स्वपुत्रान् विष्णुशर्मणः पार्श्वे बहुमानपुरःसरं समर्पितवान् । ततश्च राजभवने सुखोपविष्टानां राजपुत्राणां पुरस्तात् अवसरक्रमेण सः पण्डितः वक्तुमारेभे हे राजपुत्राः! शृणुत -

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचित् व्यतीतायां रात्र्याम् अस्ताचलगते भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः ।

सः यममिव पाशहस्तम् आयान्तं व्याधमपश्यत् । तमवलोक्य सः व्याकुलचित्तोऽभवत् ।

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम् । स च प्रच्छन्नो भूत्वा स्थितः । तदानीमेव चित्रग्रीवनामा कपोतराजः सपरिवारः गगने उड्डीयमानः तान् तण्डुलकणान् अपश्यत् । ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् आह- कुतोऽत्र निर्जनवने तण्डुलकणानां सम्भवः ? अहं तु अभद्रं पश्यामि तथा च सर्वथाऽविचारितं कर्म अस्माभिः न कर्तव्यमिति।

किन्तु तद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह अहो ! किमेवमुच्यते ! अस्य वृद्धस्य वचनं न श्रोतव्यम् अस्माभिः तण्डुलकणाः भक्षितव्या एवेति । ततः तेन सह सर्वे कपोताः तण्डुलकणलोभेन नभोमण्डलात् अवतीर्य तत्रोपविष्टाः । अनन्तरं सर्वे कपोताः जालबद्धाः बभूवुः । ततः यस्य वचनात् तत्रावतरिताः तं सर्वे तिरस्कर्तुमारेभिरे ।

ततः कपोतराजः चित्रग्रीवः तेषां विपत्काले धैर्यम् अवलम्ब्य प्रतिकारं कर्तुं वदति । इदानीमपि तथा क्रियताम्। सर्वैः एकचित्तीभूय जालं गृहीत्वा उड्डीयताम् । तद्वचो निशम्य सर्वे कपोताः सजालं उत्पतिताः । ततः सः व्याधः दूरात् जालेन साकं उड्डीयमानान् कपोतान् दृष्ट्वा तमनुधावन् व्यचारयत् । यदेते कपोताः निपतिष्यन्ति तदा मे वशीभविष्यन्तीति। किन्तु तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः । अथ लुब्धकं निवृत्तं वीक्ष्य कपोता ऊचुः - स्वामिन् किमिदानीं कर्तुमुचितम् ।

चित्रग्रीव उवाच-

तन्मे मित्रं हिरण्यको नाम मूषिकराजः गण्डकीतीरे चित्रवने निवसति । स अस्माकं पाशान् छेत्स्यति । इत्यालोच्य सर्वे हिरण्यकविवरं गताः । सः पाशबद्धान् कपोतान् दृष्ट्वा सविस्मयम् आह सखे ! किमेतत् ! चित्रग्रीव अवोचत् सखे ? अस्माकं प्राक्जन्मकर्मणः फलमेतत् । ततः चित्रग्रीवस्य प्रार्थनया हिरण्यकः सर्वेषां बन्धनानि छिनत्ति । ततश्च हिरण्यकः सर्वान् सादरं संपूज्य आतिथ्यं करोति । पुनः सर्वे स्वं-स्वं देशं ययुः ।

**विद्या ददाति विनयं विनयाद्याति पात्रताम् ।**

**पात्रत्वात् धनमाप्नोति धनाद्धर्मः ततः सुखम् ॥**

**अन्वयः-** विद्या विनयं ददाति । (मानवः) विनयात् पात्रतां याति, पात्रत्वात् धनम् आप्नोति, धनात् धर्मम् आप्नोति ततः सुखम् आप्नोति ।

**व्याख्या-** विद्या - व्याकरणादिशास्त्रम्, विनयम् - विनम्रताम्, ददाति - प्रयच्छति , जनयति । विनयाद् - विनम्रतायाः । पात्रतां- सत्पात्रत्वम् । याति - प्राप्नोति (मानवः) पात्रत्वात् - सत्पात्रत्वात्, धनं - वित्तम् । आप्नोति - प्राप्नोति (जनः), धनात् - द्रव्यात्, धर्मं - पुण्यम् । आप्नोति ततः - अनन्तरम् । सुखम् - मोदम्, आनन्दम् । आप्नोति - प्राप्नोति । सकलस्वार्थप्राप्तिं प्रति विद्यैव कारणमिति तात्पर्यम् ।

**सरलार्थः-** विद्या खलु मनुष्याय विनम्रतां प्रयच्छति, मानवः नम्रता द्वारा, विनयात् वा पात्रताम् अधिगच्छति, पात्रतां च लब्ध्वा धनं लभते, धनात् धर्मं च अवाप्नोति ततश्च धर्मेण सुखं विन्दते ।

**सूक्तिः-** ''विद्याधनं सर्वधनप्रधानम्'' ?'विद्याविहीनः पशुः' 'अन्नेन क्षणिका तृप्तिः यावज्जीवं तु विद्यया' इत्याद्याः विद्याप्रशस्तिपरकाः सूक्तयः विद्यायाः बहूत्तमं महत्त्वं जनयन्ति । ज्ञात्वेदं स्वाध्यायोऽध्येतव्यः इति तात्पर्यम् ।

**( 2 )** **विद्या शस्त्रस्य शास्त्रस्य द्वे विद्ये प्रतिपत्तये ।**

**आद्या हास्याय वृद्धत्वे द्वितीयाऽऽद्रियते सदा ॥**

**अन्वयः-** शस्त्रस्य विद्या शास्त्रस्य च विद्या (च) द्वे विद्ये प्रतिपत्तये (स्तः) आद्या वृद्धत्वे हास्या (भवति) द्वितीया सदा आद्रियते ।

**व्याख्या-** शस्त्रस्य - खड्गादिआयुधस्य विद्या । शास्त्रस्य - वेदादिशास्त्रस्य विद्या (च) द्वे - द्विसंख्यके विद्ये । प्रतिपत्तये - ज्ञानाय, स्तः । अत्र आद्या - प्रथमा, शस्त्रविद्या । वृद्धत्वे - वार्धक्ये, हास्याय - उपहासाय, भवति । वार्धक्ये शस्त्रविद्यां पठन्तं पुरुषं दृष्ट्वा जनाः हसन्ति इति तात्पर्यम् । द्वितीया - शास्त्रविद्या, सदा - सर्वदा बाल्ये, यौवने, वार्धक्ये चेति, आद्रियते - पूज्यते ।

**सरलार्थः-** ज्ञानार्थं शस्त्रविद्या शास्त्रविद्या इत्थं द्विसंख्यके विद्ये स्तः, तत्र आद्या शस्त्रविद्या वार्धक्ये - वृद्धावस्थायां हास्याय भवति, परं द्वितीया शास्त्रविद्या सदा सर्वदा बाल्ये, यौवने, वार्धक्ये च सर्वैः जनैः पूज्यते इति।

**सूक्ति :-** ''प्रथमे नार्जिता विद्या'' 'गतेऽपि वयसि ग्राह्या विद्या सर्वात्मना बुधैः' इत्यादिवचनैः विद्या बाल्यादारभ्य ग्राह्या ।

**( 3 )** **आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम् ।**

**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥**

**अन्वयः** आहारनिद्राभयमैथुनञ्च एतत् नराणां पशुभिः सामान्यम् । हि धर्मः तेषाम् अधिकः विशेषः धर्मेण हीनाः पशुभिः समानाः ।

**व्याख्या-** आहारनिद्राभयमैथुनञ्च - भोजनस्वापभीतिव्यवायम् । एतत् - समीपे निर्दिष्टं, नराणां - मनुष्याणां । पशुभिः - चतुष्पदैः , गवादिभिः । सामान्यं - साधारणम् । हि - यस्मात् कारणात् । धर्मः - पुण्यम् । तेषां - नराणाम् । अधिकः- अतिरिक्तः विशेषः - व्यावर्तको गुणः, अतः धर्मेण - पुण्येन, हीनाः - रहिताः नराः, पशुभिः - चतुष्पदैः । समाना - तुल्याः । धर्मरहिता नरा आहारादिमात्रायुक्तत्वात् पशुतुल्या इति ।

**सरलार्थः-** आहारनिद्राभयमैथुनादिकं कार्यं तु मानवानां पशूनाञ्च सामान्यमेवास्ति, धर्मो हि मनुष्याणाम् अतिरिक्तः विशेषः व्यावर्तको गुणो वर्तते । यदि एवं रूपः अधिकः गुण– धर्मविषयः नराणां नो चेत् धर्मेण हीनाः मानवाः पशुभिः समाना वाच्याः ।

**सूक्तिः-** धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।

इति सूक्त्यनुसारं धर्माचरणं सर्वैः विधेयमिति ।

**( 4 )** **उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।**

**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥**

**अन्वयः-** हि कार्याणि उद्यमेन सिध्यन्ति, मनोरथैः न (सिद्ध्यन्ति) हि सुप्तस्य सिंहस्य मुखे मृगाः न प्रविशन्ति।

**व्याख्या-** हि - यस्मात् कारणात् । कार्याणि - कर्माणि । उद्यमेन - उद्योगेन । सिद्ध्यन्ति - सिद्धानि, सफलीभवन्ति। हि - यस्मात् कारणात् । सुप्तस्य - निद्राणस्य । सिंहस्य - मृगेन्द्रस्य । मुखे - आनने । मृगाः- पशवः । न प्रविशन्ति - न प्रवेशं कुर्वन्ति । उद्योगशील एव सिंहो मृगं भक्षयति न मनोरथमात्रेण इति।

**सरलार्थः-** उद्यमेन एव खलु कार्याणि सिद्ध्यन्ति, केवलेन मनोरथसेवनेन न । सुप्तस्य सिंहस्य मुखे मृगाः पशवो वा स्वतः समागत्य न प्रविशन्ति । अतः मानवेन सर्वदा उद्यमशीलेन भवितव्यमिति ।

**( 5 )** **गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः ।**

**आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः ॥**

**अन्वयः-** गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य दोषा भवन्ति । नद्यः आस्वाद्यतोयाः (सत्यः) प्रवहन्ति । ताः समुद्रम् आसाद्य अपेयाः भवन्ति ।

**व्याख्या-** गुणाः - दयादाक्षिण्यादिगुणाः । गुणज्ञेषु - विद्यादिगुणज्ञातृषु । गुणाः - गुणपदवाच्याः । भवन्ति - वर्तन्ते । ते - गुणा एव । निर्गुणं - दयादाक्षिण्यादिगुणरहितं जनं । प्राप्य - आसाद्य, लब्ध्वा । दोषाः - दोषपदवाच्याः । भवन्ति - वर्तन्ते । (दृष्टान्तेन इमम् अर्थं समर्थयति) आस्वाद्यतोया इति । नद्यः - सरितः गङ्गादयः । आस्वाद्यतोयाः - आस्वादनीयजलाः । (सत्यः) प्रवहन्ति - प्रकर्षेण वहन्ति । (ताः एव - नद्यः) समुद्रसंसर्गेण क्षारत्वादिति अपेयाः - पातुमयोग्याः भवन्ति - संपद्यन्ते ।

**सरलार्थः-** विद्यादयादाक्षिण्यादयः सद्गुणाः गुणज्ञेषु गुणरूपेण वसन्ति, किन्तु त एव गुणाः गुणरहितं, निर्गुणं मनुष्यं लब्ध्वा दोषरूपाः प्रभवन्ति । यथा गङ्गाद्याः सरितः आस्वाद्यतोयाः पेयाः सत्यः प्रवहन्ति, परं ताः नद्यः समुद्रसंसर्गं लब्ध्वा क्षारजलत्वात् अपेयाः पातुम् अयोग्याः जायन्ते ।

**सूक्तिः-** गुणैरुत्तुङ्गतां याति नोच्चैरासनसंस्थितः ।

प्रासादशिखरस्थोऽपि काकः किं गरुडायते ॥

मानवेन उत्तमानां संगः कार्यः गुणश्च ग्राह्यः इति तात्पर्यम् ।

**( 6 )** **स हि गगनविहारी कल्मषध्वंसकारी**

**दशशतकरधारी ज्योतिषां मध्यचारी**

**विधुरपि विधियोगाद् ग्रस्यते राहुणाऽसौ**

**लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥**

**अन्वयः-** गगनविहारी कल्मषध्वंसकारी स दशशतकरधारी ज्योतिषां मध्यचारी असौ विधुः अपि विधियोगात् राहुणा ग्रस्यते हि ललाटे लिखितं प्रोज्झितुम् अपि कः समर्थः ।

**व्याख्या-** गगनविहारी - आकाशविहारशीलः । कल्मषध्वंसकारी - पापनाशकारकः । सः- प्रसिद्धः । दशशतकरधारी - सहस्त्रकिरणधर्ता सूर्यः । एवं ज्योतिषां - नक्षत्रग्रहाणां मध्यचारी - अन्तरचरणशीलः । असौ - अयं। विधुः - चन्द्रोऽपि । विधियोगात् - भाग्यसंयोगात् । राहुणा - तन्नामकग्रहेण । ग्रस्यते - ग्रस्तः क्रियते। हि - यतः । ललाटे - भाले, लिखितं - लिपिविषयीकृतम् , अंकितं वा । प्रोज्झितुं - निवारयितुं। कः - जनः । समर्थः - शक्तः । न कोऽपि इत्यर्थः ।

**सरलार्थः-** अन्तरिक्षविहारी पाप-अन्धकारविध्वंसकारी सः सहस्त्रशः रश्मिधारी दिवाकरः तथा ग्रह-नक्षत्राणां मध्यचारी चन्द्रमा अपि भाग्यसंयोगात् राहुणा ग्रस्यते । यतः ललाटलिखितं भाग्यं को नाम दूरीकर्तुं शक्नोति? न कोऽपि इत्यर्थः ।

**सूक्तिः-** भाग्यं फलति सर्वत्र न विद्या न च पौरुषम् । भाग्याधीनं जगत्सर्वम् । इत्यादिसुवचनैः भाग्यस्य महत्त्वं ज्ञेयम् ।

**( ७ )** **सुजीर्णमन्नं सुविचक्षणः सुतः,**

**सुशासिता स्त्री नृपतिः सुसेवितः ।**

**सुचिन्त्य चोक्तं सुविचार्य यत् कृतं ।**

**सुदीर्घकालेऽपि न याति विक्रियाम् ॥**

**अन्वयः-** सुजीर्णम् अन्नम्, सुविचक्षणःसुतः, सुशासिता स्त्री, सुसेवितो नृपः, यत् सुचिन्त्य उक्तं यत् सुविचार्य कृतं (तत्) सुदीर्घकालेऽपि विक्रियां न याति ।

**व्याख्या-** सुजीर्णम् - सम्यक् पक्वम् । अन्नम् - भक्ष्यद्रव्यम् । सुविचक्षणः - सुविद्वान् । सुतः - पुत्रः । सुशासिता - सम्यक् अनुशिष्टा, स्त्री-नारी । सुसेवितः - सम्यगाराधितः । नृपः - राजा । यत् सुचिन्त्य - सम्यक् चिन्तयित्वा । उक्तम् - कथितम् । यत् सुविचार्य - सम्यक् विमृश्य । कृतम् - विहितम् । तत् सुदीर्घकालेऽपि - अतिचिरसमयेऽपि । विक्रियां - विकारं न याति - न प्राप्नोति ।

**सलरार्थः-** सम्यक् पक्वमन्नं, मनीषिसुपुत्रः, उत्तमरीत्या शासिता नारी, सुष्ठुः समाराधितः भूपः, सम्यक्तया विचार्य च यदुक्तं, समीचीनं विमृश्य कृतं तत् सुदीर्घकालेऽपि विकृतभावं नाप्नोतीति तात्पर्यम् ।

**सूक्तिः-** 'सहसा विदधीत न क्रियामविवेकः परमापदां पदम्' सुविचार्य, धैर्येण, विवेकेन च सर्वत्र व्यवहरेत् जनः इति ।

**( 8 )** **लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते ।**

**लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥**

**अन्वयः-** लोभात् क्रोधः प्रभवति । लोभात् कामः प्रजायते । लोभात् मोहो नाशश्च (प्रजायेते) लोभः पापस्य कारणम् ।

**व्याख्या-** लोभात् - लोलुपत्वात् । क्रोधः - कोपः । प्रभवति - उत्पद्यते । लोभात् - वित्तशाठ्यात् । कामः - विषयेच्छा । प्रजायते - समुत्पद्यते । लोभात् - कृपणत्वात् । मोहः - अज्ञानम्, नाशश्च - मरणं च प्रजायते । समुत्पद्यते इति । एवं च लोभः - लोलुपत्वम् । पापस्य - कल्मषस्य । कारणम् - हेतुः अस्तीति । सर्वाऽनर्थस्य कारणं लोभ एवेति तात्पर्यम् ।

**सरलार्थः-** लोभात् क्रोधः समुद्भवति, लोभेन च विषयेच्छा उत्पद्यते, लोभात्, लोलुपत्वात्, वा मोहः विनाशश्च भवतः । लोभः पापस्य कारणमस्ति ।

**सूक्तिः-** ''अति सर्वत्र वर्जयेत्'' इति वचनानुसारं लोभः त्याज्यः । लोभः नरकद्वारमपि विद्यते ।

**( 9 )** **अयं निजः परो वेति गणना लघुचेतसाम् ।**

**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**

**अन्वयः-** अयं निजः वा परः इति लघुचेतसां गणना । उदारचरितानां तु वसुधा एव कुटुम्बकम् ।

**व्याख्या-** अयम् - एषः । निजः - आत्मीयः, स्वजनः । वा - अथवा । परः - अन्यः, परकीयः । इति - एवम् । लघुचेतसाम् - क्षुद्रमनसाम् । गणना - विचारः, । उदारचरितानां तु - महाचरित्राणां तु । वसुधा एव - भूमण्डलम् एव कुटुम्बकं - परिवारः, कुटुम्बसमुदायः ।

**सरलार्थः-** अयं मामकः परकीय इति गणना लघुचेतसां जनानां भवति, उदारचरितानां तु समग्रा पृथिवी कुटुम्बकं भवति । तव - ममेति भेदभावः क्षुद्रजनानां भवति परं महामनसां तु समग्रं विश्वं कुटुम्बरूपं भवतीति।

**सूक्तिः-** 'समोऽहं सर्वभूतेषु' इति वचनानुसारं सर्वत्र सर्वजन्तुषु समभावः, समदृष्टिः धार्या ।

**( 10 )** **यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राऽल्पधीरपि ।**

**निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥**

**अन्वयः-** यत्र विद्वज्जनो न अस्ति, तत्र अल्पधीः अपि श्लाघ्यः । निरस्तपादपे देशे एरण्डः अपि द्रुमायते ।

**व्याख्या-** यत्र - यस्मिन् स्थाने, विद्वज्जनः- पण्डितजनः। न अस्ति - न वर्तते । तत्र - तस्मिन् स्थाने । अल्पधीः अपि - मन्दबुद्धिः अपि । श्लाघ्यः - प्रशंसनीयः भवति । यतः निरस्तपादपे - वृक्षरहिते । देशे -

स्थाने, एरण्डः अपि – तन्नामतरूः अपि द्रुमायते – द्रुमवत् प्रतीयते । वृक्षेषु परिगणनं भवतीति ।

**सरलार्थः-** यत्र यस्मिन् स्थाने विद्वान् पुमान् नास्ति यत्र अल्पमतिः अपि प्रशंसनीयो भवति । यतः वृक्षरहिते प्रदेशे एरण्डः अपि (एरंडो इति भाषायाम्) द्रुमायते – महावृक्षमिव सम्मानं लभते इत्यर्थः ।

## स्वाध्यायः

**१. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं लिखन्तु ।**

(१) विद्या मानवाय किं ददाति ?

(क) धनम् (ख) ज्ञानम् (ग) यानम् (घ) विनयम्

(२) मनुष्यः पात्रताम् अवाप्य किं प्राप्नोति ?

(क) धनम् (ख) ज्ञानम् (ग) विद्याम् (घ) सुखम्

(३) विद्या कतिविधा भवति ?

(क) द्विविधा (ख) त्रिविधा (ग) चतुर्विधा (घ) दशविधा

(४) केन हीनाः मानवाः पशुभिः समानाः ?

(क) ज्ञानेन (ख) धर्मेण (ग) अन्नेन (घ) जलेन

(५) कार्याणि केन सिद्ध्यन्ति ?

(क) धनेन (ख) दानेन (ग) उद्यमेन (घ) मनोरथेन

(६) नद्यः समुद्रम् आसाद्य कीदृश्यः भवन्ति ?

(क) सुपेयाः (ख) अपेयाः (ग) पुण्याः (घ) विशुद्धाः

(७) विधुरपि विधियोगाद् केन ग्रस्यते ?

(क) राहुणा (ख) शनिना (ग) केतुना (घ) गुरुणा

(८) लोभः कस्य कारणम् ?

(क) पूज्यस्य (ख) दुःखस्य (ग) धनस्य (घ) पापस्य

(९) यत्र विद्वज्जनो नास्ति तत्र कः श्लाघ्यः ?

(क) अल्पधीः (ख) बहुधीः (ग) मन्दधीः (घ) सुधीः

**२. अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखन्तु ।**

(१) मनुष्यः विनयात् किं प्राप्नोति ?

(२) नराणां पशूनाञ्च किं सामान्यम् ?

(३) कीदृशस्य सिंहस्य मुखे मृगाः न प्रविशन्ति ?

(४) कं समासाद्य नद्यः अपेयाः भवन्ति ?

(५) राहुणा विधियोगात् कः ग्रस्यते ?

**३. अधोलिखितप्रश्नानां विस्तरेण विवेचनं कुरुत ।**

(१) विद्यायाः महत्त्वम्

(२) उद्यमस्य महत्त्वम्

(३) धर्मस्य महत्त्वम्

(४) भाग्यस्य महत्त्वम्

**४. श्लोकपूर्तिं कुरुत ।**

(१) आहारनिद्रा ............................ ।

(२) यत्र विद्वज्जनो ............................ ।

(३) विद्या शस्त्रस्य ............................ ।

**५. अ विभागं ब विभागेन सह संयोजयत ।**

| अ | ब |
|---|---|
| (१) विद्या ददाति | (१) कार्याणि । |
| (२) शस्त्रस्य शास्त्रस्य | (२) विनयम् । |
| (३) उद्यमेन हि सिध्यन्ति | (३) द्वे विद्ये । |
| (४) लोभात् क्रोधः | (४) श्लाघ्यस्तत्राल्पधीः । |
| (५) यत्र विद्वज्जनो | (५) प्रभवति । |

**छात्रप्रवृत्तिः**

- छात्राः हितोपदेशकथाः जानीयुः ।

**शिक्षकप्रवृत्तिः**

- शिक्षकाः नीतिकथोपदेशं दद्युः ।

● ● ●